THE

CHOWKHAMBÂ SANSKRIT SERIES;

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NO. 342.

वैशेषिकदर्शने

महर्षिकल्पप्रशस्तदेवविरचितम्

प्रशस्तपादभाष्यम् ।

पण्डितप्रवर जगदीशतर्कालङ्कारविरचितया सूक्तिटीकया
महामहोपाध्यायपद्मनाभमिश्रकृतया सेतुव्याख्यया
विद्वच्चूडामणि व्योमशिवाचार्यनिर्मितया व्योमवत्या च समन्वितम् ।
वाराणसीस्थराजकीयसंस्कृतपुस्तकालयाध्यक्षेण पं० गोपी-
नाथकविराजेन न्यायोपाध्यायदुण्ढिराजशास्त्रिणा च संस्कृतम् ।

THE

PRASASTÂPADABHÂSHYAM

BY Praśastadevâchârya

WITH COMMENTARIES:

Sūkti,–BY JAGADISA TARKALANKÂRA,
Setu,–BY PADMANABHA MISRA, &
Vyomavati,–BY VYOMASIVACHARYA.

Edited by

GOPINATH KAVIRAJ, M. A.
LIBRARIAN GOVERNMENT SANSKRIT LIBRARY,
SARASVATI BHAVAN BENARES,
and
DHUNDHIRAJ SHASTRI Nyayopâdhyâya.

FASCICULUS II–२.

PUBLISHED & SOLD BY THE SECRETARY,
CHOWKHAMBÂ SANSKRIT SERIES OFFICE, BENARES.
Printed by Jai Krishna Das Gupta,
at the Vidya Vilas Press, Benares.

1925.

Agents:

1 Luzac & co, Booksellers,
LONDON.

2 Otto Harrassowitz, Leipzig:
GERMANY.

3 The Oriental Book-supplying Agency,
POONA.

वक्तुं शक्यते। स च घटाभाव इत्यत्र घटे घटत्वमभावे च तदभावत्वं तादृशो धर्मः एवम्पटाभावादावपि। न चैवमननुगम इति वाच्यम्, अतीन्द्रियस्थले विशिष्टप्रतीत्यजनकतया धर्मिणः स्वरूपसम्बन्धाभावापत्तेः। सम्बन्धान्तरमन्तरेण विशिष्टप्रतीतिविषयतया योग्यत्वमिति घटाभावे पटाभाव इति प्रतीयमाने घटप्रतियोगिकत्वापत्तेः। प्रतीतिस्थले प्रमितिः प्रक्षेप्स्यतेति अधिकरणस्य प्रतियोगिसादृश्यामभावसम्बन्धेन सामयिकात्यन्ताभावेन स्वसम्बन्धापत्तेः—स्वतःप्रमितिविषयत्वाभावेऽपि परतः प्रमितिविषयत्वसत्त्वेन प्रमितिविषयतायोग्यतासत्त्वात्। योग्यतामनन्तर्भाव्यैव लक्षणं भावनीयामिति प्रमित्यभावदशायां स्वसम्बन्धानापत्तेः प्रमितेरसार्वदिकत्वात्, सम्बन्धे सति प्रमितिः प्रमितौ सत्यां सम्बन्ध इत्यन्योन्याश्रयाच्च। न चेश्वरप्रमितिमादाय प्रमितिकादाचित्कत्वकृतदोषप्रमोषे इति वाच्यम्। अन्योन्याश्रयापसारणस्यासम्भवात्। अपि च यतः सम्बन्धान्तरमन्तरेण विशिष्टप्रतीतिजननयोग्यत्वमेव स्वरूपसम्बन्धस्ततो घटाभाववद्भूतलमित्यस्या बुद्धेरचाक्षुषत्वापत्तिः विषयस्य सम्बन्धस्य प्रतीतिगर्भत्वात्। न च स तदा घट इत्यादिप्रतीतीनामदृष्टस्यातीन्द्रियतया न्यायनयेऽपि मम शरीरमिति प्रतीतेरभावप्रसङ्ग इति वाच्यम्, अन्योन्याश्रयस्य तादवस्थ्यादिति—धर्मिस्वात्मकसम्बन्धस्यैव सम्बन्धत्वात्। यथा संयोगसम्बन्धो न घटादिः स्वभावस्य नियोगपर्यनुयोगानर्हत्वात्, तथा कौचिदेव धर्मिणौ सम्बन्धौ वैशिष्ट्याख्यसम्बन्धान्तरकल्पनायामनवस्थाभयेन क्वचिद्धर्मिणि पर्यवसानस्यावश्यकत्वात्। न च स्वस्वसम्बन्धेन कथं सम्बद्धत्वं, प्रतीत्यनुसारेणात्माश्रयस्य प्रमाणपरिगृहीतत्वात् अन्यथा प्रमेयत्वाभिधेयत्वज्ञेयत्वादीनाङ्केवलान्वयित्वं न स्यादिति सङ्क्षेपः।

ननु कथं सप्तैव पदार्थाः तत्तेदन्तयोः कल्पितपदार्थानन्तर्गतयोः सत्त्वात्। तथाहि—न तावदतीतसमयसम्बन्धस्तत्ताऽनागतमनुमानादिनानुभूय स्मरतः प्रत्यभिजानानस्य वा स इति प्रयोक्तृत्वादतीतसमयसम्बन्धावगमे संशयविपर्ययात्मकतत्ताव्यतिरेकोल्लेखिज्ञानदर्शनाच्च। नायमतीतसमयसम्बद्ध इति ज्ञानेऽपि स प्रत्यक्ष इति प्रयोगाच्च, अतीतसमयसम्बद्धस्स इति सहप्रयोगानुपपत्तेश्च, काले कालसम्बन्धाभावेन स इति सहप्रयोगानुपपत्तेश्च। ज्ञातधर्मवैशिष्ट्यमेव—पूर्वं धर्मज्ञानं वि-

ना स इत्यप्रयोगात् इति चेत्, पूर्वतद्धर्मवत्तया ज्ञाते तद्धर्मेऽज्ञाते धर्मिणि स इति प्रयोगापत्तेः। तद्धर्मवत्तया ज्ञानमपेक्षितमिति चेत्, असौ ज्ञातधर्मवान् स्मर्यमाणत्वादित्यनुमाने स इति प्रयोगापत्तेः। अत एव धर्मे वैशिष्ट्यमपि न प्रत्यक्षतोऽनुमानादितो वा रूपादिमत्त्वं परिच्छिद्य, स इत्यप्रयोगात्। अतीतज्ञानवैशिष्ट्येनेति चेत्, परवाक्यादसौ मया पूर्वदिवसे ज्ञात इत्यवधृत्यापि स इत्यप्रयोगात्। स्वीयज्ञानं विवक्षितमिति चेत्, जन्मान्तरावधृते स इति प्रयोगापत्तेः। एतज्जन्मनि स्वीयज्ञानं विवक्षितमिति चेत्, मया ज्ञातमित्यवधृतेपि स इत्यप्रयोगात्, पूर्वज्ञानेऽज्ञातनष्टे स इति स्मरणानुपपत्तेः। अत एव ज्ञानपदस्थानेऽनुभवपदप्रक्षेपोऽपि परास्तः। समयज्ञानादिसाधारणातीतधर्मवैशिष्ट्यन्तत्ता। अतीतधर्मविशिष्टस्स इति सहप्रयोगस्तु धर्मभेदेनैव। एकस्य निश्चयेऽपि संशयादिर्धर्मान्तरमादायेति चेन्न, अनुभवगृहीतधर्मस्यातीतत्वात् गृहे स इति प्रयोगानापत्तेः। तस्मात्तत्ता तत्त्वान्तरमिति। इदन्तापि च तथा। तथाहि-न सा गुणादीननुमायेदमित्यप्रयोगात्। न चेदन्ता सैव तच्छब्दप्रयोगे तु तस्याप्रात्यक्षिकं ज्ञानं कारणमिति वाच्यम्। व्यवहारं प्रति व्यवहर्तव्यज्ञानत्वेनैव लाघवेन कारणत्वात्। अपि च द्रव्ये गुणादिरिदन्ता गुणादौ तु का ? नतावदेतद्व्यक्त्याश्रयत्वम्, इतमेतदोष्पर्यायत्वादिति चेत्।

अभावत्वबत्तत्तेदन्त्वादिरखण्ड उपाधिः। अयमित्यनुभवेनानुभूयमानेदन्तायां स इति स्मरणेन तत्ताभेद आरोप्यते, तत्ताप्रमा तु प्रत्यभिज्ञा तत्र तत्ताभेदस्येदन्तायामनारोपात्। एवञ्चानुभवाविषयोऽपि तत्ता स्मृतौ परिस्फुरतीति स्मृतिः यथाऽनुभूतेदन्ताया ततो भेदमवभासयतीत्यपदार्थः। अत एव च स्मृतिकरणस्य न प्रमाणे परिगणनमिति केचिदाहुः। तत एवं हि संस्काराविषयस्यापि स्मृतौ भाने इदन्तायास्तत्तात्वेन भानकल्पनाया अनुचितत्वात् तथा सति तत्तात्वस्यापि भानापत्तेः। तद्भानस्य चानुव्यवसीयमानत्वेनाप्रामाणिकत्वात् स्मरणसमानसामग्रीप्रसूतायाम्प्रत्यभिज्ञायामिदन्ताया तत्ताभेदारोप इत्यत्र च बीजाभावः। तत्रेदन्ताया पृथक् स्फुरणाद्विशेषदर्शनात्प्रत्यक्षात्मकतत्सामग्रीसत्त्वात् तस्याः पृथक् स्फुरणमिति नारोप इति। न चेदन्तायाः तत्तया प्रत्यभिज्ञानं, संस्कारानुपस्थितायां इन्द्रियायोग्यतया भाने

प्रत्यक्षमात्रे तत्तास्फुरणापत्तेरारोपविषयेदन्तोपस्थित्यर्थमपि तत्र संस्कारानुपयोगात्। अपि च स्मृताविदन्ताया तत्ताभेदारोपे प्रापविषयारोपयोर्ज्ञानत्वेनेदन्तातत्तयोः स्फुरणं स्यात्। न च स्मृतिक्षये भ्रमे विलक्षणैव सामग्री प्रत्यक्षभ्रम एवारोपविषयादिज्ञानस्य कारणत्वात्, अन्यथा भ्रमोत्तरस्मरणेऽपि तदापत्तेरिति वाच्यम, विशेषणज्ञानत्वेन तत्तापरिस्फुरणस्यावश्यं वाच्यत्वात्। नँहि विशेषणज्ञानं विना विशिष्टबोधः, मतान्तरे तु पूर्वानुभवविशेषणज्ञानमिति न कोपि दोष इति।

अत्र चिन्तामणिकृतः—स्मृत्यनुभवयोस्समानविषयत्वानुरोधेन तत्तेदन्तयोरभेद एव। न चैवं स इत्यनुभवोऽयमिति स्मरणं स्यादिति वाच्यम्, अनुभवस्य तत्ताविषयत्वे स्मरणस्येदन्ताविषयत्वे आपाद्यमान इष्टापत्तेः। अनुभवानुत्तरं स इति स्मरणानुत्तरं अयमिति च प्रयोगः स्यात् व्यवहर्तव्यज्ञानस्य वृत्तत्वादिति चेत्, प्रत्यक्षज्ञानस्येदमिति शब्दप्रयोगे संस्कारजज्ञानस्य तदितिशब्दप्रयोगे कारणत्वात्, अत एव प्रत्यभिज्ञाया उभयविधत्वादुभयशाब्दप्रयोगोऽनुभवे संस्कारसत्त्वाभावान्न ततः स इति प्रयोगः,स्मरणस्य प्रत्यक्षत्वाभावान्न ततोऽयमिति प्रयोगः। न च व्यवहर्तव्यज्ञानत्वेन लाघवेन व्यवहारकारणत्वात् घटादिव्यवहारे तथा दर्शनात् कथमत्रेत्थमिति वाच्यम्, प्रत्यक्षादेवायमिति प्रयोगस्य संस्कारसमुत्थादेव स इति प्रयोगस्य दर्शनेनान्वयव्यतिरेकाभ्यामनुभवःमरणयोः समानविषयतयाऽनन्यगत्या च तथा कल्पनात्। स च तत्तेदन्तात्मको धर्मस्समयो वा कल्पं गुणादिरूपं धर्मान्तरं वा न तु तत्त्वान्तरम्। न चैवं स रूपवानयं रूपवानित्यादिः सह प्रयोगो न स्यादिति वाच्यम्। गुणवान् रूपवानित्यादिवद्धर्मभेदेनोपपत्तेः। यद्वा यो धर्मोऽनुभवेन वर्तमानतयाऽवसितः स एव स्मरणेनातीततयाऽध्यवसीयत इति विषयकृत एव स्मरणानुभवयोर्भेदः, एवं च स इति स्मरणे पूर्वानुभवविषयोऽतीतवाचकास्तिसंस्कारस्य धर्मिग्राहकमानेन तथैव सामर्थ्याध्यवसायात्। चिरविनष्टस्यानुभवस्य कालान्तरीयस्मृतिजनकत्वान्यथाऽनुपपत्त्या हि स कल्प्यते, यावता विना स्मृतिर्नोपपद्यते तावत्सामर्थ्यवानेवोपकल्प्यते। तथा च भिन्नाविषयकत्वादेवायमित्यनुभवान्न स इति प्रयोगः, स इति

स्मरणाद्वा नायमिति। अननुभूतातीतांशेपि स्मृतित्वमेव स्मृतेः संस्कारासाधारणकज्ञानत्वस्यैव स्मृतित्वप्रयोजकत्वादित्याहुः ।

वस्तुतस्तु प्रत्यभिज्ञा स्थैर्यसाक्षिणीति सर्वसाक्षिकम्, "स्थैर्यदृष्ट्यो-र्न सन्देहः" इति कुसुमाञ्जलावप्याचार्यलिखनात्। तच्च तस्या एकस्या एकस्य नानाकालसम्बन्धित्वविषयत उपपद्यते। एवञ्च-स एवायं घट इति-अस्या प्रत्यभिज्ञाया पूर्वकालीनाभिन्नएतत्कालीनो घट इत्यर्थः। तथाच पूर्वकालावस्थितत्वमेव तत्ता कालस्य च पूर्वत्वं पूर्वानुभवविषय एव स्मृतौ परिस्फुरति। इदन्ता च वर्तमानकालसम्बन्धः। तथा च प्रत्यभिज्ञयैकस्मिन्धर्मिणि पूर्वापरकालसम्बन्धयोः स्फुटीकरणात् स्थैर्यमुन्मीलति। न चैवं स पूर्वकालीनोपमैतत्कालीन इत्यादिः सह प्रयोगो न स्यादिति वाच्यम्, अभिन्ने भेदभ्रमेण तथाभिधानात्। न च पूर्वकालवैशिष्ट्यस्य वर्तमानकालवैशिष्ट्यस्य वानुमानादिभा परिच्छेदे स इत्ययमिति च प्रयोगः स्यादिति वाच्यम्, कारणविशेषसमुद्भूतयोरेव ज्ञानयोस्तत्प्रयोगहेतुत्वात्। यन्मते तत्तेदन्तयोरभेदः पूर्वधर्मस्यातीतत्वं वा तत्तेदन्तयोरखण्डोपाधित्वं वा पदार्थान्तरत्वं वा तन्मतेऽप्यस्मिन्प्रयोगातिप्रसङ्गस्यैव समाधानस्य वाच्यत्वात्, नहि तत्तेदन्तादयः स्मृतिप्रत्यक्षानुभवयोः परिस्फुरन्तीति वक्तुं शक्यत इति संक्षेपः।

प्राचां मते ईश्वरस्यापि प्रत्यक्षप्रमाणता, तत्रापि द्रव्यत्वैव। अनुमानन्तु व्याप्तिज्ञानमिति चिन्तामणिकृतः। व्याप्तिविशिष्टपक्षधर्मताज्ञानमिति वाचस्पतिमिश्राः। परामृश्यमानालिङ्गमित्याचार्याः। तत्राद्यद्वयं ज्ञानगुण एव,तृतीयन्तु यथायथं धूमादिस्वरूपद्रव्याद्यन्तर्गतमेव। उपमानमपि सादृश्यादिज्ञानमिति चिन्तामणिकृतः। अतिदेशवाक्यार्थस्मरणमिति वाचस्पतिमिश्राः। ज्ञायमानं सादृश्यादीत्याचार्याः। तत्राद्यद्वयं ज्ञानमेव, तृतीयं सादृश्याद्येव सादृश्यं वस्त्वन्तर्भावितमेव। शब्दप्रमाणमपि पदज्ञानमिति चिन्तामणिकृतः। पदार्थस्मरणमिति वाचस्पतिमिश्राः। ज्ञायमानं पदमित्याचार्याः। तत्राद्यं द्वयं ज्ञानमेव,तृतीयं शब्द एव। "आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्" १।१।९। इति प्रमेयविभागसूत्रम्। तत्रात्मशरीरेन्द्रियमनांसि द्रव्याण्येव। "गन्धरसरूपस्पर्शशब्दाः पृथिव्यादिगुणास्तदर्थाः" १।१।१४। इति सूत्रेणा-

र्थाणां गुणत्वं स्पष्टमेव। "बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम्" १।१।१५। इति सूत्रेण बुद्धेर्ज्ञानात्मकत्वकथनात् गुणत्वमेव। "प्रवृत्तिर्वाग्बुद्धिशरीरारम्भ" १।१।१७। इति प्रवृत्तिप्रतिपादकसूत्रस्यायमर्थः—वाक्पदेन वाक्करणं। गृह्यते बुध्यतेऽनेनेति बुद्धिर्मनः। एवं च वाचा मनसा शरीरेणारम्भो निषिद्धविहिताचरणरूपपापपुण्यहेतुः प्रवृत्तिरिति। एवञ्च यदि पापपुण्यहेतुर्मनःप्रभृतीनां व्यापारः प्रवृत्तिस्तदा न वैशेषिकाभिमतपदार्थाद्भेदः। तथाहि-तीर्थादिगमनादिर्हि शारीरो व्यापारो धर्महेतुः। तत्र गमनादीनां कर्मादावन्तर्भावः स्फुट एव। वाचनिकश्चेद् व्यापारः सत्यशब्दादिः स शब्द एवान्तर्भवति। एवं मानसस्यापि हरिस्मरणादेरन्तर्भावो ज्ञातव्यः। एवमधर्महेतूक्तत्रयव्यापाराणामप्यगम्यदेशगमनादि—असत्याभिधानादि—परप्रियास्मरणादीनामन्तर्भावो ज्ञातव्यः। यदि च व्यापारोत्पत्तिः प्रवृत्तिस्तदा साऽऽद्यक्षणसम्बन्धरूपेति न पृथक्पदार्थः। यदि च धर्महेतुक्रियाद्युत्पत्त्यनुगुणमनःप्रभृतीनां व्यापारान्तरं प्रवृत्तिस्तदा न पदार्थान्तरम् आत्ममनःसंयोगादावेवान्तर्भावात्। एवञ्च प्रवृत्तिरपि न पृथक्पदार्थः। दोषास्तु-रागद्वेषमोहाः। ते त्वात्मगुणा एव-रागस्येच्छात्मकत्वात्, मोहस्य ज्ञानात्मकत्वात्, द्वेषस्य स्वतन्त्रात्मगुणत्वादेव। प्रेत्यभावो मरणजन्मनी तयोरन्तर्भावः स्फुट एव मरणस्यात्ममनःसंयोगध्वंसविशेषरूपतयाऽभावेऽन्तर्भावात्, जन्मन उत्पत्तिरूपतयाऽऽद्यक्षणसम्बन्धरूपत्वात् प्रकृतसम्बन्धस्य च स्वरूपसम्बन्धरूपतया क्षणादिरूपत्वात्, क्षणस्य च कर्मादिघटिततया क्लेश एवान्तर्भावात्। फलं तु द्विविधं-मुख्यं गौणञ्च। तत्र मुख्यं-सुखं दुःखञ्च तत्साक्षात्कारो वा धर्मादिना तस्यैव चरमं जननात्। गौणं शरीरपुत्रकलत्रादि तस्य तेन प्रथमं जननात्। एतदुभयं द्रव्यगुणाद्यन्तर्गतमेव। दुःखापवर्गौ तु गुणान्तर्गतावेवं-दुःखस्यात्मगुणत्वात्। अपवर्गस्य तदभावरूपत्वादिति सिद्धः प्रमाणप्रमेययोर्द्रव्याद्यन्तर्भावः। संशयोऽपि ज्ञानान्तर्गततया गुण एव। प्रयोजनन्तु सुखदुःखाभावरूपतया मुख्यं तत्साधनकलत्रादिरूपतया गौणं यथायथं स्पष्टान्तर्भाव एव। दृष्टान्तस्त्वन्वये महानसादिर्व्यतिरेके महाह्रदादिः स यथायथं द्रव्याद्यन्तर्गत एव। शास्त्रार्थाभ्युपगमसिद्धान्तस्तु ज्ञान-

मेव। शब्दात्मकन्यायैकदेशानां प्रतिज्ञाद्यवयवानां शब्दात्मकतया गुण एवान्तर्भावः कथितः। तर्कस्त्वापादकारोपादापाद्यारोपात्मा ज्ञानमेव। निर्णयस्य तु ज्ञानत्वे न कस्यापि विवादः। वादजल्पवितण्डास्तु शब्दात्मककथाप्रभेदतया शब्दान्तर्गततया गुण एव। हेत्वाभासास्तु धूमादौ साध्ये दुष्टा वन्ह्यादयो यथायथं द्रव्याद्यन्तर्गता एव। दोषानां त्वन्तर्भावश्चिन्त्यते—तत्र साधारणत्वं पर्वतो धूमवान् वह्नेरित्यादौ व्याप्यवति साध्यात्यन्ताभाववद्वृत्तित्वम्, इदं चात्यन्ताभावादिघटितं सखण्डोपाधिरेव। असाधारणत्वन्तु सकलसपक्षगतव्याप्यवृत्त्यत्यन्ताभावप्रतियोगित्वं यथा शब्दोऽनित्यः शब्दत्वादित्यादौ शब्दत्वस्य सपक्षे घटादावसत्त्वात्। अयमपि सखण्डोपाधिरेव। न च सखण्डोपाधिर्वैशेषिके, अस्य क्वचित्संयोगादिरूपत्वात् क्वचिच्च स्वरूपसम्बन्धरूपतया प्रकृतविशेषणविशेष्यान्तर्भावात् तेषाञ्च भावादिरूपतया सप्तपदार्थान्तर्भावात्। व्याप्तिग्रहानुकूलैकधर्म्युपसंहाराभावोऽनुपसंहारित्वं यथा सर्वं नित्यं प्रमेयत्वादित्यादौ। अत्र सर्वस्य पक्षतयाऽन्वयेन व्यतिरेकेण वोपसंहाराभावात् क्वचिदपि धर्मिणि साध्यतदभावयोरनिर्णयात्, असावभाव एव। साध्यसहचाराभावो विरुद्धत्वमपबाधभावात्। असिद्धिराश्रयासिद्धिराश्रयाभावेन यथा काञ्चनमयोऽद्रिर्वह्निमान् धूमादिति विशिष्टपक्षीकरणे, अत्र काञ्चनमयत्वविशेषणाभावेन विशिष्टाभावसत्त्वात्। स्वरूपासिद्धिः—पक्षे हेत्वभावेन, यथा जलं वह्निमद्धूमादित्यादौ—जले धूमस्य हेतोरभावात्। व्याप्यत्वासिद्धिर्व्याप्त्यभावात्, यथा द्रव्यत्वादिसाध्ये सत्त्वादिहेतौ। एते चाभावा एव। सत्प्रतिपक्षत्वं प्रतिहेतुरेव यथा शब्दोऽनित्यः कृतकत्वात् शब्दो नित्यो व्यापकैकगुणत्वात् इत्यादौ। तस्य च द्रव्याद्यन्तर्भाव एव, प्रकृतहेत्वोरपि सखण्डोपाधितयोक्तनियमेन द्रव्यादिष्वेवान्तर्भावात्। बाधः—पक्षे साध्याभावः तत्प्रमा वा कल्पान्तर्गत एव आद्यस्याभावत्वात्, द्वितीयस्य ज्ञानतया गुणत्वात्। एवञ्च हेत्वाभासा अपि कल्पान्तर्गता एव। छलजाती तु शब्द एवान्तर्गते—निरनुयोग इति सूत्रात् अतियोगकथनमित्यर्थात्। कथं? स हि तत्प्रातिपादकशब्दप्रयोगो यदि तदा प्रयोगपूर्वान्तर्भावः प्रयुज्यमानः शब्दप्रयोगोऽपि शब्द एवेति। तत्र प्रतिज्ञाहानिः शब्द एव। स्वनिर्घाह्यनिर्देशविरोधिवाक्यम्प्र-

तिज्ञाहानिः इति तल्लक्षणकरणात् । शब्दोऽनित्यः ऐन्द्रियकत्वात् घटवदित्युक्ते सामान्येन व्यभिचाराभिधानेऽस्तु तर्हि शब्दो नित्य इत्यादेः शब्दस्य प्रतिज्ञाहानित्वेनोदाहर्तव्यत्वात् । अत्र स्वनिर्घाह्यशब्दानित्यत्वनिर्देशविरोधिनो वाक्यस्य सत्त्वात् । प्रतिज्ञान्तरमपि शब्द एव परोक्तदोषोद्धाराय पूर्वानुक्तविशेषणवतो हेत्वन्यपूर्वोक्तस्य वचनं प्रतिज्ञान्तरमिति तल्लक्षणकरणात् । प्रतिज्ञाविरोधस्त्वेकवक्तृकवाक्यांशयोर्विरोध एव । विरोधस्तु विचार्यमाणो न परिगणितभावाभावाभ्यां भिन्नो भवितु मर्हति । यदि च विरुद्धार्थौ एकवक्तृकवाक्यांशौ प्रतिज्ञाविरोधस्तदा शब्द एवान्तर्भावः, अन्यथा विरुद्धार्थैकवक्तृकवाक्यांशत्वमखण्डोपाधिरेव । तत्रार्थयोर्विरोधः सहानवस्थाननियमः, अनवस्थानमनवस्थानाभावोऽभावान्तर्गत एव । एवमन्येप्येतद्घटकाः पदार्थाः कल्प्त एवान्तर्भावनीयाः । उक्तापह्नववचनं प्रतिज्ञासंन्यासोऽपि शब्द एव वचनत्वात् पूर्वप्रयोजकवचनात्। अन्यादृशम्प्रयोजकवचनं हेत्वन्तरमपि शब्द एव । शब्दोऽनित्य ऐन्द्रियकत्वादित्यत्र सामान्येन व्यभिचाराभिधाने सामान्यवत्त्वे सत्यैन्द्रियकत्वादिति हेत्वन्तरस्य शब्दान्तर्भावस्य स्फुटत्वात् । वादाद्यनाकांक्षितवाक्यमर्थान्तरमपि शब्दः। अर्थशून्यशब्दस्य निरर्थकस्यापि शब्द एवान्तर्भावः । अवहिताविकलपरिषत्प्रतिवादिबोधानुगुणार्थोपस्थित्यजनकवाचकपदप्रयोगोऽविज्ञातार्थमपि विनिगमनाविरहेण शब्दप्रयोगयोरेवान्तर्गतम्। शब्दप्रयोगस्य तु शब्दोत्पत्तिलक्षणस्यापि शब्द एवान्तर्भावः। कथायां स्वसिद्धान्तवक्तव्यत्वाभिमतानभिधा न्यूनत्वमभाव एव,यदि च स्वसिद्धान्ते किञ्चिद्वक्तव्यरहितः शब्दो न्यूनत्वन्तदा शब्द एव । अपुनरुक्तकृतकर्तव्यशब्दात्मकमधिकमपि शब्द एव । प्रयोजनं विना प्राप्तप्रापकः शब्दः पुनरुक्तमपि शब्द एव । अनुवादयोग्यकाले तद्विरोधिव्यापारोऽननुभाषणमपि कल्पितान्तर्गतमेव तद्विरोधिनो व्यापारस्य कल्प्त एवान्तर्भावात् । यदि वाऽननुभाषणमनुभाषणाभाव एव तदाऽभाव एवान्तर्भावः । यदि च सर्वनाम्नाऽनुवाद एकदेशेनानुवादोऽधिकस्यानुवादः केवलदूषणोक्तिस्स यश्चानुभाषणविरोधी व्यापारोऽननुभाषणं, तदाऽऽद्यानाञ्चतुर्णां शब्द एवान्तर्भावः । अन्त्यस्य मूकभावस्य शब्दप्रयोक्तृत्वलक्षणत्वलक्षणस्याभाव एवान्तर्भावः ।

अज्ञानन्तु निग्रहस्थानं न ज्ञानाभावः—परनिष्ठस्य ज्ञानाभावस्य ज्ञातुमशक्यत्वात्, किन्त्वज्ञानप्रतिपादकं न जानामीत्याद्याकारकं वचनमेवाज्ञानं, तथा चाज्ञानस्यापि शब्द एवान्तर्भावः। परिषदा विज्ञातस्य वादिना त्रिरभिहितस्याप्यविज्ञानवचनमज्ञानमिति हि तल्लक्षणात् तथाच शब्दान्तर्भावस्य स्फुटत्वात्। उत्तरावसरे उत्तरविषयाज्ञानोद्भावकत्वव्यापारोऽप्रतिभा। स च श्लोकपाठमूकीभावखसूचनादिः तस्य च कल्प एवान्तर्भावः स्फुट एव। न हि श्लोकपाठादयः पदार्थान्तरमिति कस्यापि चेतसि चेष्टते श्लोकपाठस्य श्लोकोत्पत्तिरूपत्वात् मूकीभावस्य शब्दोच्चारयितृत्वाभावरूपत्वात् खसूत्रनादेश्च प्रदर्शनादिरूपत्वात्। कार्यव्यासङ्गमपादिश्य प्रवृत्तकथायाः कालान्तरानयनं विक्षेपः। यथा ममेदानीं किञ्चित्कृत्यमस्ति कालान्तरे कथान्तरे कथा कार्या इति हि विक्षेपस्वरूपम्। तत्र कथायाः अकरणमेव पर्यवस्यति, अकरणञ्च करणाभाव इत्यभावान्तर्भावो विक्षेपस्य। अपरोक्तदोषं स्वमतेऽनुद्भाराभ्युपगमस्यैवानिष्टस्य प्रसञ्जनं मतानुज्ञा। तत्र प्रसञ्जनं यदि त्वय्यपीदमनिष्टमस्तीति वचनन्तदा शब्द एवान्तर्भावः। अन्यत्तु विचार्यमाणं नायात्येव। आपन्ननिग्रहस्थानस्य तदनुद्भावनं पर्यनुयोज्योपेक्षणं त्वभाव एव। निरनुयोज्यानुयोगस्य तु शब्दान्तर्भावः प्रागेव कथितः। स्वसिद्धान्तव्याघातकशब्दोऽपसिद्धान्तोपि शब्द एव। हेत्वाभासान्तर्भावस्तु कथित एव। एवञ्च नाक्षपरिगणिताः पदार्था कणादगणितात्पदार्थान्तरम्। एतावांस्तु तयोर्भेदो यत्कणादस्य द्रव्यत्वादिना तत्त्वज्ञानं मोक्षजनकं गौतमस्य तु प्रमाणत्वादिनेति। अन्यत्र शोडषगोतमोक्तात्पदार्थात्केचित्कणादपरिगणिता अतिरिच्यन्ते उक्तप्रकारेणोपदर्शितेषु प्रमाणादिषु घटादीनामन्तर्भावात्,तत्र चाभ्युपगमसिद्धान्त एव शरणम्। यद्वा फलस्य सुखदुःखतत्साधनरूपतया घटादीनां तदन्तर्भाव एव घटादीनां सुखादिसाधनत्वात। एवञ्च दृष्टान्तहेत्वाभासयोरपि घटादीनां यथायथमन्तर्भाव ऊहनीयः। क्वचित्साध्ये घटादीनां दृष्टान्तत्वात् क्वचिद्द्रव्यमिश्चार्थादित्वादिति संक्षेपः।

द्रव्यगुणकर्मसामान्यानि चत्वार एव पदार्था इति तौतातिताः। तत्र विशेषादीनामपि साधितत्वात्।

(से०) यत्तु द्रव्यगुणकर्मसामान्यसंख्यासमवायसादृश्यशक्तयोऽष्टौपदार्था इति। तदप्यभासुरम्। विशेषस्य साधितत्वात् संख्यादीनाञ्चान्तर्भावितत्वात्।

द्रव्यगुणकर्मसामान्यसंख्यासमवायसादृश्यशक्तिक्रमोपकारसंस्कारा एकादश पदार्था इति प्राभाकरैकदेशी चन्द्रः। तत्र क्रमो हि पूर्वापरीभावः। स च कालगर्भो धर्मविशेष एवेति न पदार्थान्तरम्। उपकारो ह्येकसहकारिजनितः सहकार्यन्तरे वाच्यः। न च सहकारिणो परस्परमुपकार्योपकारकभावनियमः, उपकारस्यापि सहकारितयोपकारपरम्परायामनवस्थानात्। दण्डादिनोपकृताश्चक्रादयो घटादीन् जनयन्तीति चेत्, तत्र भ्रम्यादीनामेवोपकारकत्वात्, तेषाञ्च कुलालान्तर्भावात्। संस्कारोऽपि कांस्यादौ भस्मादिना वाच्यः। न तत्र प्रमाणमदृष्टेनैवान्यथासिद्धेः।

चन्द्रोक्ता एकादश औपाधिकश्चापर इति द्वादश पदार्था इति महार्णवकारः। तदप्यकल्पम्। औपाधिकं हि विशेषणरूपोपाधिघटितत्वाद्विशिष्टं वाच्यम्। न च विशिष्टं पदार्थान्तरमित्यावेदितम्।

पञ्च ज्ञानेन्द्रियाणि वाक्पाणिपादपायूपस्थाख्यानि पञ्च कर्मेन्द्रियाणि पञ्च महाभूतानीति पञ्चविंशतिसंख्यया तत्त्वमाहुः। तदिदङ्कणादो न वेद-अदृष्टादिभिन्नायां प्रकृतौ मानाभावात् महदहङ्कारयोरात्मातिरेकिणोरभावात्। आकाशादिजनकानां शब्दादितन्मात्राणामप्रामाणिकत्वात्, कर्मेन्द्रियेषु मानाभावाच्चेति।

कार्यकारणयोगविधिदुःखान्ताः पञ्च पदार्था इति पाशुपताः। तत्र कार्यकारणे घटादि-दण्डादि। योगो निदिध्यासनम्। विधिर्विधायकः शब्दः। दुःखान्तो दुःखनाशः। एते च कणादकथितानुगृहीता एव। आत्मैव पारमार्थिकतत्त्वम्। अन्ये तु व्यावहारिका व्यवहारानुसारेण गणनीया इत्युपणिपतिपगरिष्ठा(?)तत्कणादमुनिनाऽन्येषामपि द्रव्यादीनामभावान्तानाम्प्रामाणिकत्वादुपेक्षितम्।

पृथिव्यप्तेजोवायवश्चत्वार एव प्रत्यक्षविषयाः पदार्था इति चार्वाकमतमचतुरम-वायोरप्रत्यक्षत्वात्। अनुमानादीनामपि प्रमाणत्वेन तत्प्रमेयस्यापि स्वीकार्यत्वात्। शब्दान्धकारयोरपि द्रव्यत्वमाहुः।

प्राभाकरास्तु द्रव्ये कणादानुयायिन एव। तत्रान्धकारस्य द्रव्यत्वमपाकृतमेव। शब्दस्य तु शब्दो न द्रव्यं श्रोत्रग्राह्यत्वादित्यादिन्यायेना-

(से०)पाकरणीयम्। भट्टाभिमतेषु द्रव्येष्वाकाशकालदिशां न द्रव्यत्वमित्यष्टौद्रव्याणीति वृत्तिः। तदाकाशादीनां द्रव्यत्वप्रसाधनेनापसारणीयम् । कणादोक्तेषु गुणेषु संख्याविभागपृथक्त्वद्वेषानपास्य वेगेन सहैकविंशतिर्गुणा इति प्राभाकराः । तत्संख्यादीनां गुणत्वसाधनेन वेगस्य संस्कारान्तर्भावेनापाकरणीयम् । वैशेषिकोक्ता एव गुणाः शब्दवर्जिताश्शब्दगुणनादसहिताश्चतुर्विंशतिरिति । तच्छब्दस्य गुणत्वेन शब्दविशेषध्वन्यतिरिक्तस्य नादस्य प्रमाणाभावेन च व्युदसनीयम् । परत्वापरत्वपृथक्त्वधर्माधर्मविभागशब्दवर्जितास्तादात्म्यनादसहिता विंशतिर्गुणा इत्यौपनिषदः । तत्तादात्म्यस्य तद्वृत्त्यसाधारणधर्मरूपतया वृत्तेरन्तःकरणपरिणामस्याप्रामाणिकतया भूतलादौ घटादिवृत्तेस्तत्र घटावस्थितिरूपतया चानालोचनीयम् ।

पञ्चस्कन्धात्मकं जगत्त्रयम् । गवादिर्विषयो रूपस्कन्धः(१) सुखदुःखे वेदनास्कन्धः(२) गवादीनां विषयाणां नामानि संज्ञास्कंधो(३) रागद्वेषमोहाः संस्कारस्कंधाः(४) विषयोपलंभो ज्ञानस्कन्धः(५)इति बौद्धमतम् । एतेऽपि पदार्था न कणादमतमतिक्रामन्ति गवादीनां द्रव्यादावेवान्तर्भावात् । संज्ञाभेदमात्रस्य स्वतन्त्रेच्छत्वेन करणात् ।

गन्धरसरूपस्पर्शशब्दात्मकमेव जगत् । तत्र पञ्चानामेषां सङ्घातः पृथिवी-गन्धवर्जानां जलं-गन्धरसवर्जानां तेजो-गन्धरूपरसवर्जानां संघातो वायुः।रूपादिपरिमाणुसंघात एवावयवी।ज्ञानविषययोश्चाभेदो वेदान्तिनां ब्रह्माद्वैतस्येवास्माकं ज्ञानाद्वैतस्य सत्त्वादिति सौगतमतम्। तन्न अन्येषामप्याकाशादीनां तत्त्वानां सत्त्वेन नियमस्य निर्मूलत्वात् ज्ञानज्ञेययोश्च भेदस्य प्रामाणिकत्वात् ।

ज्ञानविषयौ द्वावेव पदार्थौ इति सौगतैकदेशिनौ वैभाषिकसौत्रान्तिकौ । तत्र यदि विषया द्रव्यादयः सप्त तदा तयोरपि कणादानुगतिरेव-तैरपि विषयाणां द्रव्यादीनां विषयिणो ज्ञानस्य च स्वीकारात् । यदि च सौगतमतोक्ता एव विषयास्तदा प्रागुक्तमेव दूषणम् ।

योगाचारस्तु सौगतैकदेशी ज्ञानमेव पारमार्थिकं बाह्यमलीकमेवेत्याह । तद्द्रव्यादीनां पारमार्थिकत्वेन बाधनीयम् ।

माध्यमिकास्तु तदेकदेशिनो ज्ञानमप्यनिच्छन्तः शून्यमेव जगदाहुः । ते तु नानाप्रमाणसिद्धानामप्यर्थानां प्रदर्शनेनोद्भासनीयाः ।

(से०)दुःखं समुदायो क्षणिकता निरोध इति चतुष्टयमिति।तत्र फलं दुःखं हेतुस्समुदायः क्षणिकता साक्षात्कारो मार्गोऽनादिश्चित्तस्य क्लेशशून्यता निरोध इति केचित्-अवैदिकाः। तत्र फलहेत्वोर्द्रव्यादिष्वेवान्तर्भावः । साक्षात्कारस्तु ज्ञानमेव,क्षणिकतायां परं विसंमतिः। क्लेशशून्यता त्वभाव एवेति न पदार्थान्तरं कणादस्वीकृतादायाति । पाखण्डमते च सोमाभिधातः (?) ते च चार्वाककाथिता एव पदार्थाः । तत्र चोक्तमेव ।

दिगम्बरास्तु-जीवाजीवास्रवसंवरनिर्जराबन्धमोक्षात्मकान् सप्त पदार्थानाहुः । तत्र जीवो ज्ञानमजीवो घटादिः शुभाशुभकर्मद्वाररूपश्चाऽऽस्रवस्ततो हि कार्यं स्रुतमिव भवति। संवरस्समाधिः। केशोल्लुञ्चनादिव्रतनियमो निर्जरा । बन्धः संसारः शरीरावरणरूपः । तदत्ययो मोक्षः। न चैते पदार्था कणादकथितात् पृथक्भूताः । दिगम्बरभेदा एव क्षपणकश्वेताम्बराहतनीलांबररक्ताम्बरचर्माम्बरबर्हाम्बरादय इति, नैतेषां पृथक्पदार्थविभागो न वाऽस्माकं तद्दूषणोद्योगः ॥

(व्यो०)अथायुतसिद्धानामित्यादिना समवाये प्रतिज्ञां करोति । समवायः परमार्थसत् पूर्वोक्तादेव साधनादिति लक्षणमुच्यते । इहप्रत्ययहेतुत्वमन्तरालादर्शनस्यापीति सम्बन्धग्रहणम् । तथाहि-दुराद्ग्रामारामयोरन्तरालमपश्यतामिह ग्रामे वृक्षा इति ज्ञानं दृष्टम् । तथाप्याकाशशकुनिसम्बन्धेन व्यभिचारः । तदिहप्रत्ययहेतुः सम्बन्धश्चेति । तथापीहाकाशे शकुनिरिति ज्ञानं दृष्टम् । तद्व्यवच्छेदार्थमाधार्याधारग्रहणम्। न चाकाशस्याधारत्वमाधेयत्वम् च-अधरोत्तरभावस्याभावात् । यत्र हि संयोगिद्रव्येष्वधरोत्तरभावः तत्रैवाधाराधेयभावः कुण्डबदरादावुपलब्धस्तदभावश्चाकाशे । तस्य व्यापकत्वेन शकुनिं व्याप्य सद्भावात् । अथाकाशस्यातीन्द्रियत्वादिहेति ज्ञानं न स्यात्—तस्य ह्यपरोक्षेष्वेव भावात् । तदसत् । अतीन्द्रियेष्याकाशे इहेति ज्ञानं केवलं भ्रान्तं तस्य व्यवच्छेदार्थमुपपन्नमाधार्याधारपदम् । इष्टं च भ्रान्तेहज्ञानस्य व्यवच्छेदार्थं सम्बन्धपदम्।अन्ये त्वस्य चोद्यस्य परिहारार्थमासमन्तात्काशन्तेत्याकाशं वर्तत इत्युपचारेणाकांक्षा स्मयोभिदीयन्ते(?)।ते च प्रत्यक्षं इत्युपपन्नमिहाकाशे शकुनिरिति ज्ञानमिति मन्यन्ते। तच्चासत्।

(व्यो०)मुख्यसद्भावेप्युपचारकल्पनायामतिप्रसङ्गात्। एवञ्चातीन्द्रियेष्वाकाशे परोक्षज्ञानं भ्रान्तं तद्व्यवच्छेदार्थं विशेषणम् इति मूर्तद्रव्याभावेन चाकाशेन संबंधाभाव एवेति।तथाप्याधार्याधारभूतानां यस्सम्बन्ध इहप्रत्ययहेतुः स समवाय इत्युक्ते कुण्डबदरसंबंधेन व्यभिचारः,तदर्थमयुतसिद्धानां पदम्। युतसिद्धिर्वक्ष्यमाणा सा विद्यते येषां ते युतसिद्धाः, तन्निषेधेन चायुतसिद्धास्तेषामिति। तथाप्ययुतसिद्धानां यस्सम्बन्धस्स समवाय इत्युक्ते व्यभिचाराभावः। तन्न। वाच्यवाचकभावेन च व्यभिचारात्। तथा ह्याकाशमहत्त्वमाकाशे समवेतं तद्वाचकश्च शब्दस्तत्रैवेत्ययुतसिद्धत्वम्। एवमिच्छाद्यालम्बनं विज्ञानमात्मनि समवेतमिच्छाद्यश्च तत्रैवेत्ययुतसिद्धत्वे सत्येषां विषयविषयिभाव इत्यनयोर्व्यवच्छेदार्थमाधार्याधारपदम। न चात्राकाशमहत्त्वशब्दस्तन्महत्त्वाधारः, नापीच्छाद्यालम्बनविज्ञानं तदाधारमिति। नन्वेवमप्याभ्यामेव व्यभिचारः, तथाह्ययुतसिद्धानामाधार्याधारभूतानां यस्सम्बन्धः स समवाय इत्युक्तेपि वाच्यवाचकभावविषयविषयिभावाभ्यामेव व्यभिचारः। तथा चाकाशशब्देन आकाशमभिधीयत इत्यनयोराधार्याधारयोरभावे सति वाच्यवाचकभावः।न चास्ति युतसिद्धिः।एवमात्मालम्बनमहमितिज्ञानमात्मन्येवेत्ययुतसिद्धत्वे सत्याधार्याधारभूतयोरस्ति विषयविषयीभाव इति, तद्व्यवच्छेदार्थमवधारणम्—आधार्याधारभूतानामेव यः सम्बन्धः स समवाय इति। वाच्यवाचकविषयविषयिभावयोश्चाधार्याधारभूतेषु तद्विपरीतेषु च सद्भाव इति व्यवच्छदः। नन्वेवमयुतसिद्धानामिति व्यर्थमेव। न, अस्यापि सावधारणस्य लक्षणान्तरत्वात्। तथा ह्ययुतसिद्धानामिव यः सम्बन्धः स समवाय इति, वाच्यवाचकविषयविषयिभावौ तु युतसिद्धानामयुतसिद्धानां स्त इति। अत्र केचिदसद्दूषणमुद्भावयन्ति। समवायासिद्धौ युतेष्वाश्रयेषु समवायो न युतसिद्धिः सा विद्यते चैषाम्। तेन युतसिद्धास्तत्प्रतिषेधेन चायुतसिद्धानामभावे न समवाय इति। एतच्चासद्दूषणम्। लक्षणस्य विद्यमानव्यवच्छेकत्वात्। यदि ह्यविद्यमानं लक्षणेनोत्पाद्येत भवेदेतद्दूषणमयुतसिद्धानामिति लक्षणेन समवायकरणे युतसिद्धानामभावे नायुतसिद्धानामभाव इति लक्षणसंभव इति। न चैतल्लक्षणस्य ज्ञापकत्वादिति। तथायुतसिद्धानामेवाधार्याधारभूतानामेव यः

(व्यो०)सम्बन्धः ससमवायः,इति लक्षणद्वयपरिसमाप्तावेहप्रत्ययहेतुरिति व्यर्थम् । न । परीक्षार्थत्वात् । तथाहि तन्तुषु पट इत्यादीहप्रत्ययः सम्बन्धकार्यः अबाध्यमानेहप्रत्ययत्वात् । यो योऽबाध्यमानेहप्रत्ययः स सम्बन्धकार्यः । यथेह कुण्डे दधीति जुहुयात्तथाचायमबाध्यमानेहप्रत्ययः तस्मात्सम्बन्धकार्य इति । न चात्र समवायपूर्वकत्वं साध्यते । दृष्टान्तस्य साध्यविकलताप्रसङ्गात् । नापि संयोगपूर्वकत्वम् । किन्तर्हि सम्बधमात्रकार्यत्वम् । स च संयोगादिविलक्षणत्वात्समवाय एवेति वक्ष्यामः-तत्परीक्षायामित्यलमतिविस्तरेण ॥

(भा०)एवं धर्मैर्विना धर्मिणामुद्देशः कृत इति ॥

(सू०) उपसंहरति एवमिति । द्रव्यत्वाद्यवच्छिन्नधर्मिणामितरभेदकधर्मैर्विना उद्देशो द्रव्यादिपदेनोल्लेखः कृतः । द्रव्यत्वादीनान्तु पक्षतावच्छेदकत्वेनापेक्षयोल्लेखावच्छिन्नेष्वितरभेदकत्वमतस्तेषामुद्दिष्टत्वेऽपि न क्षतिरित्यभिप्रायः ॥

(से०) अमुना प्रकारेण पदार्थानां सप्तस्वन्तर्भावमभिप्रेत्य भाष्यकृदप्याह एवमिति । धर्मा नोद्दिष्टा धर्मिणस्तूद्दिष्टा एवेति वदतः प्रकृतधर्मातिरिक्ता धर्मिणो न सन्तीति स्फुटोऽभिप्रायः प्रतीयत इति दिक् ।

भाष्याम्भोनिधिसेतौ वीरवरीये यशोहेतौ ॥
प्रथमो विभागभागो रचितः श्रीपद्मनाभेन ॥ १ ॥

यद्दानवारिणा दानवारिणेव निरापदः ।
विबुधा रचिता, भाति स च वीरवरः पतिः ॥ २ ॥

व्यो० । एवं द्रव्यादिषु पदार्थेषूक्तेषु सामान्यविशेषसमवायानां लक्षणपरीक्षाश्रवणादन्तेवासिनः प्राक्तनं प्रकरणं किमुद्देशपरं लक्षणपरं वेति संशये सति तन्निरासार्थं उपसंहारवाक्यम् ।

प्रधानतया प्राधान्यम् । तस्य सर्वत्रोद्देशविधानात् । उद्देशस्तु संज्ञामात्रेण पदार्थाभिधानमिति । लक्षणपरीक्षयोश्च सामान्यादिष्वेव भावादनुषङ्गतोऽभिधानमिति । यदि वा द्रव्यादिपदा-

(व्यो०)र्थपरिज्ञानात् निःश्रेयसमिति मत्वा प्रवृत्तस्तदुद्देशपरिज्ञानमा-त्रान्निःश्रेयसालाभ इति प्रतारकतां मन्यमानः श्रवणादन्तेवासी मा व्यावर्ततामिति,तदाश्वासनार्थं वाक्यमेवम्-धर्मैर्विना धर्मिणां केव-लानामुद्देशः कृतो'न लक्षणं नापि परीक्षा। तत्तद्वारेण साधर्म्यवैधर्म्य-परिज्ञानं श्रौतमुपजातमभ्यासवशात् आत्मन्यशेषविशेषालिङ्गिते विज्ञानमपरोक्षं कुर्वन्निःश्रेयसमुपजनयतीति। ननु षडेव पदार्था इत्यवधारणाभ्युपगमे धर्माणां व्यतिरेकासम्भवात् कथमास्तित्वा-दिभिर्विना धर्मिणामुद्देशः कृत इति। न, अवधारणस्य धर्मिविषय-त्वाभ्युपगमात्, तन्न। अस्तित्वादयोपि स्वाधिकरणधर्मापेक्षया धर्मिण एवेति, तदपेक्षयापि व्याहतमवधारणम्। तथाह्यस्तित्व-मभिधीयमानत्वादभिधेयत्वाधिकरणमेवमभिधेयत्वमस्तित्वाधिकर-णमित्यादि योज्यम्। अथासाधारणधर्माधिकरणत्वेनावधारणम-र्थवत्। तदसत्। अस्तित्वादेरप्यसाधारणधर्माधिकरणत्वात्। तथा ह्यस्तित्वमभिधेयत्वाद्भिद्यते इति। न चासाधारणधर्मं-पर्कं विना व्यावृत्तिर्घटत इति, असाधारणधर्माधिकरणत्वेनाव-धारणासंभवः। नैतदेवम। 'क्रियावत् गुणवत् समवायिकारणमिति (अ. १ आ. १ सू. १५) द्रव्यलक्षणमयोगान्ययोगव्यवच्छेदेन द्र-व्याश्रितत्वं गुणानां तथा क्षणिकत्वे सति नियमेन मूर्तद्रव्यवृत्तित्वं कर्मणां नित्यत्वैकत्वे सति समवायेनानेकवर्तमानत्वं सामान्यस्यायो-गान्ययोगव्यवच्छेदेन नित्येष्वेव वर्तमानत्वं विशेषाणां नियमे-नायुतसिद्धसम्बन्धत्वं समवायस्येत्येवं धर्माधिकारिणः षडेवेत्यव-धारणेप्यदोषः। अथ व्यतिरिक्तानामियत्ताऽसंभवादसंख्यातत्वेन तत्त्वज्ञानाविषयत्वमिति चेत्। न पृथिव्यामिवानन्त्येप्येकस्य निमित्त-स्योपग्रहात्तत्त्वज्ञानविषयत्वमिति। निमित्तं तु तत्र पृथिव्यां पृथि-वीत्वं धर्मेषु धर्मरूपतेति। अथ धर्मेषु नित्यत्वमुतानित्यत्वमिति चेत्। नित्यत्वेऽपि धर्मिविनाशे सत्तावदवस्थानाभ्युपगमाद्-दोषः। अनित्यत्वेऽपि द्रव्यस्यैव समवायिकारणत्वात् गुणादिषु नोत्पत्त्यभावो विनाशवत्, निमित्तकारणादेवोत्पत्त्यभ्युपगमात्। तथाहि—द्रव्यगुणकर्मात्मकं कार्यं समवाय्यादिकारणेभ्यो नि-ष्पाद्यमानं दृष्टम्, विपरीतं तु निमित्तादेव, तथाच धर्माः निमित्तादेवोत्पद्यन्ते द्रव्यगुणकर्मव्यतिरेकिकार्यत्वात्। यद्य-

(व्यो०) द्रव्यगुणकर्मव्यतिरेकि कार्यं तत्तन्निमित्तकारणादेवोत्पद्यमानं दृष्टम्।यथा विनाशः।तथा च धर्माः द्रव्यगुणकर्मव्यतिरेकिकार्यास्तथा निमित्तकारणादेवोत्पद्यन्ते। उत्पत्तिधर्माणां चानित्यत्वं दृष्टमित्यस्तित्वादयोऽप्यनित्या इति। अस्तित्वं चास्तीति प्रत्ययनिमित्तं येन स नास्तीति प्रत्ययो भवतीति। अभिधेयत्वं वा अभिधेयप्रत्ययकारणमित्यादि सर्वत्र योज्यम्। अव्यतिरेके तु व्यतिरिक्तैधर्मैर्विना धर्मिणामुद्देशः कृत इति व्याख्यानम्। व्यतिरेके बाधकप्रमाणोपपत्तेर्व्यतिरिक्तेति विशेषणम् सामर्थ्यालभ्यते एव। तथाह्यवधारणानुपपत्तिर्व्यतिरेकपक्षे। अथोक्तम्—विशिष्टधर्माधिकरणत्वेनावधारणं विवक्षितमिति। तन्न। उक्तलक्षणानां षडेव पदार्था इत्यवधारणे साधारणधर्माधिकरणानां पदार्थान्तराणामपरिसंख्यातत्वात्तत्त्वज्ञानासम्भव एव। तत्त्वज्ञानार्थं चावधारणम्। न च पदार्थान्तराणामज्ञेयत्वम्। सर्वस्य भावप्रपञ्चस्य ज्ञेयतयोपक्षेपात्तेषु च सामान्यविशेषरूपतया तत्त्वज्ञानं कार्यम्। सामान्यं भावरूपता विशेषस्तु द्रव्यादिवल्लक्षणयोगस्तदातिरक्तेषु च पदार्थेषु सामान्यता ज्ञान न विशेषत इति। अथ द्रव्यादिलक्षणवद्धर्मरूपताविशेषस्य सद्भावविशेषणापि तत्त्वज्ञानविषयत्वमिति चेत्। तर्हि पदार्थान्तरसद्भावेऽपि नियतलक्षणापेक्षयावधारणाभ्युपगमे षडेवेत्यपि न वाच्यम्। समवायसद्भावेपि पूर्वलक्षणापेक्षया पञ्चैवेति स्यात्। एवमुत्तरोत्तरपदार्थसद्भावेपि पूर्वपूर्वलक्षणापेक्षयावधारणाभ्युपगमे सत्येक एव पदार्थः स्यात्। तथाहि द्रव्यलक्षणयोगे एक एव पदार्थो नान्यस्तस्य हि द्रव्यलक्षणयोगित्वे द्रव्य एवान्तर्भावात्। अथ गुणादिषु विभिन्नलक्षणसम्बन्धिषु तत्त्वज्ञानाभावप्रसंगात् नैवमवधारणम्। एवं तर्हि धर्मेषु षड्लक्षणालक्षितेषु तत्त्वज्ञानाभावप्रसङ्गात्, षडेवेत्यवधारणमन्याय्यम्। प्रतिज्ञातं च पदार्थेषु साधर्म्यवैधर्म्यप्रतिज्ञानम्। तथा धर्मरूपतायाः सकलभेदाव्यापितया न धर्मेषु तत्त्वज्ञानम्। तथाहि-धर्मरूपतायां किमन्या धर्मरूपतास्त्युत नास्तीति?सद्भावे तस्यामन्याभिधेयतेत्यनवस्थायां धर्मरूपतायाश्चानेकत्वादेकस्य निमित्तस्योपग्राहकस्याभावान्न धर्मेषु तत्त्वज्ञानं स्यात्। न च पृथिवीत्वं विनाऽनुगताकारं धर्मेषु सामान्यमस्तीति। धर्मो धर्म इत्यनुगतज्ञानस्यासंवेदनात्। यदि चानुगताकाराऽशेषधर्मव्यापिका धर्मरूपता तस्यास्तर्हि सामान्य-

(व्यो०)रूपत्वात्तद्योगितया धर्माणां द्रव्यादिष्वेवान्तर्भावः।द्रव्यादित्रयस्यसामान्यविशेषवत्त्वाभिधानात्। न च धर्मत्वस्य सामान्यलक्षणयोगित्वे सामान्याद्व्यतिरेकः सिद्धयति द्रव्यत्वादेरपि व्यतिरेकप्रसङ्गात्। तथा धर्मरूपतायाश्चाधर्मत्वायोगेन धर्मेष्वन्तर्भावासंभवादिति पदार्थान्तरत्वं स्यात्। यथा चास्तित्वादिषु धर्मरूपत्वं तथा धर्मत्वेप्यन्येऽस्तित्वादयस्तेषु चाप्यन्यद्धर्मत्वमित्यनवस्थां नातिवर्तते। अथ यदेव धर्मत्वमस्तित्वादेराधेयं तदेवान्येषामाधारस्तदाधेयश्चेति। न युक्तमेतत्। एकस्मिन्काले यद्यस्याधारस्तस्यैवाधेयमित्यनुपलंभात्तथास्तित्वादेरप्येकस्य निमित्तस्यानेकत्रानुवृत्तौ सामान्यान्तर्भावस्तल्लक्षणयोगित्वात्। यदि चैकं नित्यमस्तित्वं सर्वत्र पदार्थेष्वस्तीति प्रत्ययजनकं स्यात्। किं सत्तया स्वरूपसत्त्वेन वा ? अथानेकं पदार्थमस्तित्वाभिधयेत्वादिति चेत्। न तर्हि धर्मिविनाशेऽपि सत्तावदवस्थानम्। तथाह्येकाश्रयविनाशेपि एकतया सत्तायाः पदार्थान्तरेऽपि सत्त्वादिति, प्रत्ययजनकत्वेनावस्थानम्। धर्माणां तु प्रतिपदार्थनियतत्वादाश्रयान्तरेस्तीति प्रत्ययजनकोऽन्य एव धर्म इति नाश्रयविनाशेप्यवस्थाने प्रमाणमस्तीति। अथ द्रव्यस्यैव समवायिकारणत्वेन गुणादिषूत्पत्तिकारणाभावादाश्रयाविनाशेप्यवस्थानमिति चेत्। एवं तर्हि द्रव्येष्वनित्यं गुणादिषु च नित्यमिति स्यात। इष्यत एवेति चेत्। तर्हि विनाशवन्निमित्तकारणादेवोत्पद्यन्तेऽस्तित्वादय इति व्याहतमेतत्। तथास्तित्वादेः प्रतिपदार्थनियतत्वेनानन्त्यात् तेष्वेवास्तीत्याद्यभिन्नव्यवहारदर्शनात, एकमस्तित्वेष्वस्तित्वमाभिधेयत्वेष्वभिधेयत्वम्, तत्राप्यन्येस्तित्वादय इति प्राक्तनमेव दूषणमभ्यूह्यम्। न चास्तित्वादेर्नियतधर्मिसम्बन्धाभावे व्यपदेशनियमोऽस्यायं धर्म इति घटते। अथास्तित्वसम्बन्धः यदि समवायः ? तर्हि धर्माणां समवायतया द्रव्यादिष्वन्तर्भावो-द्रव्यादीनां पञ्चानां समवायित्ववचनात्। यद्यन्यः सम्बन्धो धर्मात्मकस्तस्याप्ययुतसिद्धसम्बन्धत्वे कथं समवायाद्व्यतिरेकः। व्यतिरेके वा स एव धर्मः धर्मिव्यापकोस्त्वलं समवायेन। तस्य च सम्बन्धान्तराभ्युपगमेऽनवस्था स्यादिति, स्वात्मवृत्तित्वमभ्युपेयम्। स्वात्मवृत्तित्वं समवाय एव। यच्चानुमानं-निमित्तकारणादेवोत्पद्यन्ते धर्माः द्रव्यगुणकर्मव्यतिरेकिकार्यत्वाद्विनाशवदित्यत्र कार्यत्वस्य स्वकारणसत्तासम्बन्धरू-

(व्यो०)पतायामसिद्धो हेतुः। विनाशस्य च स्वकारणसत्तासम्बन्धाभावात् साधनविकलश्च दृष्टान्तः। द्रव्यादिव्यतिरेके च प्रमाणाभावात्सन्दिग्धविशेषणो हेतुः । अथ षट्पदार्थेषु अस्तीति ज्ञानं व्यतिरेके प्रमाणम् । तथाहि—द्रव्यादिष्वस्तीत्यादिज्ञानानि षट्पदार्थव्यतिरिक्तविधीयमाननिमित्तनिबन्धनानि षट्पदार्थेषूत्पद्यमानत्वात्। यानि तु षट्पदार्थव्यतिरिक्तविधीयमाननिमित्तनिबन्धनानि न भवन्ति न तानि षट्सूत्पद्यन्तेऽस्तीत्यादिज्ञानानि। तस्मात् षट्पदार्थव्यतिरिक्तविधीयमाननिमित्तनिबन्धनानीति व्यतिरेकी। तथाहि षट्पदार्थेष्वस्ति ज्ञानम्। तथाहि विधेय इत्युत्पद्यमानं दृष्टमिति पक्षधर्मत्वम् । न च षट्पदार्थव्यतिरिक्ताभावरूपनिमित्तनिबन्धनम् उभयाभिमतं विज्ञानमस्तीति सपक्षाभावः। द्रव्यादिज्ञानं तु षट्पदार्थव्यतिरिक्तभावरूपनिमित्तनिबन्धनं न भवतीति विपक्षः। तस्माच्च षट्पदार्थेषूत्पद्यमानत्वं हि द्रव्यादिव्यावृत्तम। तथाहि-द्रव्यज्ञानं द्रव्य एव, न च गुणादिष्वेवं गुणज्ञानं गुण एव न कर्मादिष्वपीति, न षट्सूत्पत्तिरिति विपक्षव्यावृत्तिरेव । विपक्षे प्रत्यक्षागमाभ्यां विरुध्यत इति न कालात्ययापदिष्टः। विशेषानुपलब्धेर्योगान्न प्रकरणसम इत्यस्माद्व्यतिरेकसिद्धौ न सन्दिग्धविशेषणो हेतुरिति॥ नैतदेवं षट्सु पदार्थेषूत्पद्यमानत्वं व्यक्त्यपेक्षयाऽसिद्धम्। तथाह्येकमस्तीति ज्ञानं षट्सु पदार्थेषूत्पद्यते। एवमभिधेयज्ञानञ्चेति। अथास्ति द्रव्यमस्ति गुण इत्येवं जातीयकं ज्ञानं षट्सूत्पद्यते इति नास्त्यसिद्धता। तर्हि द्रव्यगुणादिज्ञानं ज्ञानजातीयं षट्सूत्पद्यते। न च षट्पदार्थातिरिक्ताभावरूपनिमित्तनिबन्धनमिति व्यभिचारः । यच्च षट्पदार्थातिरिक्तं भावरूपनिमित्तम् तस्यानुवृत्तव्यावृत्ततायां प्राक्तनमेव दूषणमूह्यम् । सत्तासम्बन्धेन च पदार्थेषु भावव्यतिरेकाभ्यामस्तीति ज्ञानमुत्पद्यमानं दृष्टमिति विरोधः। अस्तित्वधर्मादेवास्तित्वज्ञानमिति चेत् । तर्हि सत्तायाः सद्भावे किं प्रमाणमिति वाच्यम्, प्रत्ययवैलक्षण्याभावादित्यतो न व्यतिरेके प्रमाणमस्तीति अप्रसिद्धविशेषणो हेतुरिति सत्यम् । यदि च भूत्वा भावित्वमात्रं कार्यत्वमिष्टं स्यात्तदप्यस्तित्वादिषु सन्दिग्धम्। तथाह्याश्रये सत्युपलंभादस्तित्वादेर्न ज्ञायते—किमाश्रयाः धा ते सन्तोऽभिव्यज्यन्ते सामान्यवदुतोत्पद्यन्ते रूपादिवादिनि ? न च

(व्यो०)निमित्तकारणं विशेषतो निर्देष्टुं शक्यते। अथ गुणाश्रयस्तदाधारास्तेषां निमित्तमिति चेत्। एवं तर्हि गुणादीनां कार्याधारतया समवायिकारणत्वादिति—निमित्तादेवोत्पत्तिर्विरुध्यते । तथाहि नियमेनाधार्याधारयोर्यः सम्बन्धः स समवाय एव। अन्यत्वे वा समवायलक्षणे व्यभिचारात् । असम्बन्धे चोक्तमेव दूषणम्-इति· अतिरिक्तैर्धर्मैर्विना धर्मिण उद्देश इति सिद्धम्। अन्ये तु धर्मैः सह धर्मिणः उद्देशः कृतः। केनेति? विना पक्षिणोलूकेन। सामान्यशब्दश्च विशेषे वर्तते प्रकरणादिति ब्रुवता ॥

(भा०)षण्णामपि पदार्थानामस्तित्वाभिधेयत्वज्ञेयत्वानि ।

(मू०) षण्णां द्रव्यादीनाम्। अपिशब्देनाभावस्याप्युपसङ्ग्रहः। अस्तित्वं स्वरूपसत्त्वं तच्चोभयावृत्तिधर्मवत्त्वम् । अभावस्यालक्ष्यत्वे तु तादृशभावत्वं वाच्यम्। एवमग्रेऽपि। अस्तित्वं विधिमुखप्रतीतिविषयत्वम्। तच्च—प्रतियोग्यनपेक्षनिरूपणविषयत्वम्-इत्याचार्यव्याख्यानन्तु चिन्त्यम्। निरूपणं हि तत्र यदि साक्षात्कारस्तदाऽतीन्द्रिये द्रव्यादावव्याप्तिः। यदि च ज्ञानमात्रं तर्ह्यभावेऽतिव्याप्तिः, अनपेक्षान्तवैयर्थ्यञ्च स्यादिति । अभिधेयत्वं—पदशक्यत्वम् । ज्ञेयत्वं—ज्ञानविषयत्वम् ॥

(स०)षण्णामपीति। अपिरभिव्याप्तावभिव्याप्त्या च सर्वस्य द्रव्यादेः प्राप्तिः सिद्ध्यति,अन्यथा कस्यचिद्द्रव्यस्य कस्यचिद्गुणादेर्ग्रहणेपि षण्णाम्प्राप्तिः स्यादेव,ननु सर्वस्य द्रव्यादेः प्राप्तिः,एवञ्च सर्वं द्रव्यं सर्वश्च गुणादिर्लक्ष्यत्वेनाभिव्याप्त्या प्राप्यत इति सिद्धम् । ननु च मन्दमेतत्-षण्णामित्यसङ्कुचितपदादेव सर्वेषां द्रव्यादीनां प्राप्तेः संकोचाभावे विनिगमकाभावेन सामान्यशब्दस्य सर्वप्रत्यायकत्वात्, अन्यथा 'पृथिव्युदकज्वलनपवनात्ममनसामनेकत्वापरजातिमत्त्वम्' इत्यत्रापि सकलपृथिव्यादिप्राप्त्यर्थं किंचिदुपादेयम्। न च षण्णामित्यत्र षश्च प्रभृतीनां? प्राप्तिर्माभूत्-एतदर्थमपि। षण्णामितिपदादेव तथा सिद्धेस्तथा चापिरभिव्याप्तावित्यसंगतामिति चेत्। अत्र ब्रूमः—अपिर-

(से०)भिव्याप्तावित्यस्यापिना लक्षणस्य लक्ष्येऽभिव्याप्तिर्बोध्यतेऽव्याप्तिशंकानिराकरणायेत्यत्र तात्पर्यम् । न च सर्वत्र तथाकरणापत्तिरतिव्याप्तिनिराकरणार्थमपि च क्वचित्करणापत्तिरिति वाच्यम् । स्वतन्त्रेच्छत्वात् स्थितेरगतगतेश्चिन्त्यमानत्वाच्चेति ? ।

अस्तित्वमिति । ननु किमिदमस्तित्वं ? सत्ताजातिमत्त्वं चेत्, तदा सामान्यादावव्याप्तिः । विद्यमानत्वप्रामाणिकत्वान्यतरपर्यवसायिस्वरूपसत्त्वं चेत्, तदाऽभावेऽतिव्याप्तिः । अत एवाचार्यचरणैः-विधिमुखप्रत्ययविषयत्वमुक्तमिति चेन्न । तत्—विनास्तित्वेन प्रतीयमानत्वमभावोऽस्तीति प्रतीतेः । नापि भावत्वेन प्रतीयमानत्वं-तमसि भावभ्रमोदयात् । नापि तथा प्रमा-यथोक्तविशेषणविशेष्यभावे-वैयर्थ्याभावेऽपि भावत्वनिर्वचनसापेक्षत्वात् । नन्वत एवाचार्यचरणैः-प्रतियोग्यनपेक्षनिरूपणत्वमुक्तमिति चेन्न । तद्धि प्रतियोगिज्ञानाजन्यज्ञानविषयत्वम् । तस्य चा भावेऽतिव्याप्तत्वात्-प्रतियोगिज्ञानाजन्यस्य प्रमेयमित्यादेर्ज्ञानस्याभावविषयत्वादन्ततो पारमेश्वरज्ञानविषयकत्वात्तस्याजन्यतया प्रतियोगिज्ञानाजन्यत्वात् । अत एव-असमवायत्वे सति गुणत्वशून्यत्वे च सति सविकल्पकमात्राविषयत्वं वर्धमानोपाध्यायैरुक्तमिति चेन्न । एतस्य ह्यसमवायत्वे सति गुणत्वशून्यत्वे सति यस्सविकल्पकमात्रविषयस्तद्भिन्नत्वमित्यर्थः । एवं हि संयोगसमवाययोरव्याप्तिर्न भवति-तत्राप्यसमवायत्वाद्यभावेन विशिष्टाभावसत्त्वात् । न चैतदुपपद्यते-अतीन्द्रिये द्रव्यादावव्याप्तेः-तस्य सविकल्पकमात्राविषयत्वात् । लौकिकप्रत्यक्षविषयस्यैव द्रव्यादेर्निर्विकल्पकविषयत्वात् । अत एव-भावत्वं वा विवक्षितमिति-वर्द्धमानः इति चेन्न । तस्यैवानिर्वचनात् । न तावदभावभिन्नत्वम् तत्-अभावत्वस्य भावभिन्नत्वेऽन्योन्याश्रयादिति चेन्न । अभावाविशेष्यकधीविशेष्यत्वस्य लक्षणत्वात् । द्रव्यमित्यादिधियां तथात्वात् । यस्यास्तु धियोऽभावो विशेष्यस्तस्या अभावविशेष्यकत्वनियमादिति दिक् ।

अभिधेयत्वमिति । यदिदमभिधीयमानत्वं तदभिधानानाश्रये न यातीत्यभिधानयोग्यता तदर्थः । तच्च पदशक्तिविषयत्वम् । यद्यपि अत्र वैयर्थ्यम्-शक्तिविषयत्वस्य विषयत्वस्यैव वा सामञ्ज-

(से०)स्यात्, तथापि तथाभूतस्य धर्मत्वमविरुद्धमेव,न ह्यतिव्याप्त्यादिवारकविशेषणवदपि पदशक्तिविषयत्वन्तद्द्रव्यादिषु वर्तत इति भावः।

ज्ञेयत्वमिति। यद्यप्येतन्न ज्ञानकर्मत्वं—लौकिकप्रत्यक्षं प्रत्येव विषयस्य कर्मत्वात्, ज्ञानान्तरस्य विषयाजन्यत्वात्, तथापि ज्ञानविषयत्वलक्षणज्ञानयोग्यत्वं विवक्षितम्। अत्रापि वैयर्थ्यशंकायां पूर्वोक्त एव न्यायः। एतद्भयं च न द्रव्यादीनां लक्षणमितरस्मिन्नभावेपि विद्यमानत्वेन ततो व्यावर्तकत्वाभावात्, किन्तु धर्ममात्रमित्याचार्याः। अभिधेयत्वं-भाववत्पदशक्तिविशेष्यत्वम्। ज्ञेयत्वं भावत्वप्रकारकप्रमाविशेष्यकत्वम्। एवं लक्षणत्वमपीत्यन्ये।

(भा०) आश्रितत्वं चान्यत्र नित्यद्रव्येभ्यः।

(सू०) आश्रितत्वञ्चेति। चोऽवधारणे। तथाच पण्णामपि पदार्थानां नित्यद्रव्येभ्यो—विभुद्रव्येभ्योऽन्यत्रैवाश्रितत्वमाधेयत्वं साधर्म्यमिति पूर्वेणान्वयः। तेन नित्यानां परमाणूनामाश्रितत्वं न क्षतिकरं तेषामपि लक्ष्यत्वात्।

(से०)आश्रितत्वमिति। नन्वाश्रितत्वं यद्याधेयत्वन्तदा संयोगसम्बन्धेन विद्यमाने परमाण्वादावप्यस्त्याकाशादीनां संयोगेन विद्यमानत्वपक्षे वृत्तितायां सिद्धायां तत्रापि चास्तीति नित्यद्रव्यव्यावर्तनमयुक्तम। अथ समवेतत्वं ? समवायेऽव्याप्तिः—तस्य स्वरूपसंबन्धेन विद्यमानतया स्वरूपसंबन्धस्य धर्मिद्वयात्मकतया प्रकृते एकस्य धर्मिणः समवायेन विद्यमानत्वस्य विवक्षणात्। ननु समवाये घटाभाव इति प्रतीत्या घटाभावस्य समवायित्वेन तत्रापि स्वरूपसम्बन्धस्याङ्गीकर्तव्यतया तस्य च धर्मिद्वयात्मकतया धर्मिणश्चैकस्यात्र समवायस्य प्रवेशेन प्रकृताभावे समवायसम्बन्धेन विद्यमानत्वमिति चेन्न। अस्यार्थमत्र वर्द्धमानोपाध्यायाः—संयोगान्यवृत्त्यासमवायभिन्नभावत्वं विवक्षितमित्याहुः। अस्यार्थः—संयोगान्यवृत्त्या संयोगातिरिक्तसम्बन्धेन योऽसमवायोऽसंबद्ध आकाशादिराकाशादेः संयोगसम्बन्धेनैव संबद्धत्वात्तद्भिन्नभावत्वमिति। तन्न। आकाशादेरपि संयोगातिरिक्तसम्बद्धत्वात् तस्य कालवृत्तित्वस्यावश्यकत्वात्। तत्र कालद्रव्यवृत्तावव-

(से०)ङ्गीक्रियमाणायां विभुद्वयसंयोगाभावेन तदतिरिक्तसम्बधः। यदि च कालोपाधिवृत्तिस्तदा कर्माणि संयोगायोग्यतयान्य एव सम्बन्धः। स च स्वरूपसम्बन्ध एव । एवञ्च संयोगान्यवृत्त्याऽसम्बद्धप्रतीतेः कथं तद्धर्मे लक्षणमिति । संयोगान्यवृत्तिः समवायः, उपलक्षणे तृतीया । तथा चान्यसमवायोपलक्षितोऽन्यसमवायवान् सन् योऽसमवायोऽसमवेतस्तद्भिन्नभावत्वं भवति इत्याकाशादिः शब्दादिसमवायवत्त्वे सति स्वयं समवेतस्तद्भिन्नभावत्वमनित्यद्रव्यादौ सुलभमेवेति। पुनरर्थगतिगवेषणे प्रामाणिकपरिगृहीतः पन्थाः । शब्दशैलीपरिशीलने त्वयमपि कण्टकित एव।तथाहि–असमवायेति समस्तपदार्थस्यासमस्तेन संयोगान्यवृत्त्येत्यनेनान्वयासंभवात् । न ह्यतिप्रचण्डदोर्दण्डाकृष्टकोदण्डविनिःसरन्मार्गणगणपाटितोरस्तटप्रतीपपार्थिवप्रेयसीसंघातानुगीतशरदमृतधामाभिरामयशा राजपुरुष इति वाक्ये यशा इत्यन्तं समस्तमसमस्तेन राजपदेनान्वेतीति कस्यापि सचेतसश्चेतासि चमत्कारं रचयति। तस्मात्समवेतसमवायसम्बन्धत्वं नित्यद्रव्यातिरिक्तानां नवानां लक्षणम् । न हि समवाययोर्यः सम्बन्धः समवेतसमवायलक्षणस्वरूपसम्बन्धस्तस्य समवेतसमवायभावलक्षणस्वरूपसम्बन्धविशेषस्य (स) तदतिरिक्तेष्वप्यसम्बद्धः, सम्बन्ध्यतिरिक्तेऽवृत्तेरित्यस्मदुक्तेः भाष्यकिरणावलीवर्द्धमानानामस्मत्पितृचरणविरचितवर्द्धमानप्रकाशस्य च विमलनाम्नस्तात्पर्यमवधार्यमिति । चकारान्मूर्तं विहाय निष्क्रियत्वामित्याचार्याः । एतच्च यद्यपि निष्क्रियविनष्टे मूर्तेऽतिव्याप्तम् । न च निष्क्रियस्य मूर्तस्य कार्यविनाशो द्वितीयक्षणे विनाशे क्षणिकतापत्तेः, तत्तृतीयक्षणादौ तु विनाशे कर्मोत्पत्तिसंभवात् इति वाच्यम् । कर्मोत्पत्तेरागन्तुकनोदनादिहेतुकत्वेन द्वितीयक्षणेऽसंभवेन तृतीयक्षणे नष्टे निष्क्रियत्वसंभवात् । न हि विनश्यदवस्थस्य कर्मसमवायिकारणत्वं संभवति कार्योत्तरकाले सत एव कार्यसमयसतो वा समवायिकरणत्वादित्यस्याप्यनंगीकारे कार्योत्पत्तिदशायां समवायिकारणनाशे कार्यस्य क्षणिकतापत्तेः । न चैवमन्यतरकर्मणोप्यभावेनाकाशादिसंयोगाभावे सर्वमूर्तसंयोगित्वलक्षणविभुत्वं तेषां हीयेतेति वाच्यम् । कारणाकारणसंयोगेन तदुपपत्तेः । तथापि क्रियावद्वृत्तिद्रव्यविभाजकोपाधिशून्यत्वं विवक्षितम् । ते चोपाधयः पृथिवीत्वा-

(से०)दयः। तेन रूपेण यद्विभागो भाष्यकृता न कृतः,तथापि पदार्थो द्विविधो भावोऽभावश्चेत्यभिप्रायस्थो ज्ञेयः। एवञ्च भावत्वाभावत्वे पदार्थविभाजकोपाधी, द्रव्यत्वादयस्तु भावविभाजकाः। अभावविभाजकन्तु कस्यचिन्मतेऽन्योन्याभावत्वं संसर्गाभावत्वं च। संसर्गाभावविभाजकं प्रागभावत्वादि। कस्यचित्तु मतेऽभावश्चतुर्विधः-प्रागभावप्रध्वंसात्यन्ताभावान्योभावभेदादिति विभागात्प्रागभावत्वादयोऽभावविभाजका एव। येन रूपेण यस्य विभागो यस्य मते तस्यैव तस्य मते तद्विभाजकोपाधित्वात्। एवञ्च विभाजकोपाधिचिन्तनं साधर्म्यवैधर्म्योपयोगित्वेनोपोद्घातिकं प्रासंगिकञ्चेति नासंमतमिति॥

(व्यो०)अथाव्यतिरेकेऽस्तित्वादीनां पदार्थान्तरभावाहेतोरपि साधर्म्यरूपतया परिज्ञानार्थमाह षण्णामपि पदार्थानामस्तित्वं चाभिधेयत्वं च ज्ञेयत्वं चेति समाहारद्वन्द्वः। न परमस्तित्वाद्यः षण्णां धर्मास्तथाश्रितत्वं चेति। तस्य अनित्येष्वसंभवात् अव्यापकत्वेन पृथगभिधानमित्याह-आश्रितत्वं चान्यत्र नित्यद्रव्येभ्य इति। अथाव्यतिरेके अस्तित्वादीनां क्वान्तर्भाव इति चेत्। शब्दव्यवहारस्य विवक्षितत्वादस्तेः शब्दरूपस्य भावोऽस्तित्वं ज्ञानमेव। येन सत्तास्तीत्यभिधानं प्रवर्तत इति। ज्ञानरूपस्य चास्तेर्भावोऽस्तित्वमिति विवक्षायां सत्तास्वरूपं स्वत्वं वा लभ्यते। तत्सद्भावे द्रव्यादिष्वस्तीति ज्ञानदर्शनात्। अस्ति चायमस्तिशब्दो ज्ञाने तद्विषयेऽभिधाने चेति। तथाभिधेयस्य च भावोऽभिधेयत्वमभिधेय इति ज्ञानमेव। तेन सत्ताभिधेयोऽयमर्थ इति शाब्दव्यवहारदर्शनात्। तच्चाभिधानजनितं ज्ञानमर्थ इति शाब्दव्यवहारदर्शनात्। तच्चाभिधानजनितं ज्ञानमर्थ इति। तथा ज्ञेयस्य भावो ज्ञेयत्वम् इति ज्ञानमेव। तेन सत्ता ज्ञेयमिति व्यवहारदर्शनात्। तच्चाभिधानजनितं ज्ञानमर्थ इति। तथा ज्ञेयस्य भावो ज्ञेयत्वं ज्ञेयमिति ज्ञानमेव। तेन सत्ता ज्ञेयमिति शाब्दव्यवहारदर्शनात्। तच्च ज्ञानेन विशेषणेन जनितसंज्ञानमर्थ इति।

तथाऽऽश्रितानां भाव आश्रितत्वम् आश्रयाश्रयिभावलक्षणा वृत्तिः। सा चाकाशादिषु तेषां आश्रयभावात्। न चाश्रयाश्रयिभावस्य समवायरूपतायां समवायेऽसंभवात् न षट्पदार्थव्यापित्वम्। अथ पञ्चानां समवायलक्षणा वृत्तिराश्रितत्वम्, समवायस्तु स्वात्मवृत्तिरिति चेत्। एवं तर्हि पञ्चानां समवायित्वमिति पुनरुक्तम्

(व्यो०)स्यात् । तथाहि-समवायित्वं समवायलक्षणा वृत्तिः सा च पञ्चानामाश्रितत्वपदेनोक्तेति । आश्रितत्वपदेन आश्रितत्वोपलक्षितस्येहाभिधानात् अदोषः । अथ व्यतिरिक्तस्य निमित्तस्यासंभवात समवाये भावप्रत्ययः कथम ? आश्रितस्य समवायस्य भावः आश्रयत्वमिति । नैतदेवम् । समवायस्य वृत्तिरूपतया वृत्तिमदाश्रितत्वोपलब्धेः । वृत्त्यन्तरकल्पनायामनवस्था स्यादित्युपचरिता वृत्तिरिष्यते । सा चान्यनिमित्तस्यासंभवादाश्रितत्वज्ञानहेतुः समवाये वृत्तिविशेष एव । आत्मवृत्तित्वे तु समवायस्य स्वयं वृत्तिरूपत्वाद्वृत्त्यन्तरं नापेक्षितमित्यभ्युपगमेनाश्रितत्वमेव, अव्यतिरके ह्याश्रयाश्रयिव्यवहारासंभवादतः समानलक्षणवृत्तिप्रतिषेध एवेति वक्ष्यामः-समवायपरीक्षायामित्यलम् ॥

(भा०) द्रव्यादीनां पञ्चानां समवायित्वमनेकत्वं च ।

(सू०) द्रव्यादीनां पञ्चानामपीत्यपिरवधारणे । तथाच द्रव्यगुणकर्मसामान्यविशेषाणामेव समवायित्वं-समवायप्रतियोगित्वं समवेतवृत्तिभावविभाजकधर्मवत्त्वम् समवायावृत्तिधर्मवद्भावत्वं वा फलितम् । तेन सामान्यविशेषयोः समवायित्वस्य नित्यद्रव्ये च समवेतत्वस्यासत्त्वेऽपि न तेष्वव्याप्तिः । अनेकत्वं-बहुतरवृत्तिभावविभाजकत्वत्त्वम् । चकारादुभयावृत्तिभावविभाजकधर्मशून्यभावत्वाद्युपग्रहः ॥

(से०) समवायित्वमिति । नन्वेतद्यदि समवेतत्वं-तदा नित्यद्रव्येष्वव्याप्तिः । यद्यन्यसमवायवत्त्वं-तदा सामान्यादावव्याप्तिः तत्रान्यसमवायाभावात् इति चेन्न । समवायत्वस्य विवक्षितत्वात् । अवयव्यवयवादीनां समवायस्य द्विष्ठतया जातिव्यक्तिविशेषनित्यद्रव्ययोरपि समवायस्य द्विष्ठत्वाज्जात्यादावन्यसमवायाभावादिति चेन्न अभावेऽपि समवायसत्त्वात्, समवाये तु न याति समवायान्योन्याभावः । अत एवाचार्याः-'समवायित्वं समवायलक्षणः सम्बन्धः'इति ।

अनेकत्वमिति । नन्वनेकत्वं यदि अनेकत्वसंख्या, तदा गुणादावव्याप्तिः । यद्येकत्वविरहः, तदा समवायेऽतिव्याप्तिर्द्रव्याव्याप्तिश्च । यदि स्वरूपभेदः सः,समवायेऽपि चतुर्विधभेदान्तर्गतस्य स्व-

(से०)रूपभेदाख्यद्रव्यादिप्रतियोगिकस्य समवायाभावयोरपि सत्त्वा-दिति चेन्न। 'स्वाश्रयप्रतियोगिकान्योन्याभावसमानाधिकणभावविभाजकोपाधिमत्त्वस्य विवाक्षितत्वात्। द्रव्यादौ इदं याति-एकद्रव्यादिप्रतियोगिकान्योन्याभावेन द्रव्यान्तरादौ द्रव्यत्वादेः समानाधिकरणत्वात्। समवाये तु न याति समवायान्योन्याभावस्य समवायेऽभावात् द्रव्यादौ सत्त्वेऽपि तत्र समवायत्वाभावात्। अनेकत्वञ्चेति चकारात्समवायादन्यत्वमित्याचार्याः। तच्च समवायप्रतियोगिकान्योन्याभाववत्त्वम् अतो नाभावेऽतिव्याप्तिः-तत्रान्योन्याभावाभावात्। ननु समवायान्यत्वेन समवायभेदसाधने साध्यविशेष इति चेन्न। समवायान्योन्याभावेनेतरभेदसाधनादितरमध्येऽभावस्यापि प्रवेशात् भेदमध्ये स्वरूपभेदादेरपि प्रवेशात् साध्याविशेषाभावात्, अन्यथा पृथिवीतरेभ्यो भिद्यते पृथिवीत्वादित्यत्रापि तदापत्तेः-साध्यभेदान्तर्गतस्य वैधर्म्यस्य पृथिवीत्वरूपस्याहेतुत्वात्। अत्रापि साध्याविशेषपरिहारस्योक्तगत्यैवावगन्तव्यत्वात्॥

(व्यो०) इदानीं समवायपरित्यागेन पञ्चानां साधर्म्यमाह—द्रव्यमादिर्येषां ते द्रव्यादयः तेषाम्। न ज्ञायते कियतामित्याह पञ्चानामपि साधर्म्यं समवायित्वमनेकत्वं चेति। समवायो विद्यते येषां ते समवायिनस्तेषां भावः समवायित्वम-समवायलक्षणा वृत्तिरिति। अनेकत्वं च-समानलक्षणयोगित्वे सति व्यक्तिभेदोऽनेकत्वसंख्या चोपचरिता। समवाये तु समानलक्षणयोगिनि न व्यक्तिभेदो नाप्यनेकत्वसंख्येति॥

(भा०) गुणादीनां पञ्चानामपि निर्गुणत्वनिष्क्रियत्वे॥

(सू०) गुणेति। गुणकर्मसामान्यविशेषसमवायानामेव निर्गुणत्वं गुणवदवृत्तिधर्मवद्भावत्वम्, तेनाद्यक्षणे द्रव्यस्य गुणवदन्यत्वेऽपि न तत्रातिव्याप्तिः। निष्क्रियत्वं क्रियावदवृत्तिभाववृत्तिभाजकधर्मवत्त्वम्, नातो विभुन्यतिव्याप्तिः॥

(से०) गुणादीनामिति। निर्गुणत्वं यदि गुणाभाववत्त्वं तदा द्रव्येपि अन्योन्याभावस्य सत्त्वात्, संसर्गाभाववत्त्वमपि द्रव्ये प्रागभावध्वंसयोः सत्त्वात्, अत्यन्ताभावोऽपि गन्धात्यन्ताभाववज्जलमित्यादिक्रमेण तत्रास्ति। गुणत्वावच्छिन्नप्रतियोगिताकात्यन्ताभा-

धस्तु न द्रव्ये इति तत्त्वम्। निष्क्रियत्वं कर्मत्वावच्छिन्नप्रतियोगिता कात्यन्ताभाववत्त्वम् यद्यप्याकाशादावतिव्याप्तम्, तथापि क्रियावद्वृत्तिभावविभाजकोपाधिशून्यत्वं तथेति भावः॥

(व्यो०) इदानीं द्रव्यपरित्यागेन साधर्म्यं दर्शयति—गुणा आदिर्येषां ते तथोक्तास्तेषाम्। न ज्ञायते कियतामतः पञ्चानामपि साधर्म्यम् निर्गुणत्वं च निष्क्रियत्वं चेति निर्गुणत्वनिष्क्रियत्वे। निर्गता गुणा येभ्यस्ते निर्गुणास्तेषां भावो निर्गुणत्वम् गुणाभावः। अथाभावस्य भावतया धर्मत्वाभाव इति चेत्, न विशेषणत्वेन तदुपपत्तेः। तथाहि-गुणाभावेन सत्तागुणादिष्वन्वयव्यतिरकाभ्यां निर्गुणा इति व्यवहारदर्शनात् ज्ञायते गुणाभावस्य विशेषणत्वेन धर्मत्वमिति। स च पंचसु समानत्वात् साधर्म्यमिति। षडेव पदार्था इत्यवधारणं च भावविषयमित्यभावस्य व्यतिरेकेपि न दोषः। आश्रितस्य धर्मत्वेपि समवेत एव धर्म इति नियमानभ्युपगमाच्चेति। निष्क्रियत्वं तु निर्गता चलनलक्षणक्रिया येभ्यस्ते निष्क्रियास्तेषां भावो निष्क्रियत्वम् क्रियाभावः साधर्म्यम्; तेन सत्ता निष्क्रिया इतिव्यवहारदर्शनात्।

अन्ये तु गुणाभावोपलक्षितः समवायो निर्गुणत्वं क्रियाभावोपलक्षितश्च निष्क्रियत्वमिति मन्यन्ते। तच्चासत्-समवाये धर्मिसमवायान्तरस्यासंभवान्निर्गुणव्यवहारो न स्यात् अभेदे हि धर्मधर्मिव्यवहारादर्शनात्॥

(भा०) द्रव्यादीनां त्रयाणामपि सत्तासम्बन्धः सामान्यविशेषवत्त्वं स्वसमयार्थशब्दाभिधेयत्वं धर्माधर्मकर्तृत्वं च॥

(सू०) द्रव्येति। द्रव्यगुणकर्मणां सत्तासम्बन्धः-सत्तासमवायः। सामान्यविशेषवत्त्वं-सत्ताव्याप्यजातिमत्त्वम्। स्वसमयेति वैशेषिकाणां स्वशक्तिः, तेनार्थशब्दाभिलप्यमानत्वमित्यर्थः। धर्माधर्मकर्तृकत्वं-अदृष्टजनकभावत्वम्, तेन धर्माधर्मयोरेकमात्रजनके नाव्याप्तिः। भावत्वोपादानान्नाशौचाद्यभावेऽतिप्रसङ्गः। न च सुवर्णादिद्रव्यतदीयगुरुत्वादिगुणतद्दानादिकर्मणां यथा धर्म-

(सू०)जनकत्वं यथा वा पुरीषादिद्रव्यतत्संयोगतद्ग्रहणादिकर्मणा-मधर्मजनकत्वं तथा तादृशद्रव्यादिगतानां स्वर्णत्वादिजातीनामपि परंपरया धर्माधर्मजनकत्वं सुवचमतस्तत्राति०याप्तिरिति सांप्रतम्। स्वर्णत्वादिजातेर्धर्मादिजनकतावच्छेदकत्वेनैवोपक्षयात्। तीर्थादिदेशस्य तत्संयोगतदनुसरणादेर्धर्माधर्मजनकतायाश्च सिद्धत्वादिति भावः ॥

(से०) सत्तेति । यद्यप्येकार्थसमवायाद्द्रव्यस्सामान्यादावपि तथापि तन्निरूपितसमवायो नान्यत्रेति भावः । सामान्येति । सामान्यविशेषा द्रव्यत्वादयस्तद्वत्त्वमित्याचार्याः । तत्र विशेषपदवैयर्थ्यं सामान्यस्यैव लक्षणत्वसंभवादिति केचित् । तन्न सामान्यविशेषस्य सत्ताव्याप्यत्वप्रदर्शनाय सत्तां लक्षणत्वेनाभिधाय तेषामेव सासान्यविशेषस्य लक्षणत्वेनाभिधानात्। एवञ्च सामान्यविशेषवत्त्वं सत्तावति द्रव्यादावेव वर्तते न सामान्यादाविति प्राप्यते। लक्षणन्तु सासान्यवत्त्वमेवेत्येके । तत्र चासामान्यविशेषवत्त्वस्य भाष्यकृता सामान्यादौ कण्ठत एव भाषितत्वात् सामान्यरूपो विशेषः सामान्यविशेषो जातिरूपो व्यावर्तको धर्म इत्यर्थः । तत्र व्यावर्तकधर्मवत्त्वे लक्षणे सामान्यादावतिव्याप्तेर्जातिमत्त्वमेव लक्षणमास्तामिति चेन्न । जातेर्विशेषणतया-लक्ष्यविशेषणतया लक्ष्यविशेषणतां निर्वर्त्य वैयर्थ्यमित्युक्तौ यथोक्तविशेषणविशेष्यभावे वैयर्थ्याभावादिति तु वयम् । अत एवाचार्यचरणैरपि नात्र वैयर्थ्यमाशंकितम्। नहि सत्तावदित्यत्र वैयर्थ्ये तेषामशेषार्थविषयकमतीनां प्रस्फुरणं संभवति । ननु युगपदुद्युक्तसुरासुरबलभुजबलचञ्चलमन्दराचलप्रौढाभिघातवर्गतदुत्तरलतरङ्गतरङ्गिणीभुजङ्गसमुद्भूताखण्डस्तवानयमाकाशावकाश इति(?) वाक्याकर्णनकुतूहलापाक्रान्तकर्णानां समुद्भूते शाब्दबोधे विशेष्यांश इव विशेषणांशेऽपि संशयाभावेन विशेषणतापि शाब्दबोधस्य विषयस्तथाच नीलोत्पलवत् इत्यादौ विशेष्याभिन्नविशेषणस्थले यथा द्वन्द्वान्ते श्रूयमाणः शब्दः प्रत्येकमभिसंबध्यते तथा मतुबर्थो विशेषणविशेष्ययोर्द्वयोरप्यन्वेतीति चेन्न । एवं सति नीलवदुत्पलवदिति प्रतीत्यापत्तौ नीलाभिन्नोत्पलवदिति प्रतीत्यापत्तेस्तथा

(से०)प्रतीतावपि तथा संशयकारकं न तु तदभिन्नप्रत्ययस्य तत्सत्ता-साक्षिणोऽनुभवस्यैव वा कूटसाक्षिकोटिविनिक्षिप्तत्वात् नीलोत्पल-वदिति वाक्यान्नीलाभिन्नोत्पलवदिति भवति न तु नीलवदुत्पलव-दित्यत्र तु शब्दशैलीसाक्षिणो द्वित्रा एव साक्षिण इति न व्याकु-लान्तःकरणा ये केचित्प्रष्टव्या इति दिक् ।

स्वसमयेति । ननु अभिधेयत्वं केवलान्वयीश्वरसंकेतमादायार्थ-शब्दाभिधेयत्वमपीति स्वसमयेति, तथाच वैशेषिकार्थशब्दसंकेत-विशेष्यत्वं लक्षणमित्यर्थः, तच्चाधुनिकवैशेषिकसङ्केतितसामान्या-दाविति चेन्न । साधर्म्यस्य त्रैकालिकत्वानियमात् ।

धर्मेति । ननु कर्तृत्वमचेतने नान्वितमन्यतरवैयर्थ्यञ्च । न च कर्तृत्वं कारणत्वं साधर्म्यद्वयं विवक्षितमिति वाच्यम् । अजनके धर्माजनके वा द्रव्याद्यन्तर्गतेऽव्याप्तेः धर्माधर्मयोरव्याप्तेश्च, तीर्थ-स्नानादिप्रापकधर्मेण धर्मजननेऽपि तन्मात्रेण धर्मजनने मानाभावात्, ब्रह्महननादिसमर्पकाधर्मेणाधर्मजननेपि तन्मात्रेणाधर्मजनकत्वे मा-नाभावाच्चेति चेन्न। अधर्मान्यत्वे सति धर्मजनकवृत्तिभावविभाजको-पाधिमत्त्वस्याधर्मान्यद्रव्यादिलक्षणत्वात् । धर्मान्यत्वे सति अधर्मज-नकवृत्तिभावविभाजकोपाधिमत्त्वस्य धर्मान्यद्रव्यादिलक्षणत्वाच्च। ए-तच्च यदि प्रथमलक्षणेऽधर्मस्य न लक्ष्यता द्वितीयलक्षणे धर्मस्य तदा, अन्यथा सत्यन्तविनिर्मुक्तमेव । निरुक्तस्याप्युपयोगः तथाहि-गोदा-नापहारयोर्हि सुकृतदुष्कृते कृते भवतस्तत्र न दानापहारयोरेवोप-योगो विनिगमनाविरहेण तदीयदानापहारयोरुपयोगे विषयस्य त-स्य तस्यापि हेतुत्वात् । ननु न व्यक्तिमात्रस्योपयोगोऽतिप्रसङ्गात् किन्तु गोत्वविशिष्टस्य, विशिष्टस्य चोपयोगे विशेषणस्योपयोगः स-र्वसंमतः, एवञ्च जातौ लक्षणमतिव्यापकमिति चेन्न। गोत्वस्य दण्ड-त्ववदवच्छेदकत्वात्, एवञ्चान्यथासिद्धतयाऽकारणत्वात्। गोत्वेन रा-सभादिव्यावृत्ततयाऽवगताया गोर्दाने तद्द्वारा गोत्वस्येापयोगेपि तस्य धर्माधर्महेतुत्वे मानाभावः । अपि च विहितानिषिद्धप्रयत्नाविषय-स्यैव धर्माधर्महेतुत्वम् । प्रयत्नविषयता च द्रव्यस्य क्वचिद् व्यापा-रतया यथा गङ्गाजलादौ, तत्र स्वशरीरसंयोगस्य व्यापारजननात् । क्वचिद् व्यापारितया यथा तुलस्यादौ तुलस्यादेरुत्पादनसंभवात् ।

(से०)गुणकर्मणोस्तु व्यापारतैयव प्रयत्नविषयत्वम् द्रव्येतरत्वेन जन्य-धर्मानाश्रयतया व्यापारित्वासंभवात्। सामान्यादीनान्तु द्रव्येतरतया जन्यधर्मानाश्रयत्वेन व्यापारित्वन्न संभवति व्यापारत्वन्तु नित्यत्वा-दिति कथं प्रयत्नविषयता तदभावे च कथं धर्माधर्मप्रसवभाव इति। अपि च धर्माधर्मजनकत्वं श्रुत्येकगम्यं, न च"गां दद्यात् ब्राह्मणं न हन्या-दिति"वज्ञात्यादिषु विधिनिषधौ भवतः। तस्माद्द्रव्यादीनामेवापह्नि-यमाणानां दीयमानानां गवादीनां क्रीयमाणानां गंगाजलचाण्डालसं-योगादीनां तीर्थम्लेच्छदेशगमनादीनां च धर्माधर्महेतुत्वं न तु जा-त्यादीनाम्। उपयोगस्तु व्यक्तिव्यावर्तकतया जातिरपि सत्त्वसमवा-येन व्यावर्तिकेति। समवायस्यापि अशेषस्य विशेषस्य तु कथमपि न तयोरुपयोग इति। ननु गां दद्यादित्यादौ विध्यर्थ इष्टसाधनत्वादिः प्रकृत्यर्थे दानादावेवान्वेति प्रकृत्यर्थान्वितस्वार्थबोधकत्वम्प्रत्यया-नामिति न्यायात, तदन्यथानुपपत्तिकल्प्यधर्मजनकमपि तत्रैवान्वे-तीति। न च गोदानस्य दीयमानतया वा गोर्जनकत्वे विनिगमनावि-रहः। दानजनकत्वे प्रमाणसत्त्वात् गोर्जनकत्वेऽपि तदसत्त्वाद्विनि-गमकस्य स्फुटत्वात्, एवञ्च गोदानत्वेन जनकत्वे गौरवच्छेदकत-योपयोग इति, यत्र तु सुवर्णं सर्वकामदमित्यादिना कर्मणोपयोगा-पत्तिः तत्र विनिगमनाविरहेण द्वयोरपि धर्महेतुत्वमिति चेन्न। गवा-दीनामपि धर्मोपयोगस्य बहुषु श्रुतिस्मृत्यादिषु श्रूयमाणत्वात, यत्र च न श्रूयते तत्र तुल्यन्यायतया कल्पनात कस्यचिद्द्रव्यादेर्जनक-त्वेन प्रकृतलक्षणोपपत्तेरिति संक्षेपः॥

(व्यो०) द्रव्यादित्रयस्य साधर्म्यमाह—द्रव्यमादिर्येषां तानि द्रव्यादीनि तेषाम्। न ज्ञायते कियतामित्यतः त्रयाणामपि सत्तास-म्बन्धः साधर्म्यं। सत्तायाः सम्बन्धः सत्तोपलक्षितः समवाय इति। ननु द्रव्यादिषु सत्तायाः सद्भावे किं प्रमाणम्। सद्द्रव्यं सद्गुणः सत्कर्मेति प्रत्यय एव। तथाहि-सदितिज्ञानं विशेष्यज्ञानत्वान्नतैं विशेषणाद्भवतीति सत्तासद्भावः। नन्वेवं तर्हि त्रयाणामित्ययुक्त-म् सामान्यादिष्वपि सत्त्वादिति ज्ञानोत्पत्तेः। तथाहि-सत्सामान्यं सन्तो विशेषा सन् समवाय इत्यपि विशेषज्ञानदर्शनात् वाच्यः सत्ता-सम्बन्ध इति। अथ स्वात्मसत्त्वं सामान्यादिषु, तत्रापि सत्तावदन-वस्थानादिदोषः। अथ प्रतिपदार्थानियतं, तस्य व्यावृत्तरूपतायां सत्

(व्यो०)सदिति ज्ञानजनकत्वं न स्यात्-अस्य ह्यनुगतत्वात्। नान्यथा तदुपपत्तेः। तथाहि-सामान्यादिषु सत्तासमवाये बाधकोपपत्तेः सत्सदिति ज्ञानमुपचरितं। उपचारश्च प्रवर्तमानो निमित्तमपेक्षत इति। स्वात्मना साधारणधर्मेणोपचारनिमित्तेन सत्तावत्त्वं सत्सादिति प्रत्यपजनकत्वम्। यत्र हि सत्ता साधारणधर्मो दृष्ट इति तदुपलंभात्। सत्ताध्यारोपः प्रवर्तत एवेति सामान्यादिषु सत्समवाये बाधकोपपत्तेः। सत्सादितिज्ञानादिति ज्ञानस्यान्यथापि भावादन्यथासिद्धेर्हेतुरिति। न च द्रव्यादिषु सत्सादितिज्ञानस्यासाधारणधर्मादेवोत्पत्तिरिति वाच्यम्। मुख्ये बाधकासम्भवात्। न च मुख्यं विना क्वचिदुपचारो दृष्ट इति, द्रव्यादिषु सत्तासमवायादेव सत्सादिति ज्ञानं दृष्टमिति सिद्धम्।

अन्ये तु सत्सादिति ज्ञानस्य सत्ताविशेषणजनितत्वादेकत्र समवेतत्वेन विशेषणमन्यत्र विशेषणविशेष्यभावेनेत्युभयत्रापि मुख्यतां ब्रुवते। तथाहि-न संयोगसमवायायत्तो विशेषणविशेष्यभावः-अभावे तदभावप्रसंगात्। अथ विशिष्टज्ञानप्रतिबन्धो यत्र हि विशिष्टज्ञानम् तत्र विशेषणविशेष्यभावस्ततो हि सामान्यादिष्वपि सत्सदितिविशेष्यज्ञानोत्पत्तेविशेषणविशेष्यभाव एव सम्बन्ध इति उभयत्रापि मुख्यं सत्सदिति ज्ञानम्।

एतच्चासत्। यत्र हि गुणकर्मसामान्यानां विशेषणत्वम् उभयत्राभिमतं तत्र तत्र समवायेनेति दृष्टम्। सामान्यादिषु सत्तायाः समवायस्य व्यापकस्य व्यावृत्तेर्विशेषणत्वस्य व्याप्यस्य व्यावृत्तिरिति, केवलम् तत्सहचरितधर्मोपलब्धेः सत्ताध्यारोप इति युक्तम्। अन्यथा हि सर्वत्र गौणप्रत्ययोच्छेदो मिथ्याज्ञानस्य चेति। तथा हि-सिंहो माणवक इति माणवकेपि सिंहत्वं विशेषणम्, सिंह इवेति मुख्यमेव ज्ञानं स्यात्। तथा शुक्तिकायां रजतमिति ज्ञाने रजत इव रजतत्वं विशेषणमिति मिथ्यात्वं न स्यात्। अस्ति च मिथ्याज्ञानमिति प्रवक्ष्यामस्तदधिकारे। अथ सिंहत्वायोगिनि माणवके तत्सहचरितधर्मोपलंभात् सिंहत्वाध्यारोपेणोत्पादात् गौणत्वम्। तथा शुक्तिकायां रजतसाधर्म्योपलब्धे रजतत्वाध्यारोपेणोत्पादान्मिथ्यात्वमिति चेत्। कथमेतत्। माणवके सिंहत्वस्य समवायेनानुभवाभावात, तथा शुक्तिकायां रजतत्वसमवायेनानुभवाभा-

(व्यो)वात्। अतः स्मर्य्यमाणास्याध्यारोपेण सिंहत्वस्य माणवके व्यापारः, तथा रजतत्वस्य शुक्तिकायामिति प्रयुक्तम् गौणत्वं मिथ्यात्वं चेति। तर्हि सामान्यादिषु सत्ताध्यारोपेण सत्सदिति ज्ञानं न्याय्यम्—सत्तासमवाये बाधकोपपत्तेरिति। ननु भूतार्थस्य सामान्यादौ सत्सदिति ज्ञाने प्रतिभासनादुपचारः कथम। यत्र हि व्यर्थः प्रथते तदुपचरितज्ञानमन्यथा ह्यध्यारोपाविशेषे मिथ्याज्ञानेऽविशेष एव स्यात्। नैतदेवम्। सिंहत्वायोगिनि पुरुषे प्रतिपद्यमानोपि सिंहोऽयमिति प्रतिपद्यते। न चैवम्। रजतत्वायोगिन्यां शुक्तिकायां यो प्रतिपद्यमानो रजतमिति प्रत्येति। तथाच मिथ्याज्ञाने पश्चात् बाधकं वदेदिति। गौणज्ञाने तु पूर्वमपि बाधकमस्त्येव। केवलं तु शौर्यख्यापनाय माणवकं सिंह इव व्यवहरति। मिथ्याज्ञाने त्वतस्मिंस्तदेवेदमिति मन्यते। अस्ति च सामान्यादौ सत् सदितिज्ञानम्। न चास्य बाधकं कालत्रयेपीत्यत्र शेषमूह्यम्।

अथास्तु सामान्यादावुपचरितं—द्रव्यत्वादौ मुख्यं सत् सदिति ज्ञानं सत्तासम्बन्धस्तु विकल्पते—किं सत्ता सतां अथासतामिति। यदि सतामथ सत्तासम्बन्धात्पूर्वं सत्त्वम् सत्तासम्बन्धेन विना चेति। सत्तासम्बन्धाभ्युपगमे तत्राप्ययं विकल्प इत्यनवस्था।विनेति चेत्। किं सत्तया। अथासतां सत्तासम्बन्धात्सत्त्वमित्यपारमार्थिकम्। तर्हि सत्त्वमुपाध्यपेक्षितत्वात् सदिति चासतां सत्तासम्बन्धेन सत्त्वम्। खरविषाणादीनामपि सत्त्वं स्यात्—असत्त्वाविशेषात्। तथा सत्तायाश्चासत्त्वेन तद्योगान्न द्रव्यादिषु सत्त्वं स्यात्। स्वरूपेण च सत्त्वे द्रव्यादिषु तथा प्रसंगः, सत्तासम्बन्धेन चानवस्थेति। अतोऽर्थक्रियाकारित्वेन सत्त्वमिति शाक्या मन्यन्ते। वर्तमानकालसम्बन्धित्वेनेत्यपरे। तत्र यत्तदवोचाम—किं सतां सत्तासम्बन्धात्सत्त्वमथासतामिति। तदसत् निष्पादसम्बन्धयोरेककालत्वात्। तथाहि पदार्थानां स्वकारणसत्तासम्बन्ध एवोत्पतिर्न पूर्वं सत्त्वम्—सत्कार्यवादप्रतिषेधात्। न चासतां स्वकारणसत्तासम्बन्धाभ्युपगमे खरविषाणादिषु तथाभावप्रसंगः। तदुत्पत्तिकारणाभावस्य तद्भावेनैव निश्चयात्। नित्येषु पूर्वापरभावानुपपत्तेर्विकल्पानुपपत्तिः। न चापारमार्थिकं सत्त्वम् सत्तासम्बन्धस्य परमार्थत्वात्। न च स्फटिकादौ चक्रादिरूपमिवौपाधिकं द्रव्यादिषु सत्त्वम। सत्तायास्तत्र·

(व्ये)समवायात्। उपाधिश्चोपाधीयमानो समवेतो वा क्वचित् समवेतरूपतिरोधायकश्च। तथाहि–स्फटिकादिरूपो रक्तादिद्रव्यसान्निध्यात्तिरोहितो रक्तस्फटिक इति प्रत्ययस्य भावाद्युक्तमौपाधिकत्वम्। न चैवं सत्ता द्रव्यादिस्वरूपम् तिरोधायात्मानं प्रकाशयति–द्रव्यत्वादेरपि प्रतिभासनात्। नाप्यसमवेता तत्र समवायोपलब्धेः। नन्वेवं द्रव्यत्वादेर्व्यतिरेको तर्हि स्वरूपासम्भवाद्द्रव्यादेरप्यदृश्यताप्रसंगः। तन्न द्रव्यत्वादेरेव द्रव्यादिष्वसाधारणत्वात्। तथाहि-द्रव्ये द्रव्यत्वेन सत्ताद्रव्यमिति व्यपदेशो गुणादौ च गुणत्वादिनेति। व्यतिरेकाविशेषेपि द्रव्येष्वेव द्रव्यत्वम् समवेतमिति तत्रैव व्यवहारहेतुर्न गुणादौ। एवं गुणत्वादावपि नियतधर्मिसमवायित्वं नियामकमिति वाच्यम्। समवायस्तु व्यतिरेकेपि समवाय्याधारतयावभासत इति समवायिव्यवहारहेतुरिति। अव्यतिरेके तु द्रव्यत्वादिस्वरूपाणामेकधर्मितादात्म्येनाभेदाद्विभिन्नव्यवहारहेतुत्वं न स्यात्। भेदे वा धर्मिणस्तथाभावो विपर्ययं तादात्म्यविरहात्। न च द्रव्यादिज्ञानस्य कल्पनात्वमिति वाच्यम्। अर्थक्रियान्वयव्यतिरेकानुभवविधायिनः कल्पनात्वे तत्प्रसंगादिति सिद्धम्। द्रव्यादिषु सत्तासंबंधात्सत्सदिति ज्ञानम्, अर्थक्रियाकारित्वेन सत्ताभ्युपगमे समानं चैतद्दूषणम्–किं सतामर्थक्रियाकारित्वमथासतामिति। सतामर्थक्रियाकारित्वे सत्ताभ्युपगमे तथा दुरुत्तरमितरेतराश्रयत्वम्। तथा ह्यर्थक्रियाजनकत्वे सत्त्वम् सतश्चार्थक्रियाजनकत्वमित्येकाप्रसिद्धावितराप्रसिद्धिरिति। अथार्थक्रियामन्तरेण सतोऽर्थक्रियाजनकत्वम् तत्राप्ययं विकल्प इत्यनवस्था। असत एवार्थक्रियाजनकत्वे खरविषाणादिषु तथाभावः स्यात्। अर्थक्रियायाश्चार्थक्रियांतरेण सत्त्वेऽनवस्था। अथ स्वरूपेणेति चेत्। पदार्थेषु तथाभावप्रसङ्गः। एतेन वर्तमानकालसम्बन्धित्वेन सत्त्वं प्रत्युक्तम्। अथार्थक्रियासामर्थ्यं सत्त्वम्? तस्यानेकपदार्थव्यापित्वेन सत् सदितिज्ञानजनकत्वे संज्ञाभेदमात्रम्। अव्यापित्वे त्वनुगतज्ञानजनकत्वं न स्यात्। तथार्थक्रियाजनकत्वे अर्थक्रियासमर्थ इति व्यवहारो न सत् सदितिविलक्षणत्वादित्यलम्। अतः स्थितमेतत्–द्रव्यादीनां सत्तासम्बन्ध इति।

तथा सामान्यमेव द्रव्यव्यावृत्तिहेतुत्वाद्विशेषो द्रव्यत्वादिः स

(व्यो०)विद्यते येषाम् तानि सामान्यविशेषवन्ति तेषां भावः सामान्यविशेषवत्त्वम् । समवेतः सामान्यविशेषस्तदुपलक्षितो वा समवायः तेन सत्ता सामान्यविशेषवद्द्रव्यमित्यादिव्यवहारदर्शनात् ।

तथा स्वसमवाये स्वशास्त्रेऽर्थशब्देनाभिधीयन्त इति स्वसमयार्थशब्दाभिधेयानि तेषां भावः—स्वसमयार्थशब्दाभिधेयत्वं वाच्यवाचकालंबनं ज्ञानमेव साधर्म्यम् । अर्थसंज्ञाकरणे च प्रयोजनम्–श्रोत्रग्राह्योर्थः शब्द इति २ अ० २ आ० २१ सूत्रे । तथाहि श्रोत्रग्राह्यत्वाच्छब्द इत्युक्ते शब्दत्वादिभिर्व्यभिचारः तन्निरासायार्थग्रहणम् । अर्थस्तु द्रव्यकर्मात्मा गुणात्मापि भवति । न च श्रोत्रग्राह्य इत्येतत्समुदितं शब्दस्य लक्षणम । तथा धर्माधर्मौ कुर्वन्तीति धर्माधर्मकर्तृणि तेषां भावो धर्माधर्मकर्तृत्वम् । तच्च द्रव्यादीनामात्मीयं रूपं सहकारिविशेषश्च तथाच द्रव्यमात्मा धर्माधर्मयोः समवायिकारणम् । सुवर्णादिद्रव्यं च दानापहरणाभ्यां निमित्तकारणमिति । तथात्मान्तःकरणसंयोगोऽसमवायिकारणम् । शुद्धाभिसंधिर्दुष्टाभिसंधिश्च निमित्तकारणम् एवंगीतिविशेषो नृत्यविशेषश्च यथासंभवं निमित्तमिति शेषमूह्यम् । न तु सुवर्णादिद्रव्यवज्जातिरप्यदृष्टकारणम् । अस्तु वोपलक्षणेन चरितार्थत्वात् ।

(भा०) कार्यत्वानित्यत्वे कारणवतामेव ॥

(सू०) कारणवतामेवेति । द्रव्यादीनां त्रयाणामित्यनुषज्यते–कार्यत्वं–समवायावच्छिन्नजन्यत्वम् । अनित्यत्वं–विनाशिभावत्वम् । नातो ध्वंसे प्रागभावे चातिप्रसङ्गः ॥

(से०) कार्यत्वेति । त्रयाणां कारणवतां साधर्म्यम । कार्यत्वं यदि प्रागभावप्रतियोगित्वं तदा ध्वंसेऽप्यनित्यत्वम् । यदि ध्वंसप्रतियोगित्वं तदा प्रागभावेऽप्यस्तीत्युभयत्र विशेषणं सत्तेति आचार्यचरणाः । वयन्तु–कार्यत्वं प्रागभागप्रतियोगित्वमेव । न च ध्वंसेऽतिव्याप्तिः तत्र घटादेः प्रागभावस्थानीयतया प्रागभावप्रतियोगित्वाभावात् । अनित्यत्वमपि ध्वंसप्रतियोगित्वमेव । न च प्रागभावेऽतिव्याप्तिः तत्र घटादेर्ध्वंसस्थानीयत्तया ध्वंसप्रतियोगित्वाभावात् । नहि घटादिः प्रागभावो ध्वंसो वा तल्लक्षणाभावादिति व्यर्था सत्तेति वदामः ॥

(व्यो०) कार्यत्वं चानित्यत्वं च कार्यत्वानित्यत्वे द्रव्यादीनां त्रयाणामपि। यदि नाम कारणं विद्यते येषां तानि कारणवन्ति तेषामेव पूर्वपूर्वधर्मस्तु सर्वेषामिति लक्ष्यते, सापवादत्वाविशेषेपि कारणवत्त्वपेदनासमासकरणमनयोः साहचर्यज्ञापनार्थम्। यदि वा कारणवतामकारणवतां च कारणवतामित्यसमासकारणम्। अथ किमिदं कार्यत्वं नामेति ? स्वकारणसत्तासम्बन्धस्तेन सत्ताकार्यमिति व्यवहारात्। अभूत्वा भवनमित्येके। अत्राप्यभूत्वा पश्चाद्भवनं स्वकारणैः सत्तया च सम्बन्ध एवेति। अनित्यत्वं तु प्रागभावप्रध्वंसाभावोपलक्षिता वस्तुसत्ता। अथ वस्तुसत्ताकाले प्रागभावप्रध्वंसाभावयोरभावात् कथमुपलक्षणत्वम्। न चानित्यव्यवहारे सत्ता विशेषणम् विलक्षणत्वात्। तथाहि—सत्ताविशेषणं सत्संदिति ज्ञानमेव, ज्ञानान्तरे तु सत्तायां विशेषणत्वेन सर्वत्र सत्तैव विशेषणं स्यादित्यतिप्रसंगः। तस्माद्यत् भूत्वा भवत्यात्मानं जहाति तदनित्यमिति कोचित्। तदप्यसत्-विनाशस्य वस्तुकाले असंभवित्वेन विशेषणत्वायोगात्। अथाविद्यमानोपि विनाशोऽनुमीयमानो भवत्युपलक्षणमिति चेत्। तथापि विनाश इति स्यात् नानित्यमिति। अनित्या विषया विनाशिन इति व्यवहारः। यदि चानित्यज्ञानेऽन्यं निमित्तं न स्यात् प्रतिपद्येमहि ह्युभयान्तोपलक्षिता सत्ता विशेषणमिति। यथोत्पत्तिविनाशयोरविद्यमानयोरपि कयाचित् भंग्या सत्तोपलक्षणत्वम् तथा वस्तूपलक्षणतायामपि न कश्चिद्बाधकमस्तीति। तथाहि—प्रागभावस्स्मर्यमाणः प्रध्वंसाभावश्चानुमीयमानो वस्तूपलक्षणमिति। अथ विनाशानुत्पत्तिरनुत्पत्तिविनाशश्च विद्यमानत्वात् सत्ताविशेषणमिति चेत्। परमार्थस्य विशेषणत्वं तयोः कल्प्यतां किमिति प्रयासेन। अथानित्यज्ञानमभावानुरक्तं न भवतीति विशिष्टसत्ता विशेषणमुपकल्प्यते। न सत्तानुरागस्यानुपलब्धेः केवलमनित्यत्वानुरक्तमनित्यमिति ज्ञानमुत्पद्यते। अनित्यत्वं तु प्रागभावप्रध्वंसाभावोपलक्षिता वस्तुनः सत्तेति। इति उद्योतकरकल्पनायां कल्पनागौरवं स्यादिति प्रध्वंस एवानित्यत्वमितीष्टं भाष्यकारेणेति।

(भा०) कारणत्वं चान्यत्र पारिमाण्डल्यादिभ्यः॥

(सू०) पारिमाण्डल्यं परमाणुपरिमाणम्। आदिपदेन द्व्यणु-

(मू०)रूपरिमाणं परममहत्त्वं आत्मविशेषगुणाश्च गृह्यन्ते, तथाच तेभ्योऽन्यत्र द्रव्यादीनां त्रयाणां कारणत्वं—निमित्तान्यकारणतावच्छेदकजातिमत्त्वम्। ज्ञानादिकमिच्छादौ निमित्तकारणमेव परिमाणस्य चाणुत्वमहत्त्वत्वादिना न परिमाणहेतुत्वं परन्तु विततहस्तत्वादिजात्यैवेति न परमाणुत्वादावतिव्याप्तिः।किरणावल्यान्तु-'पारिमाण्डल्यादिभ्य' इत्यत्रादिपदेन परममहत्त्वमन्त्यावयविगतरूपरसगन्धस्पर्शपरिमाणानि द्वित्वाद्विपृथक्त्वपरत्वापरत्वानि विनश्यदवस्थद्रव्यगतसंयोगविभागकर्माणि शब्दाजनकशब्दश्चरमः संस्कारस्तादृशज्ञानं च परिगृहीतानि। कारणत्वं च ज्ञातृधर्मेतरभावं प्रति फलोपधायकत्वमिति व्याख्यातम् । तन्मते सुखदुःखादेरजनितरूपादेः प्राक् नष्टपरमाणुरूपादिकस्य च लक्ष्यत्वात्तत्राव्याप्तिवारणप्रकारः परिचिन्तनीयः ॥

(से०) कारणत्वमिति। ननु त्रयाणामेतल्लक्षणं नोपपद्यते सामान्यादौ गतत्वात्तेषामप्यनुगतत्वप्रत्ययादिकारणत्वात् । अन्यत्र पारिमाण्डल्यादिभ्य इति चायुक्तं पारिमाण्डल्यस्य परमाणुपरिमाणस्यापि ज्ञानकारणत्वात्। न च तत्कथं ज्ञानकारणं लौकिकप्रत्यक्षस्य तत्राभावात्, अलौकिकप्रत्यक्षस्य विषयाजन्यत्वादिति वाच्यम्। प्रमेयत्वानिति सामान्यप्रत्यासत्तिप्रभवेऽनुभवे प्रमेयलक्षणसामान्यान्तर्गतस्य परमाणुपरिमाणस्यापि कारणत्वात्। न च प्रमेयानामननुगततया प्रमेयत्वेनानुगमे प्रमेयत्वमेव सामान्यप्रत्यासत्तिरिति वाच्यम्। सामान्यप्रत्यासत्तेश्च स्वप्रकारकबोधजनकत्वनियमेन प्रमेयत्वस्य प्रत्यासत्तित्वे प्रमेयमित्याकारकप्रमेयत्वप्रकारकबोधापत्तेः। यतः सामान्यप्रत्यासत्तेः स्वप्रकारकबोधजनकत्वावश्यकता अत एव सामान्याज्ञातमास? (सामान्याज्ञातानामन्त्य) कर्मणामुत्पत्तिसमये द्रव्यस्य विनश्यत्ता तैरपि किमपि न जन्यते अग्रिमक्षणे आश्रयस्यैव विनाशादिति तेपि प्रथमशब्दादिनाऽग्रिमशब्दादिजननादन्त्यशब्दः संस्कारेण ज्ञानेतराजननात्सर्वसंस्कारः चरमज्ञानं चादिपदेन गृह्यते, ततः समयसमाप्यसंस्कारसमुदयेऽपि तस्य ज्ञातृ-

(से०)धर्मत्वात् । एवं च यत्सुखादिज्ञातृधर्मेतराजनकं तत्राप्यादिपदं पदमादधाति । न हि सर्वस्य सुखादेः स्वज्ञानातिरिक्तजनकत्वे प्रमाणमस्ति । यद्यपि वारितेसु कौश्चिद्रसो ? जन्यत एव तथापि स न प्रागुक्तनयेन कार्य इति ज्ञातृधर्मेतरकार्याजनकत्वमदुष्टमिति संक्षेपः ॥

(व्यो०) तथा कारणानां भावः कारणत्वम् समवायिनोऽ समवायिनश्चात्मोयं स्वरूपं निमित्तकारणत्वम् । सामान्यादिष्वपि भावात् । तच्च प्रतिनियतमप्यविवक्षितविशेषं साधर्म्यम् ! तर्हि सर्वेषामित्यतआह-अन्यत्र पारिमाण्डल्यादिभ्य इति । पारिमांडल्यादीनि वर्जयित्वा । परिमण्डल्याः परमाणवस्तेषां भावः पारिमांडल्यं परमाणुपरिमाणम् । तच्च द्व्यणुकाणुपरिमाणोत्पत्तावकारणमिति वक्ष्यामः परिमाणावसरे । आदिपदेनाकाशादिविभुद्रव्यमंत्यशब्दः परत्वापरत्वपृथक्त्वाद्यकारणमिति ॥

(भा०) द्रव्याश्रितत्वं चान्यत्र नित्यद्रव्येभ्यः ॥

(सू०) द्रव्याश्रितत्वं-समवेतसत्त्वं, समवेतत्वसम्बन्धेन द्रव्यवत्सत्त्वं वा, द्रव्यादीनां त्रयाणां मध्ये नित्यद्रव्येभ्योऽन्यत्रेत्यर्थः। संयोगेनाश्रितोऽपि परमाणुर्न समवेतः । द्रव्यसमवेतानपि सामान्यविशेषौ न सन्तावितिं तेषां व्युदासः । चकारान्नित्यद्रव्यान्यजातिमत्त्वस्योपग्रहः । द्रव्याश्रितत्वं द्रव्यासमवायिकारणकत्वं नित्यद्रव्येभ्यो नित्यगुणेभ्यश्चान्यत्र द्रव्यादित्रयाणां साधर्म्यम् ! चकारेण नित्यगुणस्यापि समुच्चयादित्यपि वदन्ति ॥

(से०) द्रव्याश्रितत्वं चेति । इदं च यदि द्रव्यसमवेतत्वं तदा सामान्यादावतिप्रसङ्ग इति द्रव्यसमवायिकारणकत्वं विवक्षितम् । नित्यद्रव्येभ्य इत्युपलक्षणं नित्यगुणेभ्य इत्यपि द्रष्टव्यम् । नित्यवर्गं विहाय त्रयाणां द्रव्यसमवायिकारणकत्वमित्यर्थ इत्याचार्याः । समवायिकारणकत्वमात्रं तु तेषां तात्पर्यविषयो द्रव्यपदवैयर्थ्यात् । आद्यसंयोगविभागौ प्रति कर्मासमवायिकरणं। संयोगजविभागजौ प्रति तु संयोगाविभागौ। वेगवतावयवेनारब्धावयविवेगे वेग एवासम-

(से०)वायिकारणम्। प्रक्षिप्तेष्वादिवेगे तु कर्म। एवं च कर्मासमवायिकारणकान्गुणान् विहाय अनित्यानां त्रयाणां गुणासमवायिकारणकतेति चार्थ इति आचार्याः। तत्र द्रव्यं प्रत्यवयवसंयोग एवासमवायिकारणम्। गुणेषु वैशेषिकानां पीलुपाकवादितया पृथिवीपरमाणुरूपरसगन्धस्पर्शान्प्रति तेजसंयोगः, द्व्यणुकरूपादीन्प्रति अवयवरूपादयः, नैयायिकमते तु केषुचित्पार्थिवावयविरूपादिष्वपि तेजःसंयोगाऽसमवायिकारणकता पिठरपाकवादिमते।अवयव्येकत्वसंख्यां प्रत्यवयवैकत्वं, द्वित्वादिकं प्रति तु समानाधिकरणैकत्वम्, द्व्यणुकपरिमाणं प्रति परमाणुद्वित्वं, त्र्यणुकपरिमाणं प्रति द्व्यणुकबहुत्वम्। अन्येष्ववयविपरिमाणेषु क्वचित् प्रचयाख्यसंयोगो यथा तूलपिण्डद्वयसंयोगात् महत् तूलपिण्डपरिमाणम्। प्रचयत्वञ्च संयोगे जातिविशेषः। क्वचित् कारणगतम्महत्त्वं यथा कपालादिपरिमाणाद् घटादिपरिमाणम्। क्वचिद्बहुत्वसंख्या यथा समानपरिमाणप्रचयचतुस्तन्तुकपटावधिकचतुस्तन्तुकपटमहत्त्वम्प्रति तन्तुगतचतुष्ट्वम्।अवयव्येकपृथक्त्वं प्रत्यवयवैकपृथक्त्वम्। द्विपृथक्त्वादि प्रति तु समानाधिकरणैकपृथक्त्वम्। संयोगाविभागौ प्रति तूक्तमेव। कालकृते परत्वापरत्वे प्रति कालपिण्डसंयोगः। दिक्कृते प्रति दिक्पिण्डसंयोगः। अवयविगुरुत्वं प्रति अवयवगुरुत्वम्। सांसिद्धिकावयविद्रवत्वं प्रति अवयवद्रवत्वम्। नैमित्तिकद्रवत्वम्प्रति तेजःसंयोगः। अवयविस्नेहं प्रति अवयवस्नेहः। वेगं प्रति निरुक्तमेव। स्थितिस्थापकमवयविगतं प्रति अवयवगतं स्थितिस्थापकम्। बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाः प्रत्यात्ममनःसंयोगः। शब्दं प्रति संयोगविभागशब्दाः। आद्यं कर्म पतनं प्रति गुरुत्वम्। स्यदनम्प्रति द्रवत्वम्। वह्नेरूर्ध्वज्वलनं प्रति वायोस्तिर्यग्गमनम् प्रति चादृष्टवदात्मसंयोगः। शरीरक्रियां प्रति प्रयत्नवदात्मसंयोगः। द्वितीयादिक्रियां प्रति तु वेगः। एवं च द्रव्ये संयोग एवासमवायिकारणम्। गुणे संयोगो गुणान्तरं कर्म च। कर्मणि संयोगो गुणान्तरं च। तथा च संयोगविभागकर्मजवेगभिन्नानामनित्यानां द्रव्यादीनां गुणानां समवायिकारणकत्वं लक्षणारहितं लक्षणमिति। गुणपदं चेह लक्षण आवश्यकम्, अन्यथा समवायिकारणकत्वस्य कर्मसमवायिकारणकेपि सत्त्वादतिव्याप्त्यापत्तेरिति॥

(व्यो०) न च परं पूर्वसाधर्म्यं द्रव्याश्रितानामभावो द्रव्याश्रितत्वं सेति । तच्चान्यत्रं नित्यद्रव्येभ्यस्तेषामाश्रयाभावात् । यद्यपि स्व षष्णामाश्रितत्वाभिधानेन द्रव्यादीनामाश्रितत्वमुक्तम् । तथापि द्रव्योपलक्षितस्येहाभिधानादपुनरुक्तमिति ॥

(भा०) सामान्यादीनां त्रयाणां स्वात्मसत्त्वं बुद्धिलक्षणत्वमकार्यत्वमकारणत्वमसामान्यविशेषवत्त्वं नित्यत्वमर्थशब्दाभिधेयत्वं चेति ।

(सू०) सामान्येति । सामान्यविशेषसमवायानां स्वात्मकमेव सत्त्वम् स्वरूपसत्त्वं न सत्ताजातिरित्यर्थः । बुद्धिलक्षणत्वं-बुद्धिं प्रत्येव जनकत्वं बुध्यन्यभावजनकावृत्तिभावविभाजकधर्मवत्त्वमिति यावत् । सामान्यमनुगतबुद्धौ विषयविधया विशेषो लिङ्गविधया व्यावृत्तत्वबुद्धौ समवायः संनिकर्षविधया प्रत्यक्षबुद्धौ कारणं, द्रव्यादित्रिकन्तु बुद्धिभिन्नेऽपि द्रव्यादौ कारणमतो न तत्रातिप्रसङ्गः । यद्वा बुद्धेर्बुद्धिविशेषस्य सामान्यशून्यभावत्वप्रकारकयथार्थज्ञानस्य लक्षणत्वं विशेषत्वमित्यर्थः । अकारणत्वं–निमित्तकारणतान्यकारणताशून्यभावत्वम् । असामान्येति । सत्तावान्तरजातिशून्यभावत्वमित्यर्थः । नित्यत्वं–विनाश्यवृत्तिभावविभाजकधर्मवत्त्वं, नातो नित्यद्रव्यादावत्यन्ताभावादौ च प्रसङ्गः । अर्थेति । असमयार्थशब्दाप्रतिपाद्यत्वमित्यर्थः । चकारेण जन्यावृत्तिभावविभाजकधर्मवत्त्वाद्युपग्रहः । इतिर्दिगुपदर्शनार्थः, तेन द्रव्यगुणयोः कर्मान्यसत्त्वं सामान्यविशेषयोर्निःसामान्यसमवेतत्वमित्याद्यपि द्रष्टव्यम् ॥

(से०) स्वात्मसत्त्वमिति । स्वात्मसत्त्वं प्रामाणिकत्वं द्रव्यादावपीति सत्ताराहित्यमित्यर्थः । बुद्धिलक्षणत्वं यदि बुद्धिरूपव्यावर्तकवत्त्वं तदाऽनुगतबुद्धिकारणत्वादेर्व्यावर्तकतया तदन्तर्गर्भतया बुद्धेरपि व्यावर्तकतयाऽसंभवासंभवेऽपि बुद्धिव्यावर्त्यात्मादावतिव्याप्ते-

(से०)रवारणात्। यदि च बुद्धिप्रमाणकत्वं बुद्धिरूपप्रमाविषयत्वं तदा-व्यतिव्याप्तिः वन्ह्यादीनां व्याप्तिज्ञानादिप्रमाणकत्वात् सर्वत्र बुद्धेरेव प्रमाणत्वाच्च। नापि बुद्धिमात्रप्रमाणकत्वं, सामान्ये चक्षुषोऽपि प्रमाणत्वात्। नापि बुद्धिमात्रप्रमाविषयत्वं, बुध्यतिरिक्तायां प्रमाया अन्यत्राप्रसिद्धेः। नापि बुद्धिरन्यथानुपपत्तिः कल्प्यते बुद्ध्यनुमेयात्मस्य तस्य सामान्यादाविवात्मादावपि सत्त्वात्। नापि बुद्धिमात्रानुमेयत्वम् आत्मादेस्त्विच्छादिनाप्यनुमानं, सामान्यविशेषसमवायानान्त्वनुगतबुद्ध्यादिनैवानुमानं कार्याणां तेषां कारणत्वेनैवेवं कल्पनादिति। एवमिन्द्रियेष्वतिव्याप्तेः तत्रापि रूपादिबुद्धेरेव कल्पकत्वादनुगतव्यवहारेणापि तत्कल्पनाच्चेति चेत्। अत्र वर्धमानोपाध्यायाः-निःसामान्यत्वप्रकारकभावविषयकयथार्थबुद्धिविषयत्वम्-अनुगतबुध्याद्यन्यतमबुध्यसाधारणकारणत्वं वा विवक्षितमित्याहुः। अत्रान्तिमं संयोगेऽतिव्याप्तं-तेनापि इह कुण्डे बदरमित्यादिइहेतिबुद्धिसमुत्पादनात्। संयुक्तोऽयं संयुक्तोऽयमित्याद्यनुगतावगतिजननात्, द्रव्यमितरेभ्यो भिद्यते संयुक्तत्वादितीतरभेदबुद्धिजननाच्च। न चैकमात्रव्यावर्तकत्वमपैति तन्तुरूपादौ सत्त्वात्। अनुगतबुध्यादेः प्रागभावेष्वतिव्याप्तेश्च। ननूत्पत्तिमत्त्वेन प्रागभावत्वेन कार्यकारणभावे कथं तन्मात्रनिष्ठकार्यताकारणतावच्छेदकत्वमसाधारणत्वम्, तन्मात्रकारणत्वं तु नासाधारणत्वम् स्वप्रत्यक्षेऽपि क्षमत्वादिति चेन्न। विशेषकारणतां विनाऽभावान्तरसत्तयाऽशेषकारणतयोत्पन्नस्याप्युत्पत्त्यापत्त्या तत्प्रागभावत्वेन तदुत्पत्तिमत्त्वेन कार्यकारणाभावे कारणेऽसाधारणत्वस्य विशिष्टशापेनाप्यपहस्तितुमशक्यत्वात्। आद्यमभावेऽतिव्याप्तम्—सामान्याभावौ निःसामान्यौ इति प्रमितिविषयत्वसत्त्वात्। अत्र भावस्यापि सामान्यस्य भानात्। तस्मान्निःसामान्यभावत्वमेवानेन विवक्षितमिति।

अकार्यत्वमिति। नात्र बहुव्रीहिः अनुगतप्रत्ययादेः कार्यस्य सत्त्वात्। किन्त्वनादित्वम्। ननु सामान्यादयस्सादय एव किं न भवन्तीति चेन्न। नैतेषां निमित्तकारणात्केवलादुत्पत्तिः भावकार्ये तथात्वादर्शनात्, अपि तु समवायिकारणासमवायिकारणेऽपि वाच्ये। तत्र गुणकर्मणोः समवेतस्य सामान्यस्य न तयोरेव समवायिकारणत्वं तयोरतथात्वात्। न चान्यतः तत्रैव तत्सा-

(से०) मान्यसत्त्वेऽसंभवातिव्याप्त्योः प्रसंगात् अन्यसमवायिकार्यस्यान्यत्रासमवायात् । एवं च गुणादिवृत्तिसामान्यदृष्टान्तेन द्रव्यवृत्तेरपि तस्यानादित्वम् स्यादेव । किञ्च घटसमवायिकारणकस्य घटत्वस्य घटोत्पत्त्यनन्तरमुत्पत्तिर्वाच्या-कार्यकारणयोरेककालोत्पत्तिकत्वाभावात् । तथा च प्रथमक्षणे स घटो न स्यात् घटत्वाभावात् । घटत्वात्यन्ताभावानधिकरण इति चेत् , तदपेक्षया घटत्वाधिकरणं घट इत्यस्य लघुत्वात् । तस्य सादित्वासिद्धौ गौरवस्य प्रामाणिकत्वात् । किञ्च प्रथमे क्षणे घटत्वसमानशीलतया पृथिवीत्वस्याप्यभावेन कारणतावच्छेदकस्य दण्डादाविव तत्पूर्ववर्तितानैयत्येन द्वितीयक्षणे गन्धोत्पत्तिगन्धोऽपि न स्यात् । ननु पृथिवीत्वेन न गन्धसमवायिकारणता सुरभ्यसुरभिकपालस्थे घटे गन्धप्रागभावासत्त्वात् तत्र च गन्धानुत्पत्त्या प्रागभावस्यानन्तत्वापत्त्याऽत्यन्ताभावस्वीकारेऽत्यन्ताभाववतस्तस्य समवायिकारणत्वाभावात् समवायिकारणे कार्यात्यन्ताभावाभावादिति चेन्न । विजातीयगन्धप्रागभावत्वाच्च पृथिवीत्वेनापि कारणत्वे पृथिवीत्वस्य करणतावच्छेदकप्रवेशेन पूर्वमपेक्षणात् तृतीये क्षणे गन्ध उत्पद्यते । पृथिवीत्वात्यन्ताभावानधिकरणत्वं वाऽवच्छेदकमिति चेन्न । एतावत्कल्पनातः तदन्तादिकत्वकल्पनाया एव लाघवेनोचितत्वात् । अपि च द्रव्यत्वेन भावकार्यत्वेन जन्यजनकभावः; न च प्रथमक्षणे भवन्मते द्रव्यत्वमस्तीति जनकतावच्छेदकावच्छिन्नजनकाभावात कथं द्वितीयक्षणे द्रव्यत्वाद्युत्पत्तिः; तृतीयक्षणेऽपि च द्रव्यत्वोत्पत्तिर्दुर्घटा प्रथमक्षणे द्रव्यत्वाभावेन द्वितीयक्षणे द्रव्यत्वाभावात्तत एव चतुर्थादिक्षणेपि, तथाच द्रव्यत्वाभावेन जगति भावो न द्रव्यो भवेत् । अपि च द्रव्यत्वं कथं प्रयोजकं आत्माश्रयात् । न च द्रव्यत्वात्यन्ताभावानधिकरणत्वेन भावकार्यकारणत्वेनैव दूषणमिति वाच्यम् । गौरवात् द्रव्यत्वस्य सादित्वे सिद्धे लाघवमुपेक्ष्यानेन रूपेण कार्यकारणभावासिद्धिः, सिद्धे चास्मिन्दूषणभावे द्रव्यत्वस्य सादित्वसिद्धिरित्यन्योन्याश्रयात् । ननु भवतु तर्हि द्रव्यत्वमनादि सामान्यान्तरन्तु द्रव्यगतं सादि स्यात्, तत्रैषां दोषाणामसंभवादिति चेन्न । सामान्यस्यानादित्वे लाघवेनसामान्यत्वस्यावच्छेदकत्वं संभवति प्रमाणं विनोत्सर्गमुल्लंघ्य तद्विशेषस्यावच्छेदकत्वाकल्पनात् । तस्मात्सामान्यमनादि । समवायस्य

(से०) सादित्वे प्रथमादित्वे प्रथमादिक्षणे संबन्धाभावेन कारणतावच्छेदकस्य द्रव्यत्वस्याभावे द्वितीयादिक्षणे समवायानुत्पत्तिप्रसङ्गः। गुणादेर्जन्यधर्माश्रयतया द्रव्यत्वं च। न च गुणादिसमवायोऽनादिः सादिस्तु द्रव्यस्यैवेति वाच्यम्। समवायस्य लाघवेनाकाशवदेकत्वात्।विशेषस्य सादित्वे प्रतिव्यक्तिविशेषानेकत्वे गौरवम् अत एकविशेषोत्पत्तेः पूर्वन्तदाश्रये व्यावृत्तये विशेषान्तरस्यवश्यकत्वात, व्यावर्तकधर्मं विना व्यावृत्तेरसत्त्वादिति दिक्॥ आचार्यचरणैस्तु–सामान्याद्यनादित्वावेदकं प्रकारान्तरमुक्तम्। अर्थोऽयं वर्द्धमानेन्दुकिरणावलीभास्करयोरेवोपवर्णित इति नेहोच्यते।

अकारणत्वं ज्ञातृधर्मेतरकार्याजनकत्वम् अनुगतबुद्ध्यादौ कारणत्वात्। असामान्यविशेषवत्वं–द्रव्यत्वादिरूपसामान्यविशेषराहित्यम्। न चात्र वैयर्थ्यशंका, अखण्डाभावे तदभावात्। सामान्याभावे विशेषाभावो इति करणेऽभावान्तरस्यैव भावात् प्रकृतविशेष्यव्यवस्थितेः।

नित्यत्वं–ध्वंसाप्रतियोगित्वं तच्च भावत्वे सत्यकार्यत्वात्। अर्थशब्दानाभिधेयत्वं–पूर्वोक्तार्थशब्दाभिधेयत्वाभावः। एषु यल्लक्षणमभावेऽतिप्रसक्तं तद्भावत्वेन विशेषणीयम्। चकारादकारणकत्वम्।

ननु सामान्यादिषु कथं न सामान्यम्। ननु समवायस्यैकतयाऽनुगतबुध्यविषयतया तदर्थमंगीकार्यस्य सामान्यस्य नाङ्गीकार्यता, विशेषस्याप्यप्रत्यक्षतया तदविषयतया निष्प्रयोजनत्वादिति चेन्न। समवायशब्दप्रवृत्तिनिमित्तत्वेन धर्मकल्पनायामखण्डत्वेन लघुतया तत्स्वीकारौचित्यात्, विशेषे योगिनामनुगतबुद्धिसम्भवात् सामान्ये बाधकानुपन्यासाच्चेति चेन्न। समवायस्य लाघवेनैकतयाऽनेकवृत्तिसामान्यानाश्रयत्वात्। सामान्यविशेषयोरनवस्थारूपहानी एव निःसामान्यत्वप्रयोजिके।

ननु सामान्ये सामान्यस्वीकारेपि तत्र सामान्यास्वीकारे कथमनवस्था। न च सामान्यं यदि सामान्यवत् स्यात् तदपि सामान्यं सामान्यवत् स्यात् इति सामान्यपरंपराप्रसक्त्याऽनवस्थेति वाच्यम्। सामान्यस्य सामान्यवत्ताया सामान्यसामान्यवत्त्वेन व्याप्त्यभावात् आपादकस्य कल्पनसामान्यनिष्ठत्वेनापाद्यस्य कल्पनीयसामान्यनिष्ठत्वेन वैयधिकरण्याच्च। तद-

(से०)पि सामान्यमित्यनेन सामान्यवृत्तिसामान्यग्रहणे तत्सिद्ध्यसिद्धि-भ्यां दोषः-सिद्धावपसिद्धान्तः असिद्धौ चाश्रयासिद्धेरिति। सामान्यत्वं यदि सामान्यवद्वृत्तिभावविभाजकोपाधिः स्यात् सामान्यव्याप्यः स्यादिति प्रकारणानवस्थावस्थानाह्वानमिति चेत्। न, अप्रयोजकत्वात्। सामान्यादि यदि सामान्यवत् स्यात् द्रव्यादित्रितयान्तर्गतं स्यादित्यत्रापि नानुकूलस्तर्कः। विशेषस्य च सामान्यवत्त्वे कथं रूपहानिः। न चैतल्लक्षणस्य निःसामान्यत्वगर्भतया सामान्यवत्तायां सा स्यादेवेति वाच्यम्। सामान्यवत्त्ववादिना विशेषत्वजातेरेव लक्षणत्वेन स्वीकार्यत्वात्। न च विशेषस्य जातिमत्त्वे समानैर्गुणैरिव समानैर्विशेषैरपि कथमत्यन्तव्यावृत्तिरिति वाच्यम्। उपाधिमत्त्वेपि समानत्वसम्भवादुपाधिना साम्येऽपि धर्मिग्राहकप्रमाणसिद्धस्वतोवैलक्षण्येन भेदकतेति जातिपक्षेऽपि न याति। न च विशेषस्य सामान्यवत्त्वे द्रव्यकर्मभिन्नस्य गुणत्वापत्तिः, अप्रयोजकत्वात्। न च कर्मभिन्नत्वे सति सामान्यवत्त्वं गुणत्वमिति गुणलक्षणस्यातिव्याप्तिरेवं स्यादिति वक्तव्यम्। एतस्य तु लक्षणस्य सिध्यनुरोधित्वात्। तस्मात्सामान्यविशेषयोः सामान्यवत्त्वे न बाधकं पश्यामः इति चेत्।

अत्र ब्रूमः-सामान्ये हि न द्रव्यत्वाद्येकैकवृत्तिसामान्यम्-अनेकवृत्तित्वाभावात्। नापि द्र्यादिवृत्ति—तद्विषयकस्यानुगतस्य बोधस्य व्यवहारस्य चाभावात्, द्रव्यवृत्ति सामान्यं गुणवृत्ति सामान्यमित्यादेरनुगतबोधस्य द्रव्यवृत्तित्वादिभिरुपाधिभिरेवोपपत्तेः। न च लाघवादेते व्यवहारा जातिविषया एव, उपाधिविषयकत्वस्य स्फुटम्प्रतीतेः। तस्मात्सामान्यमित्यनुगतमत्यनुसारेण सकलसामान्यवृत्त्यनुगतं सामान्यत्वं सामान्यमित्यादरणीयम्। न चैतदुपपद्यते-सामान्यत्वस्य सामान्यत्वे वृत्तावात्माश्रयापत्तेः। अवृत्तौ जातिमात्रलक्षणत्वानुपपत्तेरव्याप्तेः। तस्मादुक्तोपाधिरेव द्रव्यत्वादिगतं सामान्यत्वम्। न च तस्यापि स्ववृत्तित्वापेक्षा, जातिलक्षणत्वात् तस्य चोपाधिकत्वात्। तस्मान्न सामान्यसमवाययोः सामान्यमिति सिद्धम्। विशेषस्त्ववशिष्यते। तत्रैकद्र्यादिष्वसाधारणानुगतावधारणाभावेनासाधारणजात्यभावेपि विशेषकारणगतधीबलाद्विशेषत्वजातिस्वीकारौचित्यात्। न चात्र समवायोक्तं बाधकम्,

(से०)अनेकवृत्तित्वात्। नापि सामान्योक्तं, विशेषलक्षणत्वेन स्वस्मिन् अभावे चानुगुण्यात् स्वस्मिन् वृत्तावतिव्याप्तेः। न च कल्पोपाधिविषयत्वेनैवोपपत्तिः, उपाधिविषयत्वस्यात्रास्फुटत्वेन जातिविषयत्वे बाधके सत्येवाऽनुगतप्रतीत्यादेरुपाधिविषयत्वोपगमादिति। अत्र ब्रूमः-सामान्यसमवाययोः प्रामाणिके जातिराहित्ये न सामान्यविशेषत्वेऽवच्छेदकेऽनुगतत्वात्, किन्तु सत्तान्यूनवृत्तिन्यूनवृत्तिजातिराहित्येन तच्च विशेषे जातित्वादिना सत्तान्यूनवृत्तेर्विशेषत्वस्य जातेस्तत्राङ्गीकारेऽपि तन्न्यूनवृत्तेः कस्याश्चिदपि जातेस्तत्रानङ्गीकारात्, तत्साधकासाधारणानुगतमतेरभावात्। नन्वेवमाकाशादिष्वपि जातिर्न स्यात् तत्रापि सत्तान्यूनवृत्तिन्यूनवृत्तिजातेरभावादिति चन्न। सत्तान्यूनवृत्तिन्यूनवृत्तिजातिसामान्याधिकरणभावविभाजकोपाधिराहित्यस्य जातिराहित्यावच्छेदकत्वात् आकाशे च तादृशपृथिवीत्वादिसामान्याधिकरणतादृशोपाधेः सत्त्वात्। ननु धर्ममात्रस्य वृत्तितावच्छेदकसापेक्षत्वादात्माश्रयान्योन्याश्रयचक्रकानवस्थान्यतमापत्तेः तथा च जातिराहित्यमनवच्छिन्नमेव सामान्यसमवाययोः स्थास्यति न विशेषे जातौ बाधकाभावात्। कर्मकारणवाच्यवाचकव्याप्यव्यापकभावादौ तु भवत्यवच्छेदकापेक्षा कारणत्वं हि तद्धर्मं कार्यत्वं च न हि दण्डस्य नियमोऽवच्छेदकं विना संभवत्येकदण्डं विनापि घटोत्पत्तेर्दण्डत्वावच्छिन्नं विना तु नोत्पद्यत इत्यस्ति नियमग्रहणार्थमवच्छेदकापेक्षा। कार्येऽपि नियमो न व्यक्तिमात्रेण ग्राह्यो दण्डं विनापि घटोत्पत्तेरिति घटत्वावच्छेदेन कार्यताग्रहः। एवं वाच्यवाचकभावेऽपि अवच्छेदकतया भावोत्तरघटत्वेन घटत्वेन वाच्यवाचकभावाभावाद्वाचके प्रकृतावच्छेदकानङ्गीकारे पटादिशब्दानामपि घटवाचकतापत्तिः वाच्ये तदनङ्गीकारे पटादेरपि प्रकृतपदप्रतिपाद्यतापत्तिरित्यन्यापनोदाय युक्ताऽत्राप्यवच्छेदकोक्तिरेव। धूमत्ववह्नित्वादेरपि व्याप्यव्यापकतावच्छेदकयोरपेक्षा प्रमेयत्वेन तद्वह्नित्वेन च व्यतिचारेण व्याप्तेरग्रहात्। एवमन्यत्रापि। यत्रावच्छेदकग्रहं विना कोपि दोषस्तत्रास्त्ववच्छेदकग्रहो न तु सर्वत्रेति चेन्न। विशेषो न जातिमान् सत्तान्यूनवृत्तिजातिसमानाधिकरणभावविभाजकोपाधिशून्यत्वादित्यत्र तात्पर्यात्। न चात्राप्रयोजकत्वशंकातङ्कण्टकाङ्कुराविर्भावः, निरुपाधित्वात्। वस्तुतस्तु विशेषोऽय-

(से०)मित्यनुगतबोधे यत्किञ्चिदनुगतं परिस्फुरति तस्य जातित्वमाशंक्यते । न च तच्छक्यते-विशेषपदार्थपर्यालोचनया तत्र व्यावर्तकत्वस्यैव परिस्फुरणात् । न च तदतिप्रसक्तम्, अनुगतधर्मेऽतिप्रसक्तेर्दूषणत्वात् । यदि त्वसाधारणमनुगमकमपेक्षितम्, तदा साधारणानुगमकमेव किञ्चिद्विशेषणविशिष्टत्वेनासाधारणानुगमकत्वेन निरुक्तयताम् । तच्च स्वव्यावर्तत्वं यद्यनित्यद्रव्यादिषु स्वतो व्यावृत्तेः किंचिदस्ति तदा नित्यद्रव्यवृत्तित्वे सति स्वतोव्यावर्तकं किञ्चिदस्ति तेनैवान्यथासिद्धौ विशेषासिद्धिप्रसङ्गात् । एवं च धर्मिग्राहकप्रमाणप्रमापितस्वव्यावर्तकत्वावगाहनशीलोऽनुगतां कथं जातिमनुमिनुयात् । यथा सामान्यमिति पुरस्कृतयोगार्थोऽनुगतबोध उपाधिसाधारणोऽसाधारणस्तु जातिमात्रविषयो योगार्थगर्भनिरुक्तरूढ्यर्थाविषयस्तथाऽनन्यव्यावर्तकसाधारणो विशेषाकारानुगतव्यवहारो व्यावर्तकत्वमवलम्बतेऽन्यविशेषासाधारणस्तु स्वव्यावर्तकत्वम्, तथासति कल्पपदार्थाविषयत्वे लाघवम्, जातेः कल्पनीयत्वे गौरवं स्फुटमेव । एवं च नित्यद्रव्याणि परस्परव्यावर्तकधर्मवन्ति परस्परव्यावृत्तत्वादित्यनेन सिद्धे व्यावर्तके विशेषसंज्ञा निवेश्यते तच्च प्रामाणिकधर्मपुरस्कारेणैव युक्तम् । प्रामाणिकं च व्यावर्तकत्वं स्वव्यावर्तकं चेति ताभ्यामेव प्रवृत्तिनिमित्तान्त्यविशेषशब्दप्रयोगे सिद्धेऽनुगतधीरपि तदवलम्बनेन ज्ञानव्यवहारयोस्समानशीलत्वादिति सिद्धं विशेषत्वमपि न जातिरिति संक्षेपः ।

एता युक्तय उच्छिष्टा अनुच्छिष्टा वा इत्यत्र निबन्धसाक्षात्कृतप्राचीननिखिलाक्षचणकणादपक्षानुबन्धिनिबन्धा एव साक्षिण इति किं स्वतः प्रख्यापनेन । ननु सामान्यादेरनादेरपि किं नोच्छेदो ? न च तत्र सादित्वं प्रयोजकम्, प्रागभावेऽभावात्, न च भावोच्छेदे तथा, प्रमाणाभावादिति चेन्न । अनादेरपि प्रागभावस्य भवदुच्छेदः सामग्रीसत्त्वात् घटादेरेव तदुच्छेदकतया तत्सामग्र्या एव तदुच्छेदकसामग्रीसत्त्वात् । न चानादेः सामान्यादेरुच्छेदे किञ्चित्कारणमस्ति, अकारणतया समवायिकारणासमवायिकारणनिमित्तकारणनाशानामसम्भवात्, विरोधिगुणस्यापि नाशकस्य प्रकृते दुर्वचनत्वात् । अहेतुकनाशाभ्युपगमे क्षणिकतापत्तेस्तदक्षेणापि क्षपितुमशक्यत्वात् विलंबप्रयोजकविलंबप्रतियोगिनो भावेन द्वितीयक्षण एव नाशोत्पत्तेः ।

(से०)तस्मादनादिभावस्यानन्तत्वमिति सिद्धम् । चकारात् कारणवद्वृत्तिभावविभाजकोपाधिरहितभावत्वं विवक्षितम् अकारणत्वस्याप्यकाशादावतिव्याप्तेः। अविशेषामनित्यवृत्तिभावविभाजकोपाधिणामत्वम्, विशेषाणान्नित्य एव वृत्तिः, न त्वानत्यधर्मत्वं परमाणुरूपादावव्याप्तेः । अकर्मणां नित्यवृत्तिभावविभाजकोपाधिमत्त्वं न तु नित्यत्वं घटादावव्याप्तेः । सामान्यान्तानामयोगिप्रत्यक्षवृत्तिभावविभाजकोपाधिमत्त्वं न त्वयोगिप्रत्यक्षत्वम् अतीन्द्रिये द्रव्यादावव्याप्तेः । गुणकर्मणोरसमवायिकारणत्वम् ।

ननु किमिदमसमवायिकरणत्वं ? समवायिकारणभिन्नकारणत्वमिति चेन्न । निमित्तकारणेऽतिव्याप्तेः । निमित्तकारणभिन्नत्वे सति तत्त्वमिति चेन्न । समवायिकारणासमवायिकारणभिन्नकारणस्य निमित्तकारणतयाऽन्योन्याश्रयापत्तेः । समवायिकारणप्रत्यासन्नमवधृतसामर्थ्यमसमवायिकारणमिति चेन्न । तन्तुरूपस्य पटरूपासमवायिकारणतानापत्तेः-पटरूपसमवायिकारणपटेऽप्रत्यासन्नत्वात् । समवायिकारणप्रत्यासन्नत्वं विवक्षितमिति चेन्न । तन्तुद्वयसंयोगस्यापटासमवायिकारणतापत्तेः—तस्य समवायिकारण एव प्रत्यासन्नत्वात् । प्रक्षमपक्षेऽदृष्टस्य सुखाद्यसमवायिकारणतापत्तेश्च-समवायिकारणे आत्मनि समवेतत्वे सति सुखादिकारणत्वात् । न च तल्लक्ष्यमेव, अपसिद्धान्तात् । ननु स्वासमवेतकार्यकारित्वमसमवायिकारणत्वं रूपसंयोगादिसाधारणमिति चेन्न । निमित्तकारणेऽतिव्याप्तेरिति चेत् ।

अत्र प्राञ्चः-कार्यकारणभावलक्षणसम्बन्धनिरूपकसम्बन्धैकार्थसमवायित्वेन कारणत्वमसमवायिकारणत्वं संयोगस्थले कार्यकारणभावलक्षणसम्बन्धो घटकपालस्तन्निरूपकौ सम्बन्धिनौ तत्स्वरूपावेव तन्मन्ध्ये कार्येण घटेनैकार्थसमवायिकपालद्वयसंयोगः । एवं च समवायिकारणप्रत्यासन्नानि सर्वाण्यसमवायिकारणानि संगृहीतानि भवन्ति । रूपस्थले कर्यकारणभावसंबन्धिनौ घटरूपे स्वरूपौ तयोर्मध्ये कारणेन घटेनैकार्थसमवायिकपालरूपम् । एतावता समवायिकारणप्रत्यासन्नानि सर्वाणि संगृहीतनि भवन्ति । ननु तादृशसमवायित्वेन कारणत्वं यद्यसमवायिकारणत्वं तदा कार्यकारणभावः सुखात्मनोस्तन्मध्ये कार्येण कार्यसमवायिनो-

(से०)ऽदृष्टस्य सुखकारणत्वमस्तीति तस्यापि सुखासमवायिकारणत्वापत्तिः । ननु निरुक्तसमवायित्वेन कारणत्वमदृष्टस्य च न तथा कारणत्वं प्रमाणाभावात् किन्त्वदृष्टत्वेनैवेति चेन्न। संयोगादावपि तथा कारणत्वे प्रमाणाभावात्। तथाहि-यदि भावकार्यत्वेन तादृशसमवायित्वेन कारणता तदा यत्र यत्र तत् स्थास्यति तत्र तत्र तथा कारणत्वं वाच्यम् अन्यथाऽतिप्रसङ्गेनावच्छेदकतापत्तेरेवञ्चादृश्येपि तत्सत्त्वेन तस्यापि कारणत्वेऽतिव्याप्तिरापतत्येव । किञ्च तादृशसमवायित्वस्य कपालरूपादावपि सत्त्वेन तस्यापि घटासमवायिकारणतापत्तिः । अकारणत्वेऽतिप्रसंगेन तस्यानवच्छेदकत्वापत्तिः । यदि च तादृशसमवायिसंयोगत्वादिना कारणता द्रव्यत्वादिना कार्यता लक्षणञ्च तादृशकार्यत्वघटितधर्मावच्छिन्नकारणताधारत्वमिति नासम्भवः, तदाप्यापत्तिः कार्यसमवायित्वस्य कपालाकाशसंयोगेऽपि सत्त्वात् । यदि च तादृशसमवाय्यवयवमात्रसंयोगत्वादिना कारणता कार्यद्रव्यत्वादिना कार्यता तदा प्रमाणाभावोऽवयवमात्रसंयोगत्वादिनैव कारणत्वस्यादुष्टत्वात् लाघवात्तस्मात्प्राचामेता वाचो न चारुतामाचरन्तीति । ननु कार्यनाशप्रयोजकनाशप्रतियोगित्वमसमवायिकारणत्वमिति चेन्न । समवायिकारणेऽतिव्याप्तेः । समवायिकारणभिन्नत्वे सतीति चेन्न। निमित्तकारणेऽतिव्याप्तेः। निमित्तकारणभिन्नत्वे सतीत्यपीति चेन्न। पूर्वनयेनान्योन्याश्रयात्। निमित्तकारणभिन्नत्वे सतीत्यत्रापेक्षाबुद्धिभिन्नत्वे सति बुद्धिभिन्नत्वे सतीति वा देयमिति चेन्न। रूपाद्यसमवायिकारणे रूपादावव्याप्तेः। तत्र समवायिकारणनाशादे रूपादिनाशकतया रूपादिनाशस्यानाशकत्वात् । समवायिकारणादिभिन्नत्वे सति कार्यनाशप्रयोजकनाशप्रतियोगिवृत्तिकारणविभाजकोपाधिमत्त्वमसमवायिकारणत्वमिति चेन्न । तादृशकारणविभाजकोपाधेरेव विचार्यमाणत्वात् । ननु यथा प्रतियोगित्वादयः स्वरूपसम्बन्धविशेषास्तथाऽसमवायिकारणत्वमपि, अत एव केषुचिद्ग्रन्थेषु कारणभावस्य स्वरूपसम्बन्धरूपत्वं प्रतीयत इति चेन्न। एवं हि व्याप्त्यादीनामपि तथात्वे प्राचां तन्निरूपणायासवैफल्यात् । तेषां वक्तुं शक्यतया न स्वरूपसम्बन्धविशेषत्वस्वीकार इति चेत् । तथाप्यननुगमादेर्दूषणस्य सत्त्वात्। तेषामुद्धर्तुं शक्यतया नैवमिति चेन्न। प्रकृतेऽपि स्वतोऽस्फुरणमात्रेणोद्धा-

(से०)रगवेषणाननुरोधस्यायुक्तत्वात्। अत एवाखण्डोपाधिविशेषत्वमपि तस्य न स्वीकर्तुमुचितमिति। कारणत्वादिगर्भतया सखण्डत्वेन प्रतीतेश्चेति चेत्।

अत्र ब्रूमः—यत्समवायिप्रत्यासन्नमवधृतसामर्थ्यं तदसमवायिकारणमिति वादिनामपि नासमवायिकारणत्वमनुगतं दण्डचक्रसंयोगेऽतिव्याप्तेः—तस्यापि रूपादिसमवायिकारणदण्डादिप्रत्यासन्नत्वे सति घटकारणत्वात्। यद्यत्समवायिकारणप्रत्यासन्नमित्यादिविवक्षायां च वाचकस्यैकस्याभावेनाननुगमः। नाप्येषां मतेऽसमवायिशब्दो यौगिको असमवायि न कारणं समवायिकारणं यस्येति योगानामसम्भवात् घटस्यासमवायित्वाभावेनेतदसमवायिकारणे संयोगेऽगतेः, संयोगस्यासमवायित्वाभावे द्वितीययोगार्थस्याप्यभावात्। अन्यासमवायिकारणगत्या तृतीयोऽप्यनुपपन्नः। एवञ्चाननुगमायोगार्थयोः प्राचां मतेऽपि तुल्यतया दुष्टं तदुपेक्ष्यादुष्टं मदुक्तमेव मन्तुमुचितम्। इत्थमवयवमात्रसंयोगत्वं द्रव्यासमवायिकारणत्वम्, अपाकजावयविरूपेऽवयवरूपत्वेमवमन्यदपि ज्ञातव्यमिति संक्षेपः। नित्यद्रव्यसमवाययोरसमवेतभावत्वमिति। एतानि लक्षणानि भावस्योपलक्षणत्वमङ्गीकृत्याचार्यैरुक्तानि॥

(व्यो०) इदानीं सामान्यादीनां नैकस्य द्वयोर्वा किं तर्हि त्रयाणामपि साधर्म्यम्। स्वात्मना साधारणधर्मेणोपचारनिमित्तेन सत्त्वं—सत्सदिति प्रत्ययजनकत्वम्, मुख्ये ह्यनवस्थादिबाधकोपपत्तेः। अन्ये तु स्वात्मसत्वं सत्तानधिकरणानां सत्सदितिप्रत्ययजनकत्वमिति ब्रुवते। अत्र हि निमित्तानभिधाने सतां भावः सत्त्वमिति न किञ्चिदुक्तं स्यात्। अथ सत्तानधिकरणानां स्वात्मना निमित्तेन सत्सदितिप्रत्ययजनकत्वम्। तर्हि तस्यानुवृत्तिरूपतायां दोषोपपत्तेः। व्यावर्ततायां चानुगतज्ञानजनकत्वं न स्यादित्युपचारनिमित्तत्वमेव न्याय्यम्। नन्वेवं सामान्यादिषूपचरितं सत्त्वम् स्यादिष्यत एव। सत्त्वं सत्सदितिज्ञानजनकत्वमुपचरितम्। अथोपचरितसत्त्वाभ्युपगमे परमार्थतो सत्त्वं तदिष्टमेव। न परमार्थतः सामान्यादौ सत्सदितिज्ञानमुपचाराभ्युपगमात्। अथ सत्तानधिकरणत्वे सामान्यादेरभावः स्यात्। तदसदत्, साधारणधर्माधिकरणतया प्रमाणसिद्धस्याभावाभ्युपगमे

(ज्यो०)द्रव्यादिषु तथाभावः स्यात्। अतः सामान्यादावुक्तरूपे स्वरूपसत्त्वे न दोष इति । तथा बुद्धिर्लक्षणम् येषां बुध्या वा लक्ष्यन्त इति बुद्धिलक्षणास्तेषां भावो बुद्धिलक्षणत्वम् । सामान्यशब्देनापि अर्थादनुगतव्यावृत्तेहबुध्यन्यतमबुद्धिलक्षणत्वं विवक्षितमिति विज्ञानम् । अनुगता हि बुद्धिर्न विशेषेषु नापि समवायेषु व्यावृत्ता च न सामान्यसमवाययोस्तथेह बुद्धिर्न सामान्यविशेषेष्विति व्यावृत्तस्वाद्वैधर्म्यं स्यादित्यन्यतमग्रहणम् । तच्च सर्वेषु समानत्वादेव साधर्म्यम् । यदि वा बुद्धिर्विशेषणान्तरोपचरिता लक्षणमितरस्माद्भेदकं तच्चाविवक्षितविशेषं साधर्म्यम् । तथाहि-द्रव्यगुणकर्मस्वनुगतसामान्यवशादनुगतज्ञानजनकत्वम्। सामान्यं तु स्वरूपतयैव । तथाऽत्यन्तव्यावृत्ता विशेषेष्वेव अयुतसिद्धेष्वबाध्यमानेहबुद्धिः समवाय एवेति व्यावृत्तावपि बुद्धिवेद्यत्वं समानत्वात्साधर्म्यम् । एवं कार्याणामभावोऽकार्यत्वं-स्वकारणसत्तासम्बन्धाभावः । तथा कारणानामभावोऽकारणत्वम्—समवाय्यसमवायिकारणत्वाभावः । निमित्तकारणत्वं च ज्ञानोत्पत्ताविष्यत एव । तथा न सामान्यविशेषवत्त्वमसामान्यविशेषवत्त्वमपरसामान्याभावः, न तदुपलक्षितः समवायः—समवाये तदभावप्रसंगात् । नित्यानां भावो नित्यत्वमविनाशित्वम्-उभयान्तोपलक्षितसत्तासम्बन्धाभावो वा । तथाहि—कार्यवस्तुनो विनाशित्वं दृष्टम्, सामान्यादेश्चाकार्यत्वदविनाशः । न चाश्रयविनाशाद्विनाशस्तस्यैकाश्रयविनाशेप्याश्रयान्तरे स्वानुरक्तप्रत्ययजनकत्वात्। तथाहि एकाश्रयविनाशेप्याश्रयान्तरे सत्ता सत्सदिति ज्ञानहेतुः। समवायश्चेह प्रत्ययहेतुरित्यनयोराश्रयविनाशान्न विनाशः।तद्यथा नित्याश्रयं सामान्यं समस्ताश्रयविनाशेन निराधारस्याभावाद्विनंक्ष्यतीति । नैतदेवम् । अकार्यवस्तुत्वेनाविनाशित्वसिद्धेः । समस्ताश्रयविनाशेप्यवस्थानमिष्यते । अत एव केवलमाश्रयाभावात् गोत्वादिरूपतया न व्यपदिश्यत इति । अकार्यवस्तुनश्च विनाशे गगनादीनामप्युच्छेदप्रसंगः । अथा-नित्याश्रयस्याश्रयोत्पत्त्यनन्तरं रूपादिवदुपलंभादसिद्धमकार्यत्वमिति चेत्। न उपलम्भस्योभयथा भावात्। न ज्ञायते किं वस्तूत्पत्त्यनन्तरमुत्पद्यते अथाभिव्यज्यत इति। उत्पादे बाधकोपपत्तेरभिव्यज्यत इतीष्यते।तथाहि-द्रव्यस्यैव समवायिकारणत्वविधानेन गुणकर्मणोस्त-

(व्यो०)त्प्रतिषेधात्तदाधारस्योत्पत्त्यभावः। तद्यथा-सामान्याधारस्य युगपदुत्पत्तिं विना समवायिकारणाभावाच्चेति। तथाहि यत्र समवेतं कार्यं तदवश्यं समवायिकारणम् सामान्यस्य क्रमभाविषु स्वाधारेषु सर्वेषु समवायोपलब्धेः सर्वं समवायिकारणमिति। सकलाधारनिष्पत्तावेवोत्पत्तिरिति पूर्वभाविषूपलंभो न स्यात्। अथ सर्गादौ भूयसां स्वाधाराणामुत्पादादुत्पन्नं सामान्यं क्रमभाविष्वाधारेषु समवेष्यतीति चेन्न। कार्यान्तरेष्वदर्शनात्, न हि रूपादिकार्यं स्वाधारेषु समवेतमुपजातमन्येन समवायवृत्त्या संबध्यमानं द्रष्टामिति। न च क्रमेणोत्पद्यमानेष्वन्यत्सामान्यमिति वाच्यम्। भेदे प्रमाणाभावादभेदे त्वनुगतं ज्ञानमेव प्रमाणमिति वक्ष्यामः-सामान्यपरीक्षायाम्। तदेवमुत्पत्तिपक्षे बाधकोपपत्तेर्वस्तूत्पत्त्यनन्तरं समभिव्यज्यत इत्यकार्यत्वान्नित्यत्वं सिद्धम्। एव अर्थशब्दानाभिधेयत्वं च स्वसमयाऽर्थशब्दाभिधेयत्वाभाव इति। यद्यपि द्रव्यत्वादेरेव कार्यत्वादिविधानादिहाकार्यत्वादि लभ्यते। तथापि साधर्म्यस्य विवक्षितत्वादभिधानमिति। सामान्यादीनां कार्यत्वाद्यभावोऽपि सार्धम्यमितीति।

(भा०) पृथिव्यादीनां नवानामपि द्रव्यत्वयोगः स्वात्मन्यारम्भकत्वं गुणवत्त्वं कार्यकारणाविरोधित्वमन्त्यविशेषवत्त्वम् ॥

(सू०) संप्रति द्रव्याणामेव वैधर्म्यमाह पृथिव्यादीनामिति। द्रव्यत्वयोगः-द्रव्यत्वसमवायः। द्रव्यत्वस्य पक्षतावच्छेदकत्वेनोपेक्षयान्वितस्य स्वातन्त्र्येणान्वयः। स्वात्मन्यारम्भकत्वं-स्वसमवेतकार्यजनकत्वम् । गुणवत्त्वं-गुणसमवायित्वम्, नातः स्पन्दादावतिप्रसङ्गः। कार्यकरणाविरोधित्वं-स्वजन्यसंयोगकारणकविभागजनकत्वम्। संयोगविभागकर्मणां वारणाय कारणकान्तम्। अन्त्येति। पृथिव्यादीनां नवानामवयविद्रव्येभ्योऽन्यत्रान्त्यविशेषवत्त्वम्। उभयासमवेतनिःसामान्यधर्मसमवायित्वमित्यर्थः ॥

(से०) द्रव्यत्वेति। अत्र योगग्रहणं समवायसम्बन्धेन द्रव्यत्वं द्रव्यलक्षणमिति बोधयितुम्, एकार्थसमवायादेरन्यत्रापि सत्त्वात्। अनवच्छिन्नस्थित्यपि द्रव्यत्वं पृथिव्यादावेव प्रतीयते न रूपादौ स्वभावादिति बोधयितुं योगग्रहणम्। न च समवायविलम्बाद्विलम्बे किं स्वभावकल्पनयेति वाच्यम्। तस्याप्यविच्छिन्नदेशत्वात्, न हि गौडगुर्जरघटयोरन्तरा घटत्वतत्समवाययोरभावो येन तत्रानुपलम्भस्तत्प्रयुक्तः स्यात् किन्तु व्यक्तिविशेषरूपव्यञ्जकाभावादेव तदनुपलम्भः। काचिदेव व्यक्तिः किञ्चिदेव व्यञ्जयतीत्यत्र तु स्वभाव एव शरणमित्याचार्याः। तेषामयमाशयः—यद्यपि समवायः सर्वत्र तिष्ठति तथापि घटत्वनिरूपितः समवायो घट एव। जातिश्च यद्यप्यवृत्तिन्यायेन सर्वत्र तिष्ठति तथापि वृत्तिः कस्याश्चित् क्वचिदेवेत्यत्राधाराधेययोः स्वभाव एव शरणमिति। ननु द्रव्यत्वे किं प्रमाणम? न तावदनुगताकारौ प्रज्ञाव्यवहारौ आकाशादिसाधारणयोस्तयोः सर्वप्रमातृसाधारणयोरभावात्। न चाकर्णितकणादकथितवर्णानामस्त्येव समस्ततद्बाधितद्रव्येषु द्रव्याकारोऽनुगतो व्यवहारो बोधश्चेति वाच्यम्। मीमांसितमीमांसादर्शनानान्तमःप्रतीतावपि तयोरनुवृत्तेर्दर्शनीकपरिभाषया व्यवहारस्य सर्वसाधारणव्यवहारानङ्गत्वात् तेषां मिथो वैमत्यादिति चेन्न। समवायिकरणतावच्छेदकत्वेन द्रव्यत्वस्वीकारात्। तद्व्यक्तित्वेनैव कारणत्वे व्यक्त्यन्तरे तदभावापत्तेः—व्यक्तित्वस्य गुणादिसाधारण्यात्। गुणवत्त्वेन समवायिकारणतेति चेन्न। प्रथमक्षणिकघटादौ गुणवत्त्वाभावेन कारणतावच्छेदकावच्छिन्नकारणाभावेन द्वितीयक्षणे घटादौ रूपाद्यनुत्पत्त्यापत्तेः। गुणात्यन्ताभावाभाववत्त्वेन तद्विरोधिमत्त्वेन वा कारणतेति चेन्न। जातौ बाधके सत्येवोपाधेः कारणतावच्छेदकत्वकल्पनात्। न चात्र व्यक्तिभेदादिषु किञ्चिद्बाधकमस्ति। नचैवं स्पर्शसमवायिकारणतावच्छेदकत्वेन घाय्वादिषु जात्यापत्तिः, स्पर्शत्वस्य नित्यवृत्तित्वेन कार्यतानवच्छेदकत्वात्। न चानित्यस्पर्शत्वं तथा, वायुत्वस्य वायुपरमाणौ नित्यस्पर्शवति स्पर्शसमवायिकारणतावच्छेदकजातिपरिहारेण सत्त्वादेतज्जातेर्वायुत्वपरिहारेण जलाद्ययवयविनि सत्त्वात् द्व्यण्वद्ययविनि द्वित्यसत्त्वात् परस्परात्यन्ताभावसमानाधिकरणत्वे सति परस्परसामानाधिकरण्येन जातिसाङ्कर्यसौकर्यात्। अपि च गुणात्य-

(से०)न्ताभावात्यन्ताभावतद्विरोधिनोर्गुणगुणध्वंसगुणप्रागभावरूपतया गुणप्रागभावस्य कारणतावच्छेदकतयाऽन्यथासिद्धतया गुणकारणत्वं न स्यात्। न चेष्टापत्तिः, प्रतिबन्धकाभावस्यान्यत्र कारणत्वात्। न च प्रकारभेदेनैकस्यापि कारणतावच्छेदकत्वकारणत्वयोर्विरोधाभावोऽन्यथोद्भूतरूपघटादिगतप्रत्यक्षकारणतावच्छेदकस्य तदभिन्नस्वप्रत्यक्षकारणत्वं न स्यात्, एवञ्च तत्रोद्भूतरूपत्वविषयत्वयोरिव प्रकृते विरोधित्वप्रागभाववतोः प्रकारयोर्भेदोऽस्ति, किञ्च गुणात्यन्ताभावानधिकरणत्वेन जनकतायां न प्रागभावस्य जनकतावच्छेदकता, तथा च किमिति द्रव्यत्वस्वीकार इति वाच्यम्। जातौ बाधकाभावस्यैव तत्स्वीकारबीजत्वेनाचार्यचरणैरुक्तत्वात्। अपि च द्रव्यमिति प्रत्यक्षानुरोधेन द्रव्यत्वजातिस्वीकारः। न च गुणात्यन्ताभावानधिकारणत्वादिस्तर्ह्युपेयः, अतीन्द्रियगर्भत्वात्। तथाहि न तावद्गुणात्यन्ताभावानधिकरणत्वं द्रव्येऽस्ति गन्धाद्यत्यन्ताभावस्य जलादौ सत्त्वात्,किन्तु गुणत्वावच्छिन्नप्रतियोगिकात्यन्ताभावानधिकरणत्वं वाच्यम्,स च प्रतियोगिनां केषांचिद्गुणानामतीन्द्रियतयाऽतीन्द्रिय एव मूर्तत्वावच्छिन्नप्रतियोगिताकमूर्ताभाव इवेति संक्षेपः।

व्यक्तेरभेदस्तुल्यत्वं सङ्करोऽथानवस्थितिः।
रूपहानिरसम्बन्धो जातिबाधकसंग्रहः॥

इति किरणावली विचार्यते। ननु व्यक्तेरभेदो भवतु दूषणं व्यक्त्यैक्येऽनेकवृत्तित्वाभावाल्लक्षणानुपपत्तेः,भवति च सैकवृत्तिर्दूषणं न रूपहानेरतिरिच्यते एकव्यक्तिकसामान्याङ्गीकारेऽनेकवृत्तित्वरूपतद्रूपहानेः। तुल्यत्वं च न जातिबाधकं किन्तु जातिभेदबाधकं घटत्वकलशत्वात्मकैककजातिस्वीकारात् तत्रापि लाघवात्तत्र जातिद्वयकल्पने गौरवापत्तेः। घटकलशादिशब्दानां पर्यायत्वं वा प्रवृत्तिनिमित्तभेदे पर्यायतोच्छेदापत्तेः, न तु तुल्यत्वस्य तत्र प्रयोजकत्वमिति। ननु तुल्यत्वेनैव लाघवावतारः तुल्यत्व एकेनैव तद्व्यवहारोपपत्तौ जातिभेदकल्पनायां गौरवात् पर्यायतानिर्वाहोऽपि तुल्यत्वेनैवेति चेन्न। एवं हि जातिभेदबाधकत्वमपि जातिबाधकत्वाभावात्। जातिसाङ्कर्यस्य च दूषणत्वे प्रमाणाभावः। न च घटो यदि स्ववृत्तिजातिव्याप्यत्वशून्यव्यापकत्वशून्यजातिमान् घटो न स्यात् पटवदिति

(से०)वाच्यम्। अप्रयोजकत्वात्। अनयैव रीत्योपाधिसाङ्कर्यस्यापि दूषणत्वापत्तेश्च। तथाच यथा कांचिदुपाधौ परस्परात्यन्ताभावनियतसमानाधिकरणावेव, कांचित् परस्परव्याप्यव्यापकभावापन्नौ, कांचित् परस्परात्यन्ताभावसमानाधिकरणौ तथा जाती। अपि च यदि परस्परात्यन्ताभावसमानाधिकरणपरस्परसमानाधिकरणयोर्जातित्वं स्यात् तदाऽश्वाकारगवाकारा काचिदेका व्यक्तिः स्यादिति वाच्यम्-वैयधिकरण्यात्, तस्मान्न जातिसाङ्कर्यं दूषणम्। अनवस्थापि जातेर्जातिमत्त्वेऽपर्याप्तजातिपरम्पराप्रसक्त्या स्यात्। न च जातेर्जातिमत्त्वमात्रत्वं प्रसञ्जकम्-बीजाभावात्। न च जातिर्यदि जातिमती स्यात् सापिजात्यन्तरवत् जातीमती स्यादित्यनवस्थापनमिति वाच्यम्। अप्रयोजकत्वात्। तस्मादनवस्थापि न दूषणम्। रूपहानिस्तदा दूषणं स्यात् यदि विशेषस्य जातिमत्त्ववादिना निर्जातिगर्भतल्लक्षणं स्वीक्रियेत। असम्बन्धस्तु भवतु दूषणं परन्तु रूपहानिपर्यवसानान्नापरः अनेकसमवेतत्वजातिरूपान्तर्भावात्। समवायत्वस्य जातितायामेकवृत्तित्वस्यैव बाधकत्वसंभवेऽस्य बाधकत्वस्वीकारानौचित्यात्। तस्मात्कथमुपन्यस्तानां जातिदूषणत्वमिति चेत्।

अत्रोच्यते-सामान्यविशेषयोर्जातिस्वीकारकबाधकत्वेनोपन्यस्तयोरनवस्थारूपहान्योर्मदुक्त एव जातिमत्त्वबाधके तात्पर्यम्। एवञ्च रूपहानेरभावात् कुत्रैकवृत्तित्वसम्बन्धयोरन्तर्भावः?। तुल्यत्वं च पृथक्जातितायामेव बाधकम्। जातिसाङ्कर्यं चावश्यं बाधकम्-घटत्वपटत्वपृथिवीत्वजलत्वद्रव्यत्वगुणत्वादीनां मिथो विरोधदर्शनेन विरोधितावच्छेदकत्वेनानुगततया परस्परात्यन्ताभावसमानाधिकरणजातित्वस्यैव स्वीकारौचित्यात्। एवञ्च परस्परसमानाधिकरणयोः परस्परात्यन्ताभावसमानाधिकरणयोर्यदि जातित्वं स्यात्तदा परस्परसामानाधिकरण्यमेव न स्यात् विरोधितावच्छेदकावच्छिन्नत्वात्। तथा द्वयोर्जात्योः सामानाधिकरण्यतया व्याप्यव्यापकभाव एव, ययोश्च परस्परात्यन्ताभावसामानाधिकरण्यं तयोर्विरोध एव। तस्मादेकनिष्ठत्वासमवेतत्वे जातिलक्षणव्याघातकतयैव जातिबाधके-जातिलक्षणस्यानेकत्वगर्भत्वात्। तुल्यत्वं च पृथक् जातितायां बाधकम् सामान्यादीनामजातिमत्त्वादस्मदुक्तमेव बाधकं जाति-

(से०)साङ्कर्यस्यतु बाधकत्वमुक्तमेवेति संक्षेपः ॥

स्वात्मनीति । अत्र यदि स्वात्मनि स्वस्वरूपे जनकत्वं तदाऽप्रसिद्धिः किन्तु स्वसमवेतजनकत्वम् इदमेव च समवायिकारणत्वमिति भावः । गुणवत्त्वं-गुणात्यन्ताभावानधिकरणत्वम् , तेन नाद्यक्षणे घटादावव्याप्तिरिति केचित् । तन्नास्मन्मनोरमम्-लक्ष्यैकदेशे सर्वदाऽवृत्त्या द्रव्याप्तिर्भवति नतु कादाचित्कावृत्त्याऽतीतानागतयोर्हेतुत्वे स्वरूपासिद्ध्यापत्तेरिति पर्यालोचनात् । एतेषु त्रिषु द्रव्यपदप्रवृत्तिनिमित्तं द्रव्यत्वं जातिरेव लाघवात् द्वयन्तु तद्व्यवस्थापकमिति भावः । कार्येति । तच्च न कार्यकारणोभयानाश्यत्वम्, गुणकर्मणोरपि कार्येणोत्तरदेशसंयोगेन कर्मणोऽन्त्यशब्देन कार्येणोपान्त्यशब्दस्य कारणेनोपान्त्यशब्देनान्त्यशब्दस्य च नाशेप्युभाभ्यां कस्यापि गुणस्य कर्मणो वाऽनाशात् । न च तदन्यतरानाश्यत्वम्, अन्यतरगर्भस्य लक्षणस्य वैयर्थ्येनाकारणात् अस्य विचारस्याग्रे कर्तव्यत्वात् । किञ्च कारणेनेश्वरज्ञानादिना घटादेरपि नाशाद्व्याप्तिः । किञ्च नित्यद्रव्यकारणाप्रसिद्ध्या कथं तदन्तर्भावेन तद्धर्मलक्षणविवक्षा । किञ्च रूपादीनां समवायिकारणनाशाग्निसंयोगान्यतरानाश्यत्वेन तत्रातिव्याप्तिः । नित्यगुणेषु चातिव्याप्तिस्तेषामनाश्यत्वेन कार्येण सुतरामनाश्यत्वात् । अत्र केचित्-अदृष्टेतरकार्यगुणनाश्यावृत्तिसत्ताव्याप्यजातिमत्त्वं विवक्षितम । गुणनाश्यावृत्तित्वविवक्षायामसम्बन्धः । द्रव्यत्वस्येश्वरज्ञानादिनाश्यघटादिवृत्तित्वात् तज्ज्ञानादेस्सर्वोत्पत्तिमत्कारणतया तद्घटादिनाशेपि कारणत्वात् । कार्यगुणेत्यादि करणेऽपि अदृष्टस्य सर्वोत्पत्तिमत्कारणस्य घटादिनाशे कारणत्वात् तदर्थमदृष्टेन्तरेति । गुणत्वादि तु नादृष्टेतरकार्यगुणनाश्यावृत्ति पूर्वोक्तनयेनादृष्टेतरकार्यगुणनाश्ये शब्दे कर्मणि च वृत्तेः । एवं च संख्यामप्यतिव्याप्तिः-एकत्वस्य क्वचिन्नित्यत्वेन क्वचित्समवायिकारणनाशान्नाश्यत्वेन ताशत्वस्य अदृष्टेतरकार्यगुणनाश्यावृत्तित्वात् तदर्थं सत्तासाक्षाद्व्याप्यजातिविवक्षा । सत्तासाक्षाद्व्याप्यजातित्वं च प्रकृते सत्तान्यूनवृत्तिजात्यन्यूनवृत्तित्वम् , एकत्वादि तु न तथा सत्तान्यूनवृत्तिगुणत्वादिति । अत्र वर्धमानोपाध्यायाः-यथाऽवयवसंयोगनाशोऽवयविनाशकस्तथाऽवयवविभागोऽपि विनिगमकाभावात् तथा च कार्यगुणविभागनाश्येऽवयविनि

(से०)द्रव्यत्वस्य सत्त्वात्कथमेतल्लक्षणमित्याहुः ।

अत्रेदं चिन्त्यते-एवं ह्यसमवायिकारणनाशात् कुत्र द्रव्यनाशो,? विभागस्य नाशकत्वे संयोगनाशसमसमयं द्रव्यनाशात् । यद्वाश्रयनाशात्संयोगनाशस्तत्र विभागस्य नाशकतेत्यसमवायिकारणनाशस्य नाशकतेति वाच्यम् । तत्र समवायिकारणनाशस्यैव नाशकत्वसंभवात् । अपि च विभागस्य नाशकत्वे क्वचिद्विभागात् क्वचित्समवायिकारणनाशाद्द्रव्यनाशेऽननुगमःस्यात् । समवायिकारणासमवायिकारणनाशयोस्तु निमित्तकारणेतरकारणत्वेनानुगमः । तस्मान्न विभागो द्रव्यनाशक इति । मुद्गरपातानुकूलास्मदादिप्रयत्नस्य घटनाशकत्वान्न लक्षणं यातीति तु सम्यक् । न च तत्र समवायिकारणासमवायिकारणान्यतरनाशस्यावश्यकतया तत्रैव मुद्गरपातद्वारा प्रयत्नक्षयः, एवं हि घटादावपि प्रयत्नस्य कारणता न स्यात् आन्तरालिके क्वचिदुपक्षयात् । तस्मात्कार्यमात्रस्य प्रयत्नसाध्यतया यत्रेश्वरप्रयत्नेऽस्मदादिप्रयत्नमप्यपेक्षते तत्र द्वयोरपि प्रयत्नयोर्भाववद्भावेपि कारणतेति । कार्यकारणभावनिरूपकसम्बन्धनाश्यावृत्तिजातिमद्वृत्तिभावविभाजकोपाधिमत्त्वे तात्पर्यमिति च वर्धमानोपाध्यायाः । अत्र गुणकर्मणोरतिव्याप्तिवारणायावृत्त्यन्तम् । एकत्वत्वादिनाऽतिव्याप्तिवारणाय भावविभाजकेति । अत्रापीश्वरज्ञानादिनाश्यतया दोषस्तैर्न प्रतिसंहितः । कार्यनाश्यावृत्तीति तु सम्यक् । अन्त्यविशेषवत्त्वं—अन्त्यविशेषवद्वृत्तिभावविभाजकोपाधिमत्त्वम, तेन नानित्यद्रव्याव्याप्तिः ॥

(७यो०) एवं पदार्थानां साधर्म्यमभिधाय द्रव्याणां साधर्म्यनिरूपणार्थमाह पृथिवी आदिर्येषां तानि पृथिव्यादीनि तेषाम् । न ज्ञायते कियतामतो नवानामपि द्रव्यत्वयोगः साधर्म्यम् । द्रव्यत्वेन योगो द्रव्यत्वोपलक्षितः समवाय इति । यद्यपि समवायः पञ्चपदार्थवृत्तिस्तथाऽपि द्रव्यत्वेनोपलक्षितोऽसाधारणत्वात् भवत्येव लक्षणमिति । न च द्रव्याणां भावो द्रव्यत्वमित्युक्ते अर्थाद्यगम्यते योग इति वाच्यम् । गम्यवृत्त्याश्रयणेन शब्दवृत्तिप्रतिषेधेऽतिप्रसङ्गात् । न चोपचरितभेदत्वादवास्तवं लक्षणमिति दूषणम् । श्रोत्रस्येव विशिष्टार्थक्रियाजनकत्वात् । नापि समर्थविशेषणता । योगपदं विना ह्यसंभवित्वाशंकानतिवृत्तेरिति । शेषं लक्षणस्य दूषणस्य प्रतिसमाधानं

(व्यो०)वक्ष्यामः पृथिव्यधिकारे। लक्षणं च भेदार्थं व्यवहारार्थं चेति। तथाहि—पृथिव्यादीनीतरस्माद् भिद्यन्ते द्रव्याणीति वा व्यवहर्तव्यानि द्रव्यत्वयोगात्, ये तु न भिद्यन्ते नापि द्रव्याणीति व्यवह्रियन्ते न ते द्रव्यत्वयुक्ताः यथा रूपादयः। न च तथा न द्रव्यत्वयुक्तानि पृथिव्यादीनीति। तस्मादितरस्माद्भिद्यन्ते द्रव्याणीति वा व्यवहर्तव्याणीति। एवं द्रव्यशब्दस्य प्रवृत्तौ पृथिव्यादीनां नवानामपि द्रव्यत्वयोगो निमित्तमिति शब्दार्थनिरूपणपरत्वेनापि सम्बध्यते वाक्यम्। तथाच न सामान्यवतः शब्दार्थत्वे किञ्चिद्बाधकमस्तीति वक्ष्यामः। तथातीन्द्रियशक्तिप्रतिषेधार्थं च। यत्तु पृथिव्यादीनां नवानामपि द्रव्यत्वयोगो निजा शक्तिरिति। अथ कृतसमयस्य गोपिण्डेष्ववानुगताकारस्य ज्ञानस्यानुपपत्तेर्न द्रव्यत्वं सामान्यमस्तीति। यथा हि नारिकेलद्वीपवासिनो गोपिण्डोपलम्भादेकाकारता प्रतिभासते नैवं पृथिव्यादिषु उपलभ्यमानेष्विति। अथास्ति कृतसमयस्य द्रव्यं द्रव्यमिति ज्ञानम्? तच्च संकेतवशादेव भविष्यतीति। तदसत्। सामान्यस्यानियतव्यञ्जकव्यंग्यतया व्यञ्जकानुपलब्धावप्यनुपलब्धेर्भावात्। तथाहि—द्रव्यत्वं क्रियावदादिधर्मोपलंभादभिव्यज्यते अतिशयद्रव्याश्रितत्वोपलब्धेर्गुणत्वम् एवं कर्मलक्षणोपलब्धेः कर्मत्वमिति। शेषेष्वपि व्यञ्जकमप्यूह्यम्। न च सर्वेषां व्यञ्जकोपलब्धिर्विद्यत इति। सामान्यानुपलंभो विघातक एव। कृतसमयस्य व्यञ्जकोपलब्धेर्भवत्येव द्रव्यादिष्वनुगतज्ञानम्। साक्षादिना वा कृतसमयेनापि संवेद्यत इति युक्तं गवादिषु अनुगताकारविज्ञानमिति। यत्र च द्रव्यगुणकर्मात्मकं निमित्तं न संभाव्यते अबाधितानुगतायां संविदि तत्र सामान्यमेव निमित्तम्। न च द्रव्यादिष्वनुगतसंवेदने अभाव इव किञ्चित् बाधकमस्तीति। तथाहि—अभावोऽभाव इति अनुगतसंवेदनं द्रव्यगुणकर्मानिमित्तमपि न सामान्यात् भवति। सामान्यस्याभावेन समवायाभावात्। समवेतं च सामान्यं विशेषणमुपलब्धम्। अथेदमेवाभावत्वानुरक्तमभावोऽभाव इति ज्ञानमभावत्वस्याभावेन समवायं दर्शयतीति चेत्। न। अनेकान्तात्। तथाहि—सामान्यादौ सत्सदिति ज्ञानं विना सत्तासमवायमित्युक्तपूर्वम् सामान्यवत्त्वे चाभावस्य भावरूपतैव स्यात्। एवं चानुत्पत्तेरनादित्वान्नित्यत्वं विनाशस्य चादिमत्वादनित्यत्वं प्रस-

(व्यो०)ज्येत । प्रागभावस्य च नित्यत्वेन वस्तूपलंभो न स्यात् । तयोः स्वरूपपरिहारस्थितिविरोधात् । न चाभावोपमर्दात्मनो भावस्योत्पत्तिर्युक्तेति प्रागिति विशेषणासंभवः, प्रध्वंसानुत्पत्तिश्च तस्य ह्युत्पत्तिमदपेक्षितत्वात्संभवोप्युत्पत्तिमत्वेन विनाशस्य विनाशे भावग्रहणं स्यात् । यथाहि विनाशानुत्पत्तेः पूर्वं भावो गृह्यते तद्वद्विनाशापायेपि गृह्येत विरोधाभावस्याविशेषात् । न चैतदृष्टमतः सामान्यवद्व्यतिरेकः । न चोपाधिऽविना भावोऽभाव इति ज्ञानं शक्यम् भवितुम् । किन्तर्हि ? घटाभावः पटाभाव इति ज्ञानोत्पत्तेर्वैलक्षण्यमेव । अथास्ति घटाभावो घटाभाव इति अनुगतज्ञानमिति चेत् । अत्राप्युपाधिवशादुपलक्षणत्वं सामान्यमेव ज्ञानहेतुरिति द्रष्टव्यम् । मुख्ये बाधकोपत्तेः । न चैवं द्रव्यं द्रव्यमितिज्ञाने किञ्चिद्बाधकमस्तीति सामान्यसिद्धेर्नासंभवीदं लक्षणम् इति । एवं स्वश्चासावात्मा चेति स्वात्मा तस्मिन्नारंभकत्वं स्वात्मसमवेतकार्यजनकत्वम् समवायिकारणत्वमिति यावत् । तच्च पृथिव्यादिष्वेव भावादितरस्मात् भेदकम् । तथाहि-समवायो नर्ते पृथिव्यादिभ्यः संभवतीति । तथा गुणा विद्यन्ते येषां ते गुणवन्तस्तेषां भावो गुणवत्त्वम् । गुणोपलक्षितः समवायः समवेता वा गुणाः । तेप्यसाधारणत्वात् भेदकाः । यथा न गुणादिषु गुणवत्त्वं तथा वक्ष्यामो गुणावसरे । तथा कार्यकारणयोर्विरोधः कार्यकारणविरोधः स न विद्यते येषां ते कार्यकारणाविरोधिनः तेषां भावो कार्यकारणाविरोधित्वं कार्यकारणयोः परस्पराविरोधित्वमेक एव धर्मः। यदि वा धर्मद्वयं कार्याविरोधित्वं कारणाविरोधित्वं चेति । कार्येण न विरुध्यन्ते न विनाश्यन्ते इति कार्याविरोधिनस्तेषां भावः कार्याविरोधित्वं कार्येण विनाशाभावः । स च सर्वेषु पृथिव्यादिष्वस्तीति साधर्म्यम्, न पुनर्लक्षणम— विपक्षैकदेशेपि भावात् । तथाहि-कार्येण विरुध्यन्ते शब्दबुद्ध्यादयो न सर्वे गुणाः, तथा कर्माण्यपि कार्येण विरुध्यन्ते न कार्येणैवाश्रयविनाशेपि विनाशात् । न च पदार्थापेक्षयापि लक्षणविवक्षायां विपक्षैकदेशे वर्तमानस्य गमकत्वम्। तथा कारणाविरोधित्वं यदि कारणेन न विरुध्यन्ते इति कारणाविरोधिनः कारणेन विनाशाभावः स चाकाशादिष्वस्ति कारणाभावादिति । पक्षे व्यापकस्यापि सतो न विपक्षाद्व्यावृत्तिरिति अलक्षणत्वम् । तथाहि न कारणेन

(व्यो०)गुणा विनाश्यन्ते नापि कर्मेति। अथ कारणं न विरुन्धन्ति न विनाशयन्तीति कारणाविरोधिनस्तेषां भावः कारणाविरोधित्वं कारणाविनाशकत्वं कार्यधर्म इत्यत्र नित्यद्रव्येषु कारणाभावात्। कारणाविरोधित्वं कारणाविनाशकत्वं चिन्तनीयमिति विपक्षैकदेशवर्तमानस्यागमकत्वमेव। तथाहि-शब्दबुद्ध्यादेर्यद्यपि कारणाविनाशकत्वं तथापि न रूपादीनामस्तीत्यतिव्याप्तिः, एवं कर्मापि न कारणं विनाशयतीति। न च कार्याविरोधित्वेनाविशेषः तत्र हि कार्येणाविनाशत्वं कारणधर्मः कारणाविरोधित्वं कारणाविनाशकत्वं कार्यधर्म इत्यपुनरुक्तम्। तदेवमुभयथापि विपक्षैकदेशाव्यावृत्तः साधर्म्यमेव न तल्लक्षणमिति सिद्धम्।

(भा०) अनाश्रितत्वनित्यत्वे चान्यत्रावयविद्रव्येभ्यः॥

(सू०) अनाश्रितत्वं-असमवेतद्रव्यत्वम्। नित्यत्वं-अविनाशिद्रव्यम्। चकारान्नित्यपरिमाणवत्त्वाद्युपग्रहः॥

(से०) अनाश्रितत्वं यद्यसमवेतत्वं तदा समवायादावतिव्याप्तिस्तदर्थं समवायवत्त्वे सत्यसमवेतत्वम्। नित्यत्वं द्रव्यत्वे सत्यविनाशित्वम्, तेन न गुणादावतिव्याप्तिः।

(व्यो०) एवमन्त्यविशेषा विद्यन्ते येषां ते तद्वन्तः तेषां भावोऽन्त्यविशेषवत्त्वम्-अन्त्यविशेषोपलक्षितः समवायः समवेता वाऽन्त्यविशेषाः। तथाऽनाश्रितत्वं तत्त्वं च नित्यत्वं चेत्यनाश्रितत्वनित्यत्वे। अनाश्रितत्वमाश्रितत्वाभावः नित्यत्वमविनाशित्वमुभयान्तानुपलक्षितवस्तुसत्ता वा।

किमेतद्धर्मत्रयं सर्वेषु पृथिव्यादिषु अस्ति व्यापकं चेत्याह—अन्यत्रावयविद्रव्येभ्य इत्यवयविद्रव्याणि वर्जयित्वा नित्यद्रव्येष्वेवेति। ननु धर्मत्रयस्य सापवादत्वाविशेषेऽप्यन्त्यविशेषवत्त्वेनासमासकरणे किं प्रयोजनमिति। अन्त्यविशेषाणामव्यापकत्वेऽप्यसाधारणताज्ञानेनैवानाश्रितत्वनित्यत्वयोश्चान्यत्रापि सद्भावात्साधारणत्वेनासमासकरणम्। तथाहि-नित्यत्वं गुणादिष्वप्यस्तीति साधारणमनाश्रितत्वं समवायस्यापि मुख्यवृत्तौ बाधकोपपत्तेर्गौणवृत्त्याश्रयणेन संभाव्यते न परमार्थत इति साधारणम्॥

(भा०)पृथिव्युदकज्वलनपवनात्ममनसामनेकत्वा-परजातिमत्त्वे ॥

(मू०) पृथिवीत्यादि । ज्वलनेनात्र तेजोमात्रं न तु वह्नि-मात्रम् । अनेकत्वं—बहुसमवेतद्रव्यविभाजकत्वत्त्वम् । अपरजाति-मत्त्वं—द्रव्यत्वन्यूनवृत्तिजातिमत्त्वम् ॥

(से०) पृथिवीति । घटाकाशावित्यादिरनेकत्वसद्रूपा द्रव्यत्व-लक्षणापरजातिः यद्यप्याकाशादावप्यास्ति तथापि स्वाश्रयान्योन्या-भावसमानाधिकरणद्रव्यविभाजकोपाधिमत्त्वम् । तत्त्वं पुनर्वृ-त्तिजातिमत्त्वं विवक्षितम् । संस्कारवत्त्वमप्येतेष्वेवात्मनि भा-वनायाः पृथिव्यतेजोवायुमनःसु वेगस्य चतुर्षु केषांचिन्मते मन-स्यपि स्थितिस्थापकस्य सत्त्वादिति भावः । मनसि केषांचिन्मते स्थितिस्थापक इति वादिवचोदे व्यक्तम् ॥

(व्यो०) एवं पृथिव्यादीनां नवानां पदार्थान्तराद्यावृत्तं साध-र्म्यमभिधाय पुनस्तेषां स्वभेदाद्यावृत्तं साधर्म्यं दर्शयति–पृथिव्युद-कज्वलनपवनात्ममनसामिति । चार्थे द्वन्द्वः समासोऽनेकत्वं चा-परजातिमत्त्वं चेत्यनेकत्वापरजातिमत्त्वे । अनेकत्वं च क्षित्यादे-र्विशेषलक्षणयोगिनो व्यक्तिभेदोऽनेकत्वसंख्या वा । नाकाशादेर्व्य-क्तिभेदो नानेकत्वसंख्या वा सम्भवतीति तस्माद्यावृत्तिरिति । अनेकत्वादेवापरजातिमत्त्वमपरजातिर्द्रव्यत्वापेक्षया पृथिवीत्वादि-रूपा सा विद्यते येषां तानि तद्वन्ति तेषां भावोऽपरजातिमत्त्वमपर-जात्युपलक्षितः समवायः समवेता वाऽपरजातिरिति ॥

(भा०) क्षितिजलज्योतिरनिलमनसां क्रियाव-त्त्वमूर्तत्वपरत्वापरत्ववेगवत्त्वानि ॥

(मू०) क्षितीत्यादि । क्रियावत्त्वं–क्रियावद्वृत्तिद्रव्यत्व-व्याप्यजातिमत्त्वम् , नातो निष्क्रियनष्टघटाद्यव्याप्तिः । मूर्तत्व-मवच्छिन्नपरिमाणवत्त्वम् , स्पन्दसमवायिकारणतावच्छेदकतया सिद्धजातिप्रभेदो वा । परत्वं–परत्ववद्वृत्तिद्रव्यत्वव्यापकजातिम-त्त्वम् । एवमपरत्ववेगयोरर्थो बोध्यः ॥

(से०) क्षितीति । अत्र मूर्तत्वं-अवाच्छिन्नपरिमाणवत्त्वम् तेन विना न द्रव्यनाशः तस्य संभृतसामग्रीकतया द्वितीयक्षण एवोत्पादात् तत्र च क्षणिकत्वभिया द्रव्यनाशाभावात् क्रियापरत्वापरत्ववेगेष्वागन्तुककारणजन्येषु तेषां चानियतसमवधानत्वात् क्रियादिभिर्विनापि द्रव्यनाशः सम्भवति । न च वेगवत्कारणजन्यतया कार्ये वेग आवश्यकः, सर्वकारणानां वेगवत्त्वे प्रमाणाभावात् । न च निष्क्रियादिनष्टेषु घटादिष्वव्याप्तिरिति चेन्न। क्रियावद्वृत्तिद्रव्यविभाजकोपाधिमत्त्वादीवक्षितत्वात् ॥

(व्यो०) एवं क्षितिजलज्योतिरनिलमनसां साधर्म्यं क्रियावत्त्वं च मूर्तत्वं च परत्वं चापरत्वं च वेगवत्त्वं चेति तथोक्तानि । तथा च क्रिया चलनरूपा सा विद्यते येषां तानि तद्वन्ति तेषां भावः क्रियावत्त्वं-समवेता क्रिया तत्समवायो वा । तथा मूर्त्तिरव्यापिद्रव्यपरिमाणं सा विद्यते येषां तानि मूर्तानि तेषां भावः मूर्तत्वं-समवेता मूर्तिस्तत्समवायो वा। मूर्तत्वादेव च परत्वापरत्वादिसद्भावः क्रियावत्त्वं चेति । परापराणां भावः परत्वापरत्वे यत्सद्भावे क्षित्यादिषु परापरव्यवहार इति समवेतौ परत्वापरत्वगुणौ तत्समवायो वा । वेगो विद्यते येषां तानि वेगवन्ति तेषां भावो वेगवत्त्वं समवेतो वेगगुणस्तत्समवायो वा । एतानि च क्षित्यादिष्वेवेति नियम्यन्ते, न तु सर्वदा तेषु भवन्तीति ॥

(भा०) आकाशकालदिगात्मनां सर्वगतत्वं परममहत्त्वं सर्वसंयोगिसमानदेशत्वं च ॥

(सू०) आकाशेत्यादि । सर्वगतत्वं-सर्वावयवावच्छेद्यावयविसंयोगाश्रयत्वम् । परममहत्त्वं-अनाश्रयवान्महत्त्वापेक्षिकोत्कर्षवन्महत्त्वम् । परममहत्त्वस्य जातित्वपक्षे तादृशजातिमन्महत्त्वमित्यर्थः । सर्वेति । सर्वेषां मूर्तानां संयोगिनि संयुक्तत्वमित्यर्थः ॥

(से०) सर्वगतत्वं निष्क्रिये न सम्भवतीति 'सर्वमूर्तप्रतियोगिकस्यैकस्येका वृत्तिरिति' न्यायेन अनेकस्य वा संयोगस्यासम्भवादसम्भवीति चेत्। स्वसंयोगत्वावच्छिन्नव्यापकताकमूर्तत्वव्या-

(से०)पकसंयोगप्रतियोगित्वस्य विवक्षितत्वात्। यथा हि यत्र मूर्तत्वं तत्राकाशसंयोग इत्यादिर्व्याप्तिरास्ति न तथा तत्र घटसंयोग इत्यादिरिति भावः। स्वस्य च प्रवेश एकमात्रवृत्तिधर्मेण विवक्षितः, तेन द्रव्यसंयोग इति व्यापकतामादाय नातिप्रसंगः। परममहत्त्वं-प्रकर्षकाष्ठाप्राप्तमहत्परिमाणवत्त्वम्। न च हस्तवितस्त्याद्यवच्छेदस्यैव परिमाणतया कथमाकाशादौ परिमाणम् तदभावेऽणुत्वस्यैव स्वीकारौचित्यात्। यत्परियत्तावत्त्वं परिमाणलक्षणमिति। तन्न। सङ्ख्यादावतिव्याप्तेः। हस्तवितस्त्यादीयत्तामावेपि यथाऽणुत्वात्परिमितत्वं परमाण्वादेः तथा महत्त्वादाकाशादेरपीति भावः। सर्वसंयोगिसमानदेशत्वं-संयोगसम्बन्धेन सकलमूताधिकरणत्वं संयोगिनामाकाशादीनामधिकरणत्वात्। कालाद्युपाधावतिव्याप्तिवारणाय संयोगसम्बन्धेनेति तस्य स्वरूपसम्बन्धेनाधारत्वादित्याचार्याणामेकं मंतमत्र चिन्त्यते-आकाशादीनां घटाद्याधारत्वे प्रमाणाभावात्, न हीदानीं घट इत्यादिकालाद्याधारत्वसाधकप्रतीतिवदाकाशाद्याधारत्वसाधिका प्रतीतिरास्ति, अन्यथाकाशादीनामपि घटाद्यधिकरणत्वेन 'न ह्यधिकरणमकारणमिति' न्यायेन तत्कारणत्वापत्तेः। ननु यदुत्पत्त्यधिकरणं तत्कारणन्तथा च दिक्कालतदुपाधयो, न चाकाशात्मानौ तथा, किन्तु द्वितीयक्षणे संयोगसम्बन्धेन घटाधाराविति चेन्न। प्रमाणाभावात्, तथाच स्वसंयोगत्वावच्छिन्नव्यापकताकमूर्तनिष्ठाधिकरणत्वव्यापकसंयोगप्रतियोगित्वमाचार्यतात्पर्यविषयः। पूर्वन्तु मूर्तत्वव्यापकता विवक्षितेति भेदः॥

(व्यो०) एवमाकाशकालदिगात्मनां सर्वगतत्वादिसाधर्म्यं सर्वशब्दश्चानन्तरोक्ता मूर्तेष्वेव वर्तते। सर्वेषु गताः सर्वगताः सर्वप्राप्ताः तेषां भावः सर्वगतत्वं सर्वैर्मूर्तैः संयोगः। स चान्यतरकर्मजः संयोगजो वा। स तूभयनिष्ठत्वाविशेषेप्याकाशादेरेव साधर्म्यम्। तस्य हि सर्वमूर्तैः सह संयोगो न मूर्तानामन्यतमस्येति। तथा परममहतां भावः परममहत्त्वं-निरतिशयपरिमाणम्-तत्समवायो वा। तथा सर्वसंयोगिसमानदेशत्वं सर्वाणि च तानि संयोगीनि च मूर्तद्रव्याणि तैः समानाः संयोगाः तेषामाकाशादयो देशा आधारास्तेषां भावः सर्वसंयोगिसमानदेशत्वम् सर्वसंयोगिसंयोगाधारत्वम्। न च संयोगस्योभयनिष्ठत्वान्मूर्तानामप्येष धर्म इति वाच्यम्। यथा

(व्यो०)ह्येकमाकाशं सर्वमूर्तसंयोगाधारो नैवमेकं मूर्तमित्यर्थाद्विशेषो लभ्यते। न च सर्वगतत्वेनाविशेषः। सर्वगतत्वं हि सर्वसंयोगः तदुपलक्षितश्च समवायः सर्वसंयोगिसंयोगाधारत्वमिति। यदि वा सर्वे च ते संयोगो विद्यते येषां ते सर्वसंयोगिनः ते सर्वसंयोगिनो घटादयः खाद्यश्च तेषां समानाः संयोगा इति। शेषं पूर्ववत्। अन्ये तु-उपचारेणैव व्युत्पत्त्या वा संयोगिशब्देन संयोग एवोच्यत इति मन्यन्ते। संयुज्यन्त इति संयोगास्ते विद्यन्ते येषां ते संयोगिनः संयोगा एव स्थानादुपचारो वेति। सर्वसंयोगिनां तु समानाश्च ते देशाश्चेत्येकत्वे सत्याधार इति। अत्र चैकत्वे सतीति विशेषणं शब्दवृत्त्या लभ्यते इति सामर्थ्याश्रवणमपास्तं भवति। तच्चासत्-इन्द्रियसामान्यलक्षणे विशेषगुणलक्षणादौ च तस्यैव समाश्रयणादिह प्रयासमात्रमेवेति॥

पृथिव्यादीनां पञ्चानामपि भूतत्वेन्द्रियप्रकृतित्वबाह्यैकैकेन्द्रियग्राह्यविशेषगुणवत्त्वानि॥

(सू०) पृथिव्यादीनामिति। भूतत्वं-आत्मेतरवृत्तिविशेषगुणवत्त्वम्। इन्द्रियप्रकृतित्वं-साक्षात्कारकरणवृत्तिद्रव्यविभाजकवत्त्वम्, न त्विन्द्रियसमवायिकारणवृत्तिद्रव्यविभाजकवत्वं गगनाव्याप्तिप्रसङ्गात्। बाह्येति। बहिरिन्द्रियद्वयाग्राह्यबहिरिन्द्रियग्राह्यजातिमद्विशेषगुणवत्त्वम्, नातो घटाद्यव्याप्तिः॥

(से०) पृथिव्यादीनामिति। ननु भूतत्वं जातिरेवास्तु, न च मूर्तत्वेन संकरम, सांकर्ये ह्युभयोर्जातित्वं न भवति न त्वेकस्यापि, अन्यथा पृथिवीत्वेन्द्रियत्वयोर्जातिसांकर्ये पृथिवीत्वमपि जातिर्न स्यात्, तथाच मूर्तत्वं मास्तु जातिः भूतत्वं तु भविष्यतीति चेन्न। विनिगमनाविरहस्थले न स्यात्, तथाच मूर्तत्वस्य जातिसाङ्कर्येण द्वयोरपि जातित्वनिवारणात्, पृथिवीत्वेन्द्रियत्वयोः संकरे तु गन्धसमवायिकरणतावच्छेदकत्वादि पृथिवीत्वादिजातिविनिगमकम्। तस्मात्संस्कारत्वान्यबहिरिन्द्रियग्राह्यगुणत्वन्यूनवृत्तिजातिमद्विशेषगुणवत्त्वम्। विशेषपदानुपादाने संख्यामादाय कालादावतिव्याप्तिः। भावनाख्यसंस्कारमादायात्मन्यतिव्याप्तिवारणाय संस्कारत्वान्येति।

(से०)सुखादिमत्त्वेन तद्धारणाय बहिरिन्द्रियग्राह्यगुणत्वस्य सुखादावपि सत्त्वेन गुणत्वन्यूनवृत्तीति । इन्द्रियप्रकृतित्वं यदीन्द्रियस्वरूपत्वं तदा मनस्यतिव्याप्तिः । यदि चेन्द्रियसमवायिकारणत्वं तदाऽऽकाशादावव्याप्तिः । तथाच बाह्येन्द्रियवृत्तिद्रव्यविभाजकोपाधिमत्त्वे तात्पर्यम् । बाह्येति । नन्वेकैकपदं विशेषपदं वा व्यर्थमिति चेन्न । लक्षणद्वये तात्पर्यात् । बाह्यैकैकेन्द्रिय(शब्द)? ग्राह्यगुणवत्त्वं च न लक्षणम्, परमाण्वादावव्याप्तेः, किन्तु गुणत्वव्याप्यजात्या ? बाह्यैकैकेन्द्रियग्राह्यसजातीयगुणवत्त्वमात्रम् एकैकपदानुपादाने बाह्येन्द्रियग्राह्यसजातीयमद्गुणादिमत्त्वेनात्मादावतिव्याप्तिरतो एकैकेन्द्रियग्राह्यत्वम् । एवं विशेषपदगर्भेपि लक्षणे पदकृत्यं बोध्यम् । विवक्षा च पूर्ववदेव ॥

(व्यो०) तथा पृथिव्यादीनां साधर्म्यमाह—पृथिवी आदिर्येषां तानि पृथिव्यादीनि तेषाम् । न ज्ञायते कियतामतः पञ्चानामपि साधर्म्यम् । भूतत्वं चेन्द्रियप्रकृतित्वं च बाह्यैकैकेन्द्रियग्राह्यविशेषगुणवत्त्वं चेति तथोक्तानि । भूतानां भावो भूतत्वं तच्च सामान्यमेव । तथाहि-द्रव्यगुणकर्माणि निमित्ते चाबाध्यमानमनुगतज्ञानं सामान्यात् भवद्दृष्टम्, यथा गौरित्यादिज्ञानमस्ति च भूतं भूतमित्यादि क्षित्यादिषु ज्ञानमतः सामान्यात् भवतीति । न चास्य सामान्यादावनुगतज्ञानस्येव किञ्चित् बाधकमस्ति तथाच सामान्ये सामान्यकल्पनायामनवस्था स्यादिति। सामान्यं द्रव्यत्वं सामान्यं गुणवत्त्वमिति ज्ञानं विना सामान्यं भवतीत्युक्तम् । न च भूतं भूतमिति ज्ञाने बाधकमस्ति । अथ नारिकेलद्वीपवासिनः कस्मादेकाकारता प्रतिभासो न भवतीति । व्यञ्जकानुपलब्धेः यथाहि-गुणत्वादि सामान्यं नारिकेलद्वीपवासिनां व्यञ्जकानुपलम्भाद्विद्यमानमपि नोपलभ्यते तथा भूतत्वमपीति । किमस्य तर्हि व्यञ्जकमिति ? ब्राह्मणत्वस्येवोपदेशः यथाहि ब्राह्मणत्वमुपदेशाद्विज्ञायते तद्वद्भूतत्वमपीति । अथोपदेश एवास्त्वलं सामान्यकल्पनया । यथान्यैरुक्तं—'भूतत्वं भूतशब्दस्य वाच्यत्वमित्यभिधानाभिधेयनियमनियोगप्रतिपत्तिः, सा च शब्दाद्वृद्धव्यवहारात् वाऽन्वयव्यतिरेकाभ्यां भवतीति'।एतच्चासत्—अबाध्यमानानुगतज्ञानस्य दुर्निमित्तान्तरकल्पनायां द्रव्यत्वादेरप्यसत्त्वं स्यात् । अस्ति च कृतसमयस्य भूतं भूतमिति ज्ञानं ब्राह्मणो ब्राह्मण इतिवद्द्रव्यं द्रव्यमिति च ज्ञानवत्,ततोऽस्ति भूतत्वं सामान्यमि-

(व्यो०)ति। अथ यथा द्रव्येष्वसाधारणः समवायिकारणत्वादिर्व्याप्यको धर्मः कृतसमयस्य द्रव्यत्वाभिव्यञ्जकोऽस्ति नैवं भूतेष्विति चेत्। नेन्द्रियप्रकृतित्वादेरसाधारणत्वात्। अथ तदुपलम्भेप्यकृतसमयस्य नानुगतं ज्ञानमिति चेत्। द्रव्यत्वादिष्वपि समानं—तत्रापि समवायिकारणत्वादेरुपलम्भेप्यकृतसमयस्य द्रव्यं द्रव्यमिति ज्ञानं दृष्टमिति। अथ कृतसमयस्योत्पत्तेरस्ति द्रव्यत्वादिसामान्यम्, तच्च भूतत्वेऽपि समानमित्यलम्।

तथेन्द्रियप्रकृतीनां भाव इन्द्रियप्रकृतित्वम्–घ्राणरसनचक्षुस्त्वक्श्रोत्रकारणत्वं यथासंख्यम्। तच्च वक्ष्यामः पृथिव्याद्यधिकारे–भूयस्त्वात् गन्धवत्त्वादित्यादि(अ० ८ आ० २ सू० ५)सूत्रैरिति। श्रोत्रे तु कर्णशष्कुल्याकाशसंयोगोपलक्षितस्याकाशस्य कार्यत्वात्तदपेक्षयाऽऽकाशस्य कारणत्वात्। स्वभावार्थो वा प्रकृतिशब्द इति। नन्वाहंकारित्वादिन्द्रियाणामयुक्तमेतत् तथाच प्रकाशकत्वं सत्त्वधर्म इति सात्त्विकादहंकारादिन्द्रियाणामुदयः। किमत्र प्रमाणमिति चेत्। अप्राप्यकारित्वं तच्च शाखाचन्द्रमसोर्युगपत् ग्रहणाद्विज्ञातम्। अन्यथा हि शाखासम्बन्धोत्तरकालं चिरेण चन्द्रमसा च सम्बन्धाद्युगपत् ग्रहणं न स्यात्। अस्ति चातोऽप्राप्यकारित्वम्। तच्च भौतिकेषु न सम्भवति प्रदीपादिष्वदर्शनात् इत्यभौतिकत्वमन्येषामपि प्रतिपत्तव्यं चक्षुर्दृष्टान्तबलादेव। तथा महदणुप्रकाशकत्वाच्च यद्धि यावत्परिमाणं तावदेव क्रियां कुर्वद्दृष्टमिति। तथाहि अल्पपरिमाणं वास्यादि महान्तं वटवृक्षं व्याप्य च्छिदां न करोतीति दृष्टम्। किन्तर्हि स्वव्यासप्रदेश एवेति चक्षुरप्यल्पपरिमाणत्वान्न पर्वतादिपरिच्छेदकं स्यात्। तत्तु दृष्टमतो न भौतिकमिति॥ तथा नियतविषयत्वाच्च। यदि हि चक्षुस्तैजसं स्याद्रूपस्यैव तद्गुणत्वाद्ग्राहकं तद्द्रव्यसामान्यादेरिति। एवं शेषेष्वपि नियमेन स्वगुणग्राहकत्वप्रसङ्गः। न चैतद्दृष्टमतो न भौतिकत्वमिति॥ इतश्च न भौतिकानीन्द्रियाणीन्द्रियत्वात्। यद्यदिन्द्रियं तत्तदभौतिकं दृष्टं यथा मनः। तथाचेन्द्रियाणि तस्मान्न भौतिकानीति। यत्तावदप्राप्यकारित्वादिति साधनं तदसिद्धम्। व्यवहितार्थानुपलब्ध्या प्राप्तेरुपलंभात्। अन्यथा हि व्यवहितस्याग्रहणमन्तिके च ग्रहणं न स्यात्–अप्राप्तेरुभयत्राविशेषात्। आवरणानुपपत्तिश्च प्राप्तिप्रतिषेध-

(व्यो०)कत्वात्तथाच प्राप्तिप्रतिषेधं कुर्वदावरणमग्रहणाय कल्प्यते । दृष्टं चावरणसामर्थ्यं दूरे वा प्रकाशकत्वमतः प्रदीपस्येव प्राप्तार्थपरिच्छेदकत्वम् । तथाच चक्षुः प्राप्तार्थपरिच्छेदकं व्यवहिताप्रकाशकत्वात् । यद्यद्व्यवहिताप्रकाशकं तत्तत्प्राप्तार्थपरिच्छेदकम् यथा प्रदीपस्तथा व्यवहिताप्रकाशकं चक्षुस्तस्मात्प्राप्तार्थपरिच्छेदकमिति प्राप्तिसद्भावे प्रमाणोपपत्तेः । शाखाचन्द्रमसोः कालभेदेन ग्रहणसद्भावेप्याशुभावादुत्पलपत्रशतव्यतिभेदाभिमानवद्युगपत्ग्रहणाभिमानः । यच्च महदनुप्रकाशकत्वं तदप्यन्यथासिद्धत्वादसाधनम् । तथाहि चक्षुर्बहिर्गतं बाह्यालोकसम्बन्धाद्विषयपरिमाणं उत्पद्यत इति महदाद्यर्थप्रकाशकं नाभौतिकत्वादिति । यच्चोक्तम्-तैजसत्वाद्रूपस्यैव प्रकाशकं स्यात्—इत्येतदसत्—प्रदीपे दर्शनात् न हि प्रदीपस्तैजसत्वाद्रूपस्यैव प्रकाशको दृष्टः । किं तर्हि ? रूपद्रव्यसामान्यादेरिति । एतावानेव विशेषः यश्चक्षुषः, अतस्तैजसत्वम् न विरुद्ध्यत इति । रूपादिषु मध्ये नियमेन रूपस्यैव प्रकाशकत्वम् तेजसत्वेऽनुमानमिति वक्ष्यामः । नियमेन गन्धादिप्रकाशकत्वं च पार्थिवत्वादिषु घ्राणादेरिति । न चैकप्रकृतिकत्वे विषयव्यवस्थोपलब्ध्येति नानाप्रकृतित्वम् । तथाहि—एकस्मात्कारणादुपजाताः प्रदीपभेदाः समानविषयाः इत्युपलब्धम् तद्वदिन्द्रियेष्वपि समानविषयत्वं स्यात् । दृष्टा तु घ्राणादेर्गन्धादिषु व्यवस्थेति नानाप्रकृतिकत्वम् । तथा नानाजात्युपादानानीन्द्रियाणि द्रव्यत्वे सति प्रतिनियतविषयत्वाद्यद्द्रव्यत्वे सति प्रतिनियतविषयं तत्तन्नानाजात्युपादानं दृष्टम् । यथा व्यंजनानिलप्रदीपकस्तूरिकादीनीति । तथाचैतानि द्रव्यत्वे सति प्रतिनियतविषयाणि तस्मा न्नानाजात्युपादानानीति । तथाहि । ज्ञानशब्देष्वेकजात्युपादानत्वं प्रतिनियतविषयत्वं चेति व्यभिचारः । तदर्थं द्रव्यत्वे सतीति विशेषणम् । न चास्य पक्षधर्मत्वादिमतो प्रामाण्यमतिप्रसंगात् । यच्चाभौतिकत्वेऽनुमानमिन्द्रियत्वादिति । तत्र भूतादनिवृत्तं भौतिकं तत्प्रतिषेधे च कारणान्तरप्रभवत्वं विशेषप्रतिषेधस्य शेषाभ्यनुज्ञानविषयत्वादिति साध्यविकलो दृष्टान्तः । तथा च मनसि न भौतिकत्वं नाप्यभौतिकत्वमिति । अथ भूतादुत्पत्तिप्रतिषेधेन नित्यत्वम्, अत्राप्यभ्युपगमव्याघातः मनस्यपि नित्यत्वाभ्युपगमात् । इन्द्रियत्वं चोक्तविशेषणस्या-

(व्यो०)परोक्षज्ञानजनकत्वेन भूतादुत्पत्तिप्रतिषेधेनेत्यन्यथासिद्धम्। निर्मूलं चेन्द्रियाणामहंकारप्रभवत्वम्। तत्सद्भावे प्रमाणासम्भवात्। तथाहि-प्रधानसद्भावे सत्येषा प्रतिक्रिया। तस्य चासत्त्वं वक्ष्यमाणमिति। येषां चासंसारमंडलव्यापीन्द्रियाणि तेषामशेषविषयग्रहणप्रसङ्गः। अथादृष्टवशान्नियतदेशे वृत्तिर्व्यज्यते इति। अत्र प्रवृत्तीनां तादात्म्ये न किञ्चिदुक्तं स्यात्। व्यतिरेके तु तदेवेन्द्रियमिति संज्ञाभेदमात्रमेव। अथ नियतविषयावबोधान्यथानुपपत्त्या तदाकारतयैवेन्द्रियस्य परिणामो निश्चीयते। तन्न। अन्यथाप्युपलम्भात्। तथाहि-नियतार्थसन्निकर्षेप्युपलंभो घटत एव। न च व्यापित्वं परस्याभीप्सिततरमिति नेह प्रतन्यते। परिणामपक्षश्च न संभवतीति वक्ष्याम इत्यलम्।

तथा बाह्यैनैकेनेन्द्रियेण गृह्यन्त इति बाह्यैकैकेन्द्रियग्राह्यास्ते च ते विशेषगुणाश्चेति ते विद्यन्ते येषां तानि तद्वन्ति तेषां भावो बाह्यैकैकेन्द्रियग्राह्यविशेषगुणवत्त्वम् समवेता हि यथोक्ताः गुणास्तदुपलक्षितो वा समवायः। गुणवत्त्वं सर्वेष्वस्तीति विशेषग्रहणम्। विशेषगुणवत्त्वं स्वात्मन्यस्तीति बाह्येन्द्रियग्राह्यग्रहणम। इन्द्रियग्राह्याश्च संख्यादयोपि भवन्ति। न च विशेषगुणाः। तथापि एकैकग्रहणमनर्थकं बाह्येन्द्रियग्राह्यविशेषगुणवत्त्वस्यान्यत्राभावात्। सत्यम् तथापि द्वितीयं साधर्म्यमित्यदोषः। तथाहि—संख्यादेर्द्वीन्द्रियग्राह्यत्वादेकेन्द्रियग्रहणम्। एकेन्द्रियग्राह्यत्वं च रूपादिष्वंसभवि स्यात्, न ह्येकमिन्द्रियं सर्वेषां प्रकाशकमित्येकैकग्रहणम्। तथाप्यन्तःकरणस्य बाह्येन्द्रियाद्यधिष्ठानद्वारेण व्यापारासंभवित्वमेवेति बाह्यग्रहणम। एवं च बाह्यैकैकेन्द्रियग्राह्यगुणवत्त्वम् विशेषपदत्यागेन द्वितीयं साधर्म्यमिति॥

(भा०) चतुर्णां द्रव्यारम्भकत्वस्पर्शवत्त्वे॥

(सू०) स्पर्शवत्त्वं-स्पर्शसमवायित्वम्। धूमपिशाचादेरप्यनुद्भूतस्पर्शवत्त्वान्न तत्राव्याप्तिः। स्पर्शवद्वृत्तिद्रव्यत्वाव्यापकजातिमत्त्वे वा तात्पर्यम्॥

(से०) चतुर्णामिति। द्रव्यजनकत्वमाकाशादावपीति द्रव्यसमवायिकारणकत्वं तदर्थः। तदाप्यवयविन्यतिव्याप्तिवारणाय तद्वृत्तिद्रव्य-

(से०) विभाजकोपाधिमत्त्वपरम् । स्पर्शवत्त्वं समवायेन मनसि परमाणुत्वं नभःप्रभृतौ परममहत्त्वं पृथिव्यादौ तु तद्व्यापकाणुत्वावधिकापकर्षाश्रयाणुत्वम् त्र्यणुकादौ महत्त्वावधिकापकर्षाश्रयमहत्वम्। तथा चावान्तराणुत्ववद्वृत्तिद्रव्यविभाजकोपाधिमत्त्वम्-अवान्तरमहत्त्ववद्वृत्तिद्रव्यविभाजकोपाधिमत्त्वं च चतुर्णां लक्षणं बोध्यम ॥

(व्यो०) तथा चतुर्णां द्रव्यारम्भकत्वं स्पर्शवत्त्वं चेति द्रव्यारम्भकत्वस्पर्शवत्त्वे । तन्न ज्ञायते केषामिति, विशेषानभिधानात् पृथिव्यादीनामित्यनुवर्तनीयम् , अनन्तरत्वादिति । किं पुनर्द्रव्यारम्भकाणां भावो द्रव्यारंभकत्वम्। द्रव्योत्पत्तौ समवायिकारणत्वम्-कार्यद्रव्यस्य समवायः। तेन हि सता द्रव्यं द्रव्योत्पत्तौ समवायिकारणमिति व्यवहारात् । तथाहि-द्रव्यारंभकाणां भावो द्रव्यारंभकत्वम् , येन सता द्रव्यमुत्पादयन्तीति न विवक्षितम् । किं तर्हि? येन सता द्रव्यमारभन्त इति द्रव्योत्पत्तौ समवायिकारणानीति व्यवहारः । स च द्रव्यसमवायेन सता भवतीति द्रव्यारंभकत्वम् द्रव्यसमवाये एव । अथ येन सता स्वसमवेतद्रव्यमारभन्ते इति विवक्षा, तत्र यदि स्पर्शवतामेव द्रव्यारंभकत्वदर्शनात्स्पर्श एव । तथापि स्पर्शवत्त्वेन गतार्थत्वाद्व्यर्थं स्यात् द्रव्यारंभकत्वम् ॥ अत्रैके—सहकारिविशेषोपचितस्पर्शे द्रव्यारंभकत्वम् । स्पर्शवतां भावः स्पर्शवत्त्वं स्पर्शोपलक्षितः समवाय—इति परिहारं ब्रुवते ॥

(भा०) त्रयाणां प्रत्यक्षत्वरूपवत्त्वद्रवत्ववत्त्वानि ॥

(सू०) त्रयाणां पृथिव्यादीनामिति पूर्वेणान्वयः । प्रत्यक्षत्वं बहिरिन्द्रियग्राह्यवृत्तिद्रव्यत्वन्यूनवृत्तिजातिमत्त्वम् । नातः परमाण्वाद्यव्याप्तिरात्मन्यतिव्याप्तिर्वा । रूपवत्त्वमिति । रूपसमवायित्वं रूपसमवायिवृत्तिद्रव्यत्वाव्यापकजातिमत्त्वं वार्थः, तेनानुद्भूतरूपासत्त्वेऽपि न क्षतिः । द्रवत्वं द्रुतवृत्तिद्रव्यत्वाव्यापकजातिमत्त्वम् , नातो घटकरकावह्न्याद्यव्याप्तिः ॥

(से०) त्रयाणामिति । प्रत्यक्षत्वं रूपादावपीति बाह्यप्रत्यक्षद्रव्यत्वम् । आत्मन्यनतिप्रसक्तये बाह्येति । बाह्येन्द्रियप्रत्यक्षवृत्तिद्रव्य-

विभाजकोपाधिमत्त्वन्तु तदर्थो नातः पृथिवीपरमाण्वादावव्याप्तिः। रूपवत्त्वं-रूपसमवायः। द्रवत्वं-द्रवत्ववद्वृत्तिद्रव्यविभाजकोपाधिमत्त्वम्, नातः पाषाणादावव्याप्तिः॥

(व्यो०) तथा पृथिव्यादीनां त्रयाणां साधर्म्यमाह प्रत्यक्षवत्त्वं च रूपवत्त्वं च द्रवत्ववत्त्वं चेति। तथोक्तानां प्रत्यक्षाणां भावः प्रत्यक्षत्वम्। अपरोक्षज्ञानविषयत्वं तेन सता प्रत्यक्षाणीति व्यवहारात्। महत्त्वादिकारणयोगो वा। आत्मादेस्तु प्रत्यक्षतायां साधर्म्यमात्रम्। अप्रत्यक्षत्वे च व्यावृत्तमिति। अन्ये त्वर्थतया भावाद्बाह्येन्द्रियविवक्षया प्रत्यक्षत्वमत्र विवक्षितम्। तच्चात्मादिषु नास्तीति व्यावृत्तं साधर्म्यमिति मन्यन्ते॥ निर्विकल्पकसविकल्पकज्ञानविषयत्वं च न व्यावृत्तमात्मन्यपि भावात्। तथा चाहमिति शब्दः पृथिव्यादिशब्दव्यतिरेकादात्मनि वर्तत इत्युपलब्धसमयस्य तत्स्मरणात् भवत्येव सविकल्पकज्ञानमिति। तथा रूपं विद्यते येषां तानि रूपवन्ति तेषां भावो रूपवत्त्वं रूपसमवायः समवेतं वा रूपमिति। तच्चाविवक्षितविशेषम्। अन्यथा हि क्षित्यादिव्यावृत्तरूपाधिकरणमेवेति। तथा द्रवाणां भावो द्रवत्वं समवेतो द्रवत्वगुणस्तत्समवायो वा। अत्रापि न विशेषविवक्षा, अन्यथा क्षितितेजसोर्नैमित्तिकमपां च सांसिद्धिकमिति विशेष एव स्यात्॥

(भा०) द्वयोर्गुरुत्वं रसवत्त्वं चेति॥

(सू०) द्वयोः-क्षितिजलयोः। रसवत्त्वं-रससमवायित्वम्, रसवद्वृत्तिद्रव्यत्वाव्यापकजातिमत्त्वं वा। चकाराद्भास्वरान्यरूपवत्त्वाद्युपग्रहः॥

(से०) गुरुत्वरसवत्त्वे समवायेन। यद्यप्यधःसंयोगफलिका क्रिया पतनं तेजःप्रभृतिष्वपि तथापि गुरुत्वप्रयोजकजातिविशेषवत्पतनं द्रष्टव्यम्। आलोकप्रकाशवृत्तिद्रव्यविभाजकोपाधिमत्त्वं चार्थः। नन्वालोकप्रकाशत्वमालोकजन्यज्ञानविषयत्वम् आलोकेपि विषयरूपालोकस्य तत्रापि जनकत्वादिति चेन्न। स्वसत्ताकालीनालोकविलम्बप्रयुक्तविलम्बप्रतियोगिसंज्ञाकारविषयत्वस्य विवक्षितत्वात्। न चालोकसाक्षात्कार आलोककाल आलोकविलंबेन विलम्बते घटादिसाक्षात्कारस्तु तथेति भावः॥

(व्यो०) तथाहि गुरोर्भावो गुरुत्वं समवेतो गुरुत्वगुणस्तत्समवायो वा । तथा रसो विद्यते ययोस्ते रसवती तयोर्भावो रसवत्त्वं रसोपलक्षितस्समवायः समवेतो रसः ॥

(भा०) भूतात्मनां वैशेषिकगुणवत्त्वम् ॥

(सू०) भूतेति । भूतानामात्मनश्च वैशेषिकगुणवत्त्वं विशेषगुणतया परिभाषितगुणवत्त्वम्—

रूपस्पर्शगन्धरसशब्दाः सांसिद्धिको द्रवः ।

बुद्ध्यादिनव शब्दश्च वैशेषिकगुणाः स्मृताः ॥

इति प्राच्यैः परिभाषितत्वात् । यद्वा वैशेषिकः प्रत्यक्षविशेषायोचितः प्रत्यक्षं प्रति विषयविधया हेतुरिति यावत्, तादृशगुणवत्त्वमर्थः । तत्र प्रत्यक्षजातिमादाय गुणाद्यतिव्याप्तेर्वारणाय गुणेति ॥

(से०) भूतेति । ननु वैशेषिकगुणवत्त्वं विशेषगुणत्वं तच्च न जातिः द्रवत्वसंस्कारत्वमादाय जातिसङ्करप्रसंगात्-द्रवत्वस्य संस्कारत्वस्य च नैमित्तिकद्रवत्वं वेगादौ च सत्त्वेन विशेषगुणत्वस्य चासत्त्वेन सुखादौ विशेषगुणत्वस्य सत्त्वेन तयोरसत्त्वेन सांसिद्धिकद्रवत्वभावनयोरुभयसत्त्वेन परस्परात्यन्ताभावसामानाधिकरण्ये सति परस्परसामानाधिकरण्यस्य स्फुटत्वात् । नापि द्रव्यविभाजकोपाधिव्याप्तित्वम् यत्र सत्ता तत्र द्रव्यविभाजकोपाधिरिति व्याप्तेरसत्त्वात् । ननु येन रूपेण द्रव्यविभाजकोपाधिता तेन रूपेण व्यापकता विवक्षिता सा च गन्धादावस्ति यत्र गन्धस्तत्र पृथिवीत्वमित्यादिव्याप्तेः सत्त्वादिति चेन्न । यत्र रूपं तत्र पृथिवीत्वमित्यादिव्याप्तेरभावात्तत्राव्याप्तेः । नापि गुणत्वन्यूनवृत्त्यनेकवृत्तिवृत्तिजातिशून्यगुणत्वं विशेषगुणत्वम् , संख्यादिष्वगमनेपि परिमाणादिषु गतेरतिव्याप्तेः द्वित्वद्विपृथक्त्वादौ संयोगे विभागे चानेकवृत्तिवृत्तावपि परिमाणत्वादीनामतथात्वात् । नापि मनोवृत्तिगुणत्वन्यूनवृत्तिजातिशून्यत्वम्, भावनायामव्याप्तेः तत्र वेगवृत्तिसंस्कारत्वसत्त्वात् गुरुत्वनैमित्तिकद्रवत्वयोरव्याप्तेश्च । नापि नैमित्तिकद्रवत्वगुरुत्वभिन्नत्वे सति मनोवृत्तिगुणत्वन्यूनवृत्तिजातिशून्यगुणत्वं भावनायामव्याप्ते-

रिति चेत् ।

अत्रोच्यते-द्रव्यविभाजकोपाधितावच्छेदकावच्छिन्नव्यापकता-कद्रव्यविभाजकोपाधिनिरूपितव्याप्यतावच्छेदकजातिमद्गुणत्वं वि-शेषगुणत्वम् । यद्यपि रूपादौ रूपत्वादिजातिर्न तादृशी तथापि रूप-त्वाद्यवान्तरजातयस्तादृश्यः सन्त्येव पृथिव्यादिरूपरसस्पर्शेषु परस्प-रवैलक्षण्यसत्त्वाद्गन्धवत् सुखादिसांसिद्धिकद्रवत्वस्नेहशब्देषु ता-दृशजातिमत्त्वं स्फुटमेव यत्र सांसिद्धिकद्रवत्वं तत्र जलत्वमित्यादि-व्याप्तेः सत्त्वात् । यत्र नैमित्तिकद्रवत्वं तत्र पृथिवीत्वमित्यादिव्याप्ते-रसत्त्वात्, पृथिवीतेजोनैमित्तिकद्रवत्वयोः परस्परव्यावृत्तजातेरभा-वाच्च । एवं गुरुत्वादावपि बोध्यम् । यत्र घटस्तत्र पृथिवीत्वमि-त्यादिव्याप्तेरसत्त्वेन घटादावनतिप्रसक्तये गुणमिति । न हि समवा-यसम्बन्धेन घटे पृथिवीत्वं व्यभिचरति तस्मान्निरुक्तलक्षणे न को-पि दोष इति । यद्वा गुरुत्वनैमित्तिकद्रवत्वान्यत्वे सति भावनान्य-मनोवृत्तिगुणत्वन्यूनवृत्तिजातिमद्भिन्नगुणत्वम् । इदानीं भावनापि सं-गृहीता भवति विशेषणाभावाद्भूतस्य विशिष्टाभावस्य तत्र निरातंक-त्वात् ।

वर्धमानोपाध्यायास्तु-स्वाश्रयसमानाधिकरणद्रव्यविभाजकोपा-ध्यत्यन्ताभावसमानाधिकरणगुणावृत्तिगुणवृत्तिगुणत्वव्याप्यजाति-मद्गुणवत्त्वं विशेषगुणत्वम् । स्वं-गन्धत्वं, तस्याश्रयो गन्धः तत्र समाना-धिकरणो द्रव्यविभाजकोपाधिः पृथिवीत्वं तदत्यन्ताभावसमाना-धिकरणो द्रव्यगुणजलादौ स्नेहादिस्तदवृत्तिर्गन्धलक्षणवृत्तिर्गु-णत्वव्याप्यजातिर्गन्धत्वं तद्वद्गुणत्वं गन्धस्य । एवं रूपत्वादिजाती-रुपादाय रूपादौ वर्णयेत् । स्नेहसुखादौ लक्षणं स्फुटमेवत्यक्षरता-त्पर्यमित्याहुः । तत्र समानाधिकरणगुणावृत्तीत्यत्र गुणपदमखण्डा-भावशरणप्रवेशाद्भवतु निरस्ताशंकम्, गुणवृत्तिगुणत्वव्याप्यपदयो-स्तु न किमप्यवलम्बितं पश्यामः । प्रत्यक्षगुणवद्वृत्तिद्रव्यविभाजको-पाधित्वमप्येवमेव ॥

(व्यो०) एवं भूतानि चात्मानश्चेति तथोक्तास्तेषां वैशेषि-कगुणवत्त्वं साधर्म्यम् । विशेषगुणा एव वैशेषिकास्ते विद्यन्ते येषां तेषां भावस्तत्त्वं तदुपलक्षितः समवायः ते च समवेताः ॥

(भा०) क्षित्युदकात्मनां चतुर्दशगुणवत्त्वम् ॥

(सू०) चतुर्दशगुणवत्त्वमिति । गन्धरसरूपस्पर्शद्रवत्वगुरुत्वपरत्वापरत्वसंख्यापरिमाणपृथक्त्वसंयोगविभागसंस्कारेषु स्नेहनिरुक्तसंख्यादिबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मेषु च यानि चतुर्दशत्वानि तेषामन्यतमपर्याप्त्यधिकरणगुणवद्वृत्तिद्रव्यत्वाव्यापकजातिमत्त्वमर्थः, तेन पृथिव्यां यादृशाश्चतुर्दशगुणास्तादृशानां जलादावसत्त्वेऽपि न क्षतिः। न चेश्वरात्मनि धर्माधर्मसंस्कारविरहात्तत्राव्याप्तिः आत्मपदेन सुखसमवायिकारणतावच्छेदकजातिमत एव लक्ष्यत्वात् । प्राच्यैरपि–'जलक्षितिप्राणभृतां चतुर्दश' इत्युक्त्या प्राणिनामेव लक्ष्यत्वमूरीकृतम् ।

अन्ये तु चतुर्दशगुणवत्त्वमित्यस्य तेजोन्यत्वे सति प्रत्यक्षवृत्तिद्रव्यत्वावान्तरजातिमत्त्वे तात्पर्यम् । ईश्वरस्तु नात्मवृत्तिजातिमान् अतो न तत्र प्रसङ्ग इत्याहुः ॥

(से०) चतुर्दशेति । नन्वीश्वरेऽव्याप्तिरिति चेन्न, चतुर्दशगुणवद्वृत्तिद्रव्यविभाजकोपाधिमत्त्वे पर्यवसानात् ॥

(व्यो०) एवं क्षितिश्चोदकञ्चात्मानश्चेति तथोक्तास्तेषां साधर्म्यं चतुर्दशगुणवत्त्वम् । तथाहि—चतुर्दशगुणा विद्यन्ते येषां ते तद्वन्तः तेषां भावस्तत्त्वं समवेतास्ते तत्समवायो वा । अत्र चान्यगुणानामन्यत्रावृत्तेः संख्यामात्रं साधर्म्यं विवक्षितमिति ज्ञेयम् ॥

(भा०) आकाशात्मनां क्षणिकैकदेशवृत्तिविशेषगुणवत्त्वम् ॥

(सू०) क्षणिकेति । क्षणिकः–क्षणत्रयावृत्तिर्यः ध्वंसेन सहैकदेशवृत्तिर्विशेषगुणस्तद्वत्त्वमित्यर्थः । प्रागनाश्यरूपादिमत्तया परमाणावतिव्याप्तिवारणार्थमवृत्त्यन्तम् । क्षणत्रयावृत्तिरूपादिमतो द्विक्षणस्थायिघटादेर्वारणाय वृत्त्यन्तम् । अङ्गुलीकर्मजनितस्य स्वसमानकालोत्पन्नशाखाकर्मजविभागनाश्यस्य शा-

खाङ्गुलीसंयोगस्य क्षणत्रयावृत्तित्वात् स्वध्वंससमानदेशत्वाच्च तद्वतः शाखादेर्वारणाय विशेषेति । न चेश्वरात्मन्यतिव्याप्तिः, तस्य पूर्ववदलक्ष्यत्वात् । आचार्यास्तु-क्षणिकैकदेशवृत्त्योर्वैकल्पिकोपादानात् क्षणिकविशेषगुणवत्त्वं अव्याप्यवृत्तिविशेषगुणवत्त्वं चेति लक्षणद्वये तात्पर्यमाहुः । तच्चिन्त्यम् । द्वयोरपि द्विक्षणस्थायिद्रव्यातिव्याप्त्यापत्तेः ॥

(से०) आकाशात्मनामिति । नन्वन्त्यशब्दस्थोपांत्यशब्दनाश्यतापक्षे क्षणिकविशेषगुणवत्त्वमाकाशे सिद्धत्यात्मनि तु कथम् ? क्षणिकत्वस्य यथाश्रुतस्य विवक्षितत्वे सामान्यगुणस्य कस्यचित्तादृशोऽभावाद्विशेषपदं व्यर्थम् एकदेशवृत्तिपदं च व्यर्थमिति चेन्न । क्षणत्वव्यापकस्थितिशून्यविशेषगुणवत्त्वस्य लक्षणत्वात् । अत्र द्वित्वसंयोगादावतिव्याप्तिवारणायोभयत्र विशेषपदम् । द्रव्यविभाजकोपाधिविवक्षा तूभयत्र अन्यथेश्वरात्मन्यतिव्याप्तिः ॥

(व्यो०) आकाशं चात्मानश्चेति तथोक्तास्तेषां साधर्म्यं क्षणिकैकदेशवृत्तिविशेषगुणवत्त्वम् । क्षणिकाश्च ते एकदेशवृत्तयश्चेति ते विद्यन्ते येषां ते तद्वन्तः तेषां भावस्तत्त्वं तत्समवायः ते च समवेताः । गुणवत्त्वं सर्वेष्वस्तीति विशेषग्रहणम् । तत् क्षित्यादिष्वपि समानमित्येकदेशवृत्तिपदम् । तथापि क्षणिकग्रहणमनर्थकमेकदेशवृत्तिविशेषगुणवत्त्वस्यान्यत्राभावात् । तन्न । द्वितीयसाधर्म्यस्य विवक्षितत्वात् । तथाहि—विशेषगुणवत्त्वमन्यत्राप्यस्तीति क्षणिकत्वग्रहणम् । क्षणिकत्वं चाश्रये विद्यमाने सत्याशुतरविनाशित्वम् । क्षणिकगुणवत्त्वं च विभागापेक्षयान्यत्राप्यस्तीति विशेषग्रहणम् । क्षणिकविशेषगुणवत्वं चान्यत्राभावाद्यावृत्तं साधर्म्यमिति ॥

(भा०) दिक्कालयोः पञ्चगुणवत्त्वम् ॥

(सू०) पञ्चगुणवत्त्वमिति । संख्यापरिमाणपृथक्त्वसंयोगविभागवत्त्वमित्यर्थः । क्वचिदरूढावपि द्विगुविषये संख्यापूर्वकः कर्मधारयः पञ्चगव्यादिपदवत् । पञ्चगुणशब्दो वा संख्यादिपदवत् । न च पृथिव्यादावतिव्याप्तिः, संख्यादिपञ्चकान्यगुणशून्यत्वे सति गुणवत्त्वस्य विवक्षितत्वात् ॥

(से०) द्वीगिति । गुणविभाजकोपाधिपुरस्कारप्रवृत्तगणनाप्रा-प्तषष्ठगुणराहित्ये सति गुणवत्त्वमित्यर्थः, तेन द्वित्वादिभेदेन नास-म्भवो न वा गुणादावतिप्रसक्तिः ॥

(व्यो०) तथा दिक्कालयोः पञ्चगुणवत्त्वं विशेषात्साधर्म्यम् । पञ्च गुणा विद्यन्ते ययोस्तौ पञ्चगुणवन्तौ तयोर्भावः पञ्चगुणवत्त्वम् । पञ्चगुणोपलक्षितसमवायस्ते वा समवेताः । एतच्च संख्यामात्रसा-म्येन साधर्म्यम् ॥

(भा०) **सर्वोत्पत्तिमतां निमित्तकारणत्वं च ॥**

(मु०) सर्वेति । कार्यमात्रं प्रति अधिकरणविधया नि-मित्तकारणत्वमित्यर्थः । कार्यमात्रं प्रत्यदृष्टद्वारा हेतुरप्यात्मा ना-धिकरणत्वेन तथा । वस्तुतः कार्याण्यात्मजानि तददृष्टजन्यत्वा-त्तदीयसुखादिवदित्यादेरप्रयोजकत्वाददृष्टद्वारात्मनः कार्यमात्रं प्र-ति हेतुत्वे मानाभावः तत्तत्कार्यं प्रति तत्तत्कालदिशोर्विशिष्य हे-तुत्वस्यावश्यकत्वात् 'यद्विशेषयोः कार्यकारणभाव' इति न्यायेन पुनः कार्यसामान्यं प्रत्यनुयोगितावच्छेदकपर्यवसिताभ्यां काल-त्वादिकृत्वाभ्यां महाकालदिशोरपि हेतुत्वम् । अतः कार्यसामा-न्यजनकतावच्छेदकीभूतधर्मवद्विभुत्वं दिक्कालयोरेव साधर्म्यमि-ति ध्येयम् । चकाराद्विशेषगुणशून्यविभुत्वादेरुपग्रहः ॥

(से०) सर्वोत्पत्तिमतां निमित्तकारणत्वमिति । अत्र निमित्तप-दमनादेयम् स्वसमवेतद्वित्वादौ समवायिप्रसक्तसमवायिकार-णत्वात् । न चादृष्टेश्वरात्मनोरतिव्याप्तिः, आधारतया सर्वोत्प-त्तिमत्कारणत्वस्य दिक्कालयोरेव सत्त्वात् तदुपाधावनतिप्रसक्तये द्रव्यत्वं विवक्षितम् ॥

(व्यो०) सर्वे च ते उत्पत्तिर्विद्यते येषां ते उत्पत्तिमन्तश्चेति तथोक्तास्तेषामुत्पत्तौ निमित्तकारणत्वमिति । निमित्तपदस्य कारण-पर्यायस्याप्यभिधानं समवाय्यसमवायिव्यवच्छेदार्थम् । अन्यथा हि समवाय्यसमवायिसाधारणत्वात्तदपेक्षयाऽऽसम्भवित्वमेव स्यात् । तथाहि-निमित्तकारणस्य भावो निमित्तकारणत्वम् । येन सता नि-

मित्तकारणमिति व्यवहारः। स च कारणयोः सतोः समवाय्यसमवायिलक्षणभावस्तेन सता तथा व्यवहारात्। यद्यपि स्वगतसंख्योत्पत्तावस्ति समवायिकारणत्वम्। तथापि सर्वेषामेवेति विशेषणाददोषः॥

(भा०) क्षितितेजसोर्नैमित्तकद्रवत्वयोगः॥

(सू०) नैमित्तिकेति। तेजःसंयोगजद्रवत्ववदवृत्तिद्रव्यत्वाव्यापकजातिमत्त्वमर्थः। घृतादेः स्वर्णादेश्चारम्भकपरमाणावेव न्ह्यादिसंयोगेन द्रवत्वोत्पादाद् घटवन्ह्यादेरपि संग्रहाय निरुक्तजातिगर्भता॥

(से०) क्षितीति। नैमित्तिकत्वं यदि सकारणकत्वं तदा जलद्रवत्वमपि तथेत्यतिव्याप्तिः निमित्तकारणत्वमपि तथेत्यतिव्याप्तिरेव, किन्तु तेजः संयोगजन्यत्वं नैमित्तिकत्वम्। तथाच तेजसंयोगजन्यद्रवत्त्ववद्वृत्तिद्रव्यविभाजकोपाधिमत्त्वे तात्पर्यम्, नातः प्रस्तरादावव्याप्तिः। सूर्यागस्य ? दिगुपाधितया यद्यपि जलद्रवत्वेपि कारणता तथापि नासमवायिकारणता विवक्षिता तु सेति भावः॥

(व्यो०) क्षितिश्च तेजश्चेति क्षितितेजसी तयोर्नैमित्तिकद्रवत्वयोगः साधर्म्यम्। निमित्तादुपजातं नैमित्तिकमिति निमित्तशब्दः सामान्यशब्दोप्यर्थादग्निसंयोगे वर्तते। नैमित्तिकं च तद्द्रवत्वं चेत्येकेन योगः समवायः साधर्म्यमिति॥

(भा०) एवं सर्वत्र विपर्ययात्साधर्म्यं वैधर्म्यं च वाच्यमिति॥

(सू०) नन्वाश्रितत्वं चान्यत्रेत्यादिनाऽऽश्रितत्वादिकं नित्यद्रव्यान्यस्य साधर्म्यमेवाभिहितं न तु वैधर्म्यं तद्व्यावृत्तधर्मस्यैव तद्वैधर्म्यत्वात्, तत्कुतः साधर्म्यवैधर्म्याभ्यां पदार्थतत्त्वनिरूपणमत आह एवमिति। उक्तक्रमेण सर्वत्र लक्ष्येषु यत् साधर्म्यं तदेव विपर्ययात् लक्ष्येतरव्यावृत्तत्वात् वैधर्म्यं वैधर्म्यमपि बोध्यम्। न तु यद्यस्य साधर्म्यन्तदेव तस्य वैधर्म्यतया ग्राह्यमित्यर्थः॥

(से०) एवमिति । यथा भावेषु द्रव्येषु च कस्यचित्परिहारेण कस्यचिच्च सङ्ग्रहेण एतानि साधर्म्याणि वैधर्म्याणि च निरुक्तानि । तथा सर्वत्र विपर्ययात्पूर्वलक्षणसंगृहीतेषु किञ्चित्परिहृत्य परिहृतेषु किञ्चित्संगृह्य साधर्म्यवैधर्म्यान्तरे वाच्ये । सर्वत्र पूर्वलक्ष्येऽलक्ष्ये च विपर्ययो लक्ष्ये कस्यचित्परिहारोऽलक्ष्ये कस्यचित्सङ्ग्रहः । एवञ्चास्मदुक्तलक्ष्यालक्ष्यसंकोचं विनापि लक्षणान्तरं निर्वाच्यमिति भावः । आचार्यस्त्वन्यथा व्याख्यातवान् तत्तत्रैवानुसन्धेयम् । आश्रितत्वञ्चान्यत्र नित्यद्रव्येभ्य इत्युक्तम् । एतद्विपर्ययो निरवयवत्वमन्यत्राऽनित्यद्रव्येभ्य इति ज्ञातव्यम् । लक्ष्यीकृतस्यानित्यद्रव्यस्यालक्ष्यपक्षनिःक्षेपात् अलक्ष्यस्य नित्यद्रव्यस्य लक्ष्ये प्रपाताद्विपर्ययः स्फुट एव । द्रव्यादीनां त्रयाणा मन्यनिरूपितसमवायवत्त्वम् । सामान्यविशेषयोरन्यनिरूपितसमवायराहित्ये सति समवायवत्त्वम् । विशेषसमवाययोरैन्द्रियकावृत्तिभावविभाजकोपाधिमत्त्वम् अनित्यद्रव्यसमवेतावृत्तिभावविभाजकोपाधिमत्त्वं वा । द्रव्यगुणयोर्नित्यवृत्तिसत्तेतरजातिमत्त्वम् । द्रव्यकर्मणोर्नित्यवृत्तिनित्यावृत्तिसत्तान्यूनवृत्तिजात्यन्यूनवृत्तिमत्त्वम् । अत्र संयोगत्वादिना संयोगादावनतिप्रसक्तये सत्तान्यूनवृत्तिजात्यन्यूनवृत्तीति । गुणकर्मणोर्मनःसमवेतवृत्तिसत्तेतरजातिमत्त्वम् । द्रव्यादीनां त्रयाणामनित्यवृत्तिभावविभाजकोपाधिमत्त्वम् । द्रव्यसामान्यादीनामसमवायिकारणावृत्तिभावविभाजकोपाधिमत्त्वम् । गुणसामान्यविशेषाणामाकाशसमवेतवृत्तिभावविभाजकोपाधिमत्त्वम् । गुणसामान्ययोर्घटपटोभयसमवेतवृत्तिभावविभाजकोपाधिमत्त्वम् । द्रव्यगुणसामान्यानामनेकसमवेतवृत्तिभावविभाजकोपाधिमत्त्वम् । विशेषकर्मसमवायानामनेकसमवेतावृत्तिभावविभाजकोपाधिमत्त्वम् । द्रव्यसमवाययोरसमवेतवृत्तिभावविभाजकोपाधिमत्त्वम् । द्रव्यादीनां पञ्चानां समवेतवृत्तिभावविभाजकोपाधिमत्त्वम् । द्रव्यादीनां चतुर्णामनित्यसमवेतवृत्तिभावविभाजकोपाधिमत्त्वम् । द्रव्यादीनां त्रयाणां कारणसमवेतवृत्तिभावविभाजकोपाधिमत्त्वम् । इत्यादिभाष्यभाषितघोषणाजातबुद्ध्यनुसारेण वाच्यम् ॥

भाष्याम्भोनिधिसेतौ वीरवरिये यशोहेतौ ।
रचितो द्वितीयभागो विदुषा श्रीपद्मनाभेन ॥ १ ॥

श्रीपद्मनाभविदुषा पितुरुपदिष्टात्समाहृत्य ।
विशदीकृतप्रयत्नात्कृतिषु विनोदाय गूढोऽर्थः ॥ २ ॥

(व्यो०) इदानीमुपसंहारव्याजेन शिष्यं शिक्षयति । यदेतद्व्याख्यातं मया साधर्म्यं तदेव सर्वत्र विपर्ययाद्यावृत्तं भेदान्तराद्वैधर्म्ये वाच्यमिति । यदि वा साधर्म्यं व्याख्यातमित्युपसंहारः । विपर्य्ययाद्वैधर्म्ये वक्ष्यमाणमित्यनागतार्थसूचनमिति ॥

(भा०) इहेदानीमेकैकशो वैधर्म्यमुच्यते ॥

पृथिवीत्वाभिसम्बन्धात् पृथिवी । रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वसंस्कारवती । एते च गुणविनिवेशाधिकारे रूपादयो गुणविशेषाः सिद्धाः । चाक्षुषवचनात् सप्तसंख्यादयः । पतनोपदेशाद्गुरुत्वम् । अद्भिः सामान्यवचनात् द्रवत्वम् । उत्तरकर्मवचनात् संस्कारः ॥

(सू०) इह पृथिव्यादिनवसु एकैकशः प्रत्येकं वैधर्म्यमितरव्यावर्तकम् ।

ननु पृथिवीतरेभ्यो भिद्यते गन्धवत्त्वादित्याद्यनुमाने भूताङ्क एव यदि पृथिवीपदस्यार्थः तदा तदितरभेदकत्वं न गन्धवत्त्वादेः पटादौ व्यभिचारादत आह पृथिवीत्वाभिसम्बन्धादिति । पृथिवीत्वं नाम जातिभेदस्तस्याभिमतसम्बन्धसमवायात् पृथिवीपक्ष इति शेषः । न च तादृशजातौ मानाभावः । गन्धसमवायिकारणतावच्छेदकत्वेन तत्सिद्धेरन्यथा गन्धजनकतेजःसंयोगात् परमाणाविव तेजस्यपि गन्धप्रसङ्गाद्विलक्षणसंयोगत्वेनैव गन्धं प्रति तस्य हेतुत्वादिति भावः । रूपादिचतुर्णां पार्थिवत्वमत्र संमतिमाह एत इति । गुणनिवेशाधिकारे के कस्य गुणा इत्याशङ्क्याह द्वितीयाध्याये रूपरसगंधस्पर्शवती पृथिवीति सूत्रात् रूपादयश्चत्वारो पृथिव्या विशेषगुणा इत्यर्थः । रूपिषु संख्यापरिमाणसंयो-

गन्धविभागपरत्वापरत्वानि चाक्षुषाणि इति सूत्रेण रूपिमात्रे चाक्षुषसंख्यादिकथनात् संख्यादिसप्तकं पृथिव्यामित्यर्थः । पतनोपदेशादिति । गुरुत्वात्पतनम् इति सूत्रे गुरुत्वजन्यत्वेन पतनवत्त्वोपदेशात् क्षितौ गुरुत्वमित्यर्थः । अद्भिरिति । सर्पिरादीनां द्रवत्वमद्भिः सामान्यमिति सूत्रेण घृतजतुमभृतीनां द्रवत्वमद्भिः सामान्यं समानधर्म इत्युक्तमतः पृथिव्यां द्रवत्वमित्यर्थः । उत्तरेति । नोदनाद्याभिषोः कर्म तत्कर्मकारिताच्च संस्कारादुत्तरमिति सूत्रे संस्कारजकर्मकथनाद्वेगाख्यः संस्कार इत्यर्थः ।

अथोत्तरार्धः ।

(से०) इहेति । इह भाष्यलक्षणग्रन्थे इदानीमवसरे जातेसाधर्म्यनिरूपणे जाते वैधर्म्यनिरूपणप्रतिबन्धकायाः साधर्म्यजिज्ञासाया अपगमात् प्रतिबन्धकजिज्ञासापगमस्यावसरत्वात् । एकैकश इत्यत्र शस्प्रत्ययोपादानं सकलपृथिव्यादिप्राप्त्यर्थम् । वीप्सायां हि तमादायाप्युपपत्तेरित्याचार्याः । नन्वन्यत्र वीप्सायां अशेषलाभसामर्थ्योपलंभादत्रापि तयैव तथा लाभे किं शस्प्रत्ययेनापि, अन्यत्रापि तथा किञ्चित्क्रियेत इति चेन्न । प्रकृतवीप्सा द्रव्यमादाय न मूर्ताद्यादायेत्यस्या शस्प्रत्ययेन व्यर्थं सादिति न्यायेन बोधनात् । एवं च भाष्ये सम्बन्धिनोऽनुपादानाद्द्रव्यवत्पूर्वप्रक्रान्तस्य मूर्तादेरपि प्राप्तिः स्यात्तथाच मूर्तेष्वेकैकं वैधर्म्यमुच्यत इति प्राप्तौ सकलद्रव्यवैधर्म्यप्रतिज्ञा न प्राप्येत कृते तु शस्प्रत्यये नियुक्तनयेन प्राप्यत एवेत्यर्थवानेव प्रत्यय इति । वैधर्म्यं व्यावर्तको धर्मः । यद्यप्येकैकशो धर्म उच्यत इत्युक्तौव वैधर्म्यत्वं प्राप्यत एव एकैकधर्मस्य तत्रैव पर्याप्तेस्तथापि शाब्दीति न्यायात्तथोक्तिः ।

पृथिवीत्वाभिसंबन्धादिति । अभिसम्बन्धोऽभिमतः समवायलक्षणः, तेन संयुक्तसमवायादिना जलादावतिप्रसक्तिर्वारिता, पृथिवी इतरभिन्नतया ज्ञातव्येति शेषः । पृथिवीत्वं च द्रव्यत्वव्याप्यो जातिविशेषः । तत्सिद्धिस्तु-गन्धसमवायिकारणतावच्छेदकत्वेन । न च सुरभ्यसुरभिकपालारब्धेपि घटे गन्धोत्प-

त्यापत्तिः, प्रागभावविलम्बेन विलम्बात्, नित्यस्यैव स्वरूपयोग्यस्य फलोपधानानियमात्। अवयवगतसजातीयान्यकगन्धविलम्बाद्विलम्ब इत्येके। तन्न-दृशा कामात्मके घटे नवसु कपालेषु सुरभिषु गन्धापत्तेः। अवयवगतविजातीयगन्धस्य प्रतिबन्धकत्वाभ्योत्पद्यत इति तु सम्यक्। ननु यत्र द्वित्रा अवयवाः सजातीयगन्धवन्तः कश्चित्तु विजातीयगन्धवदारभ्यतया निर्गन्धः तत्रावयविनि का गतिः! अवयवगतस्य विजातीयगन्धस्य प्रतिबन्धकत्वात्, तत्र गन्ध उत्पद्यत एवेति निर्गन्धावयवावच्छेदेन गन्धोत्पादकाभावात्। अवयवगतसजातीयगन्धाविरोधिनो वा प्रतिबन्धकत्वम्। तादृशश्च गन्धाभावस्तत्रास्त्येव अशेषावयवसजातीयगन्धत्वेन जनकता तदभावान्नोदाहृतस्थलेपि गन्धोत्पत्तिरिति तु तत्त्वम्। रत्नवदुपदेशसापेक्षघृतादिसाधारणानुगतव्यवहाराद्वा पृथिवीत्वसिद्धिः। गन्धात्यन्ताभावानधिकरणत्वस्य प्रतियोग्यतीन्द्रियत्वप्रयुक्तातीन्द्रियत्वकात्यन्ताभावगर्भतयाऽतीन्द्रियतया पृथिवीतरप्रत्यक्षासाक्षिकत्वात्, गन्धात्यन्ताभावानधिकरणत्वस्य पृथिव्यामसम्भवेन सामान्याभावस्य वाच्यतायान्तत्रातीन्द्रियस्यापि गन्धस्य प्रतियोगिकुक्षौ प्रवेशात्। ननु पृथिवीतरेभ्यो भिद्यते पृथिवीत्वादित्यनुमानमसङ्गतम् साध्याप्रसिध्या विशेषणज्ञानसन्देहासिद्धयाधयिषान्यतरगर्भपक्षतासम्बन्धिज्ञानप्रतियोगिज्ञानान्यतरसापेक्षान्वयव्यतिरेकान्यतरव्याप्तिज्ञानानामभावादिति चेत्। अत्राहुः—न तावत्साध्यज्ञानत्वेनानुमितित्वेन कार्यकारणभावः प्रमाणाभावाद्येन साध्यज्ञानविशेष्यकायामप्यनुमितौ साध्यज्ञानं मृग्यतां किन्तु विशेषणज्ञानत्वेन विशिष्टबोधत्वेन कार्यकारणभावः, तथाच पृथिव्यामितरभेद इति साध्यविशेष्यकानुमितौ पक्षलक्षणविशेषणसत्त्वान्नानुपपत्तिः। नन्वनुमानस्यायमेव स्वभावो यत् पक्षविशेष्यकामेवानुमितिमातनोति, कथमन्यथा प्रसिद्धानुमाने पर्वते वह्निरित्याकारां न करोतीति तत्कथं प्रकृतानुमानानुरोधेनातथाभूतस्वभावभानमिति चेत्। यद्विशेषणका लिङ्गपरामर्शस्तद्विशेषणकानुमितेरेव जायमानत्वात् इत्येके। तन्न-एवं हि वह्निव्याप्यधूमवानयमित्यत्र धूमविशेषणकानुमित्यापत्तेः। पर्वतो वह्निव्याप्यो धूम इत्यत्रानुमितौ धूमस्य विशेष्यतापत्तेश्च। यथा परामर्शे पक्षो भासते तथाऽनुमि-

तावपि। एवञ्च पक्षविशेषणकात्परामर्शात् पक्षविशेषणिकानुमिति स्तद्विशेष्यकात्तद्विशेष्यका तथाच, प्रकृते पक्षविशेषणकलिङ्गपरामर्शात्तथैवानुमितिरुत्पद्यते। जायमानोऽपीह पक्षविशेष्यकः परामर्शो न पक्षविशेष्यकामनुमितिं जनयति साध्यरूपाविशेषणज्ञानविरहादित्यपरे। प्रसिद्धसाध्यस्थलीयलिङ्गपरामर्शस्यायं महिमा प्रत्यक्षविशेष्यकोभवानुमितिं जनयति तथाच तत्र पक्षविशेषणकादपि परामर्शात्पक्षविशेष्यकानुमितिः इह तु तदभावात्पक्षविशेषणिकैवानुमितिरितीतरे। परामर्शस्यानुमितिजनकत्वं स्वभावः। न चात्र साध्यविशेषणज्ञानाभावादिति तद्विशेष्यकैव जायत इत्यन्ये। घटघटत्वनिर्विकल्पानन्तरं घटत्वविशेषणकमेव सविकल्पकं जायते न घटविशेष्यकमित्यत्र न दृष्टं नियामकं विशेषणज्ञानविशेष्यज्ञानसामान्यसंसर्गाग्रहाणामुभयत्र तुल्यत्वान्निर्विकल्पस्योभयत्र तुल्यत्वात्। घटे संयोगस्येव घटत्वे संयुक्तसमवायस्य सत्त्वादसंसर्गाग्रहस्य निरवग्रहत्वात्। अन्यथा घटोऽयमिति सविकल्पकस्याप्यनापत्तेः। नथाच तत्रादृष्टमेव क्वाचित्कविशेषणतायां नियामकम। एवं च यत्रानुमितावप्युभयोर्विशेषणयोर्ज्ञानं तत्रैकस्य विशेषणतायामदृष्टमेव नियामकमकल्पत्वात्, न तु लिङ्गपरामर्शस्वभावकल्पनम्—अकल्पतया गुरुत्वात्; इह तु साध्यरूपविशेषणस्याज्ञानादृष्टमेव सामान्यासाध्यविशेष्यकाप्यनुमितिरिति तु वयं वदामः

पक्षतापि न संदिग्धसाध्यकत्वम् सिषाधयिषितसाध्यत्वं वा। संदेहसिषाधयिषे विनापि गर्जितेन मेघानुमानात्, किन्तु सिषाधयिषाविरहविशिष्टसिद्ध्यभावः। यत्र सिषाधयिषाविरहसिध्यभावौ तत्र विशेष्याभावात् सिद्धेरसत्त्वात् यत्र सिषाधयिषासिध्यभावौ तत्रोभयाभावात् सिषाधयिषाविरहरूपविशेषणस्य सिद्धिरूपविशेष्यस्य च विरहात्। ननु प्रत्यक्षेण जानीयामिति सिषाधयिषायामपि पक्षतापत्तिः। न चानुमित्सा-सिषाधयिषा, पुरुषान्तरानुमित्सायामतिप्रसक्तेः। न च तत्पुरुषीयानुमित्सा, साध्यान्तरधर्म्यन्तरसाधनान्तरासिषाधयिषायां तेजस्त्वेनानुमित्सायां वह्नित्वेनानुमित्यापत्तेः, तुङ्गप्रदेशत्वेनानुमित्सायां पर्वतत्वेनानुमित्यापत्तेः, एवं साधनेऽप्यन्यसाधनतावच्छेदकपुरस्कारेणानुमित्सायामन्यसाधनतावच्छेदकपुरस्कारेणानुमित्यापत्तेः। न च तद्रूपावच्छिन्नसाध्यी-

यतद्रूपावच्छिन्नाधिकरणीयतद्रूपावच्छिन्नसाधनीयतत्पुरुषीयसिषाधयिषाविरहविशिष्टसिद्ध्यभावः पक्षतेति वाच्यम। सायं वह्निमनुमिनुयामिति सिषाधयिषायां प्रातः सिद्धिदशायां पक्षतापत्तेः। न च तत्कालीनत्वमपि विशेषणम् देशान्तरगतोऽत्र वह्निमनुमिनुयामिति सिषाधयिषापाये तद्देशस्थितिदशायां पक्षतापत्तेः। न चतद्देशीयत्वमपि विशेषणम्, यत्र वाह्निमानयं प्रदेश इति निश्चयानन्तरमत्र प्रदेशे वह्निमनुमिनुयामितिसाधनाद्यनुल्लेखिसिषाधयिषा तत्र पुरःस्फूर्तिकेन धूमाद्यन्यतमलिंगेन तर्करासिकस्यानुमोदयतस्तत्राव्याप्तेः॥

अत्र केचित—प्रकृतानुमितीच्छैव पक्षता। न च यत्र सिद्ध्यभावादेवानुमितिः तत्राव्याप्तिः, भगवदिच्छायाः कार्यमात्रकारणत्वेन तत्र भगवदिच्छायाः सत्त्वात्। न च तस्या नित्यतया सिद्धसाधनस्थलेऽपि पक्षतापत्तिः, संजिहीर्षात्वसिसृक्षात्वानुमित्सात्वस्य भगवदिच्छायां तत्सामग्रीसमवधानरूपत्वात्। सिद्धसाधनस्थले च तदभावात्तदिच्छायाः संवाद्येकरूपत्वेन तत्सत्त्वेऽनुमित्यापत्तेरित्याहुः। तत्र सिद्धसाधनस्थले यद्विलम्बप्रयुक्तसामग्रीविलम्बप्रयुक्तभगवदनुमित्साविलम्बः तस्य कस्यचित्कारणस्यावश्यं वाच्यत्वात् व्याप्तिज्ञानादीनां सत्त्वात्। न च सिध्यभावस्तथा,सिद्धौ सत्यामपि सिषाधयिषयाऽनुमितेः। नापि सिषाधयिषा तथा, सिषाधयिषायामसत्यामपि सिद्ध्यभावेनानुमितेः, तस्मात् सिषाधयिषाविरहविशिष्टसिद्ध्यभावो वाच्यो, न च स वक्तुं शक्यः पूर्वोदितदोषसन्दर्भात्, एकस्य द्वयं वैशिष्ट्यमित्यनयोः प्रकारयोरेकप्रकारेण सिद्धौ प्रकारान्तरेणानुमित्सायां सिद्धिप्रकारेणानुमित्यापत्तेश्च। न च तत्प्रकारीयेत्यनुमित्साविशेषणम्, यत्रायं देशो वह्निमानिति सिद्धिः अत्र प्रदेशे वह्निमनुमिनुयामितीच्छा च तत्रायं प्रदेशो वह्निमानित्यनुमित्यापत्तेः। न च तद्विशेषणीयेत्यपि विशेषणीयम्, एतावद्विषयभासमानायामपि सिषाधयिषायामनुमितिदर्शनात्, न हि कात्मद्यविषयिण्यां? तस्यां प्रागुपदर्शिताऽनुमितिर्न भवतीति चेत्।

अत्रोच्यते—प्रकृतानुमित्यविरोधिसिषाधयिषाविरहविशिष्टसिद्ध्यभाव एव पक्षता। प्रत्यक्षेण जानीयामिति सिषाधयिषा च प्रत्यक्षविषयकतयाऽनुमितिविरोधिन्येव। एवं साध्यसाधनपक्षान्तरमाकाङ्क्षायाप्यानुमित्सासाध्यसाधनपक्षान्तरानुमितिविरोधिन्येतद्रूपान्तर-

मादाय सा तद्रूपान्तरानुमितिविरोधिन्येव । एवं देशान्तरकालान्तर मादायापि बोध्यम् । एकस्य द्वयं वैशिष्ट्यमित्यनयोः प्रकारयोरप्येकप्रकारसिषाधयिषा प्रकारान्तरानुमितिविरोधिनी । एवं विशेष्यविशेषणभावभेदेऽपि पुरुषान्तरानुमित्सापि पुरुषान्तरीयानुमित्यननुकूलतया पुरुषान्तरानुमितिविरोधिनी । एवं चैवं पर्यवसन्नम्—पर्वतो वह्निमानिति धूमजन्यानुमित्यनन्तरं प्रत्यक्षाद्यनन्तरं वा तस्यैव पुरुषस्य तद्देशस्थस्य तत्काले पर्वतत्वावच्छिन्नवह्नित्वावच्छिन्नधूमत्वावच्छिन्नपर्वतवह्निधूमपक्षसाधनिकानुमितिर्द्वेधा भवति । यदा तस्य पुरुषस्य एतद्देशस्थोऽहमेतत्काले धूमत्वेन रूपेण धूमेन पर्वतत्वेन रूपेण पर्वते वह्नित्वेन रूपेण वह्निमनुमिनुयामिति सिषाधयिषा भवति यदा वा देशान्तराद्यनुल्लेखिनी सा भवति देशान्तराद्युल्लेखेनैव सिषाधयिषायाः प्रकृतानुमितिविरोधित्वात् तथा च न कोपि दोष इति संक्षेपः । एवं च प्रकृतपक्षतायाः प्रकृते सत्त्वान्न साध्याप्रसिद्धौ पक्षत्वानुपपत्तिः । साध्यात्मलक्षणविशेषणज्ञानकृता त्वनुपपत्तिः साध्यविशेष्यकानुमित्यैव परिहृता । व्याप्तिज्ञानानुपपत्तिरवाशिष्यते, सापि न—अन्वयव्याप्तिज्ञानस्यानंगीकारात् । न च तथासति व्याप्तिविशिष्टपक्षधर्मताज्ञानविरहात्कथमनुमितिरिति वाच्यम् । अन्वयिन्येतस्य कारणत्वेपि व्यतिरेकिणि साध्याभावव्यापकाभावप्रतियोगिमानयमिति ज्ञानस्य कारणत्वात् । न च व्यतिरेकिणि व्यतिरेकसहचारेणान्वयव्याप्तिरेव गृह्यत इति सिद्धान्तबाधः, एकदेशिसिद्धान्तबाधेप्यपसिद्धान्ताभावात् । ननु साध्याप्रसिद्धौ व्यतिरेकव्याप्तिरपि दुर्ग्रहा प्रतियोगिज्ञानं विना साध्याभावस्य ज्ञातुमशक्यत्वात् इति चेन्न । भावानवबोधात् । तथाहि अस्ति हि—प्रकृतसाध्यस्येतरभेदस्याभाव इतरभेदाभावत्वमस्ति चेतरत्वम् तथा चेतरभेदाभावत्वेन तदुपस्थितावितरभेदज्ञानापेक्षायामपीतरत्वेन तदुपस्थितौ तदनपेक्षणात् । एवं चेतरत्वत्वोपस्थितेतरभेदाभावव्यापकतया हेत्वभावग्रहे तु नेतरत्वाभावस्येतरभेदस्य सिद्धिः व्यापकाभावेपि व्याप्याभावानियमात् । न चैवमितरत्वाभावत्वप्रकारिकानुमितिः स्यात् न त्वितरभेदत्वप्रकारिकेति वाच्यम् । अत्रेतरत्वाभाव इत्यनुमिताविष्टापत्तेः इतरभेदाभावाभावत्वेनैवानुमितेरौचित्यात् येन रूपेण व्याप्यताग्रहो

व्यापकाभावेन तद्रूपावच्छिन्नाभावस्यैव सिद्धेः। एतच्च प्रसिद्धानुमानेपि व्यतिरेकव्याप्तिग्रहे वन्ह्यभावाभावत्वेनैवानुमितिर्न तु वन्हित्वेन। नन्वितरत्वव्यापकताग्रहे हेत्वभावाभावेनेतरत्वात्यन्ताभावसिद्धेर्नेत्वितरभेद इति चेन्न। इतरभेदरूपस्यैवेतरत्वात्यन्ताभावस्य सिद्धेः। नन्वेवमयमितरत्वात्यन्ताभाववान् पृथिवीत्वात् यत्रेतरत्वं तत्र पृथिवीत्वाभाव इति व्याप्तिग्रहेपीतरभेद एव सिद्धो न त्वत्यन्ताभाव इति चेन्न। तात्पर्यालोचनात्, तथा हि—द्विविधो हीतरभेदाभावाभावस्येतरत्वस्याभावोऽत्यन्ताभावरूप एक इतरान्योन्याभावरूपश्चापरः। तत्रेतरत्वमितीतरत्वविशेष्यकव्याप्तिग्रहश्चेत्तत एवेतरत्वात्यन्ताभावः सिद्ध्यति य इतरस्तत्र हेत्वभाव इतीतरविशेष्यकव्याप्तिग्रहे त्वितरान्योन्याभावरूप एवेतरत्वात्यन्ताभावः सिद्ध्यति सामग्रीभेदेन कार्यभेदस्यावश्यकत्वात्। नन्वभावस्य प्रतियोगिरूपतया इतरान्योन्याभावाभाव इतरं स्यान्न त्वितरत्वमिति चेन्न। संसर्गाभावाभावस्यैव प्रतियोगिरूपत्वात् अन्योन्याभावाभावस्य च कपालेऽवृत्त्यापत्तेः। अभावविरहात्मत्वं च न प्रतियोगित्वं किन्तु स्वरूपसम्बन्धविशेष एवेति तदनुरोधेनापि नान्योन्याभावः प्रतियोगी। ननु साध्याप्रसिद्धौ प्रतिज्ञाऽसंभवात्कथं परार्थानुमानं स्यादिति चेन्न। परार्थानुमानप्रकारस्योक्तत्वात्। एवं च साध्यविशेष्यकबोधानन्तरं विशेषणज्ञानस्य सुलभत्वात्साध्यविशेषणकानुमितिरपि न दुर्लभा। ननु नेतराभावान्योन्याभावसाध्योभयवादविवेकतादवस्थ्यम्, नापि तदन्योन्याभावोऽप्यभावप्रतियोगिकान्योन्याभावात्। न च तस्मात्स्वरूपभेद इतराभावादन्योन्याभावः साध्य इति वाच्यम्। पृथ्वीतो नानाभावाद्भेदसाधनेऽसाधारण्यापत्तेः सपक्षजलादेर्विपक्षाच्चाभावाद् व्यावृत्तेरिति चेन्न। तस्याप्यप्रसिद्धस्यैव साध्यतया तदंशायां सपक्षाभावेनासाधारण्याभावात्, सपक्षसत्त्वे च भावत्वादिनैव भावाद्भेदस्य समूहालम्बनानुमित्या पृथगनुमित्या वाऽन्वयेन व्यतिरेकेण वा साध्यत्वात्। नन्वेवमितरभेदविशेष्यकानुमितौ श्रुतिविरोधः 'आत्मा वा अरे श्रोतव्य'इत्यादि श्रुत्यात्मविशेष्यकज्ञानस्य मोक्षहेतुत्वकथनात् इति चेन्न। अयं चानुमित्याकार आकाशाद्येकैकव्यक्तिसाधारणः पृथिव्यादौ तु घटाद्येकदेशेऽपि साध्यप्रसिद्धिः संभवति। न चाकाशादीनामतीन्द्रियत्वेन

न्द्रियाणां कथं घटेऽन्योन्याभावग्रहः ? प्रतियोगियोग्यताविरहादिति चाच्यम् । अन्योन्याभावप्रत्यक्षेऽधिकरणयोग्यत्वस्यैव तन्त्रत्वात् । प्रतियोगियोग्यतायाः संसर्गाभावप्रत्यक्षप्रयोजकत्वात् योग्यानुपलब्धेर्वोभयत्र प्रयोजकत्वात् । अत एव वायौ रूपवदन्योन्याभावः घटे मनस्त्वात्यन्ताभावश्च प्रत्यक्षः, न हि वायुरधिकरणं मनस्त्वं प्रतियोगि वा तत्र प्रत्यक्षं योग्यानुपलब्धिस्तु संभवति वायोरुद्भूतरूपवत्त्वे महति तत्रोद्भूतरूपस्य प्रत्यक्षत्वौचित्यात् मनस्त्वस्य घटवृत्तित्वे च प्रत्यक्षत्वौचित्यात् । जातेर्योग्यव्यक्तिवृत्तित्वेनैव प्रत्यक्षत्वौचित्यात् । एवं च यत्र प्रतियोगितावच्छेदकत्वेन तत्प्रत्यक्षत्वमापादयितुं शक्यते तत्रान्योन्याभावः प्रत्यक्षो, यत्र तु प्रतियोगित्वेन तत्प्रत्यक्षत्वं तत्रात्यन्ताभावादिः प्रत्यक्षः, अत एव योग्यस्यापि पृथिवीत्वस्य जलपरमाणावभावो नाध्यक्षः योग्यानुपलब्धेरभावात् । यत्र प्रतियोगित्वेनापादकीकृतेन तत्प्रत्यक्षताऽऽपादयितुं शक्यते तत्रैवानुपलब्धेर्योग्यतावत्त्वात् ।

वस्तुतस्तु यत्र प्रतियोगितादात्म्यसम्बन्धेनापादकीकृतस्य सत्तामापादयितुं शक्नोति तत्रान्योन्याभावः प्रत्यक्षो, यत्र तु सम्बन्धान्तरेण तथा कृतस्तत्र संसर्गाभावः प्रत्यक्षः । एवं चान्योन्याभावस्थले यदि पिशाचः स्तम्भाद्यभिन्नः स्यात्प्रत्यक्षः स्यादित्यापादनार्थः । एवं च यदभिन्नतयाऽऽपादकीकृतया यत्र प्रत्यक्षत्वमापादयितुं शक्यते तत्र तदन्योन्याभावः प्रत्यक्षः । शक्यते च यद्याकाशो घटाभिन्नः स्यात्प्रत्यक्षः स्यादित्यापादयितुम् । तथाचाकाशान्योन्याभावो घटे प्रत्यक्ष एव । एवं चेतरान्योन्याभावस्य प्रत्यक्षतः प्रसिद्धिरित्याचार्यभाषितं जगदार्यभाषितमेव । ननु घटस्य सपक्षत्वेन भवत्वन्वयित्वम्, तथा च कथम्पृथिवीत्वादेर्लक्षणत्वं केवलव्यतिरेकित्वाभावादिति चेन्न । अन्वयास्फूर्तिदशायां दशाविशेषे केवलव्यतिरेकित्वोपपत्तेः । नन्वितरभेदस्य घटे ग्रहदशायां पृथिवीत्वस्य योग्यतया ग्रहे तु साध्यसामानाधिकरण्यग्रहेण कथं नान्वयव्याप्तिग्रह इति चेत् । हेतुसमानाधिकरणात्यन्ताभावादेर्व्याप्तिघटकस्याग्रहसम्भवात् । एवं च घटस्य सपक्षत्वेऽपि नांशतः सिद्धसाधनम् पृथिवीतरभिन्नेत्युद्देश्यप्रतीतेरसिद्धेः । घटत्वेन सपक्षत्वेऽपि पृथिवीत्वेन पक्षत्वं प्राचामपि मते न विरुद्धम् घटत्वेन निर्णये स-

न्देहासिषाधयिषयोस्तेन रूपेणाभावेपि पृथिवीत्वेन तयोः सम्भवात्। तस्मात् पृथिव्यामितरत्वाभाव इत्यनुमितिः साध्यप्रसिद्धावपि सम्भवतीति प्रथमपक्ष समर्थितम्। द्वितीयपक्षे तु पृथिवीविशेष्यकोऽपि बोधो भवतीति समर्थितम्।

यद्वा व्यवहारः साध्यः। तदनुमानप्रकारश्चेत्थम्—गन्धवती पृथिवीपदशक्तिविशेष्यत्ववती पृथिवीत्वात् यन्नैवं तन्नैवम् यथाऽबादिरिति। पृथिवीपदविशेष्यत्वं चाधुनिकपृथिवीपदस्य साधुत्वात्सामान्यतः सिद्धम्।

ननु पृथिवीपदसङ्केताविशेष्यत्वमाधुनिकपृथिवीपदसङ्केतविशेष्यास्ति न च तत्र पृथिवीत्वमित्यसाधारण्यम्। न चेश्वरसङ्केतविषयत्वं विवक्षितम्, 'द्वादशेऽहनि पिता नाम कुर्यात्' इतीश्वरसङ्केतमादायातिप्रसक्तेरिति चेन्न। विशिष्येश्वरसङ्केतस्य विवक्षितत्वात्। एवञ्च पृथिवी विशेषाकारप्रवृत्तभगवदीयपृथिवीपदसङ्केताविशेष्यत्ववती पृथिवीत्वादित्यादिरनुमानप्रकारः।

ननु पक्षतावच्छेदकहत्वारभद दोशानकाना विगानात् कथमविगानेन भवतस्तदुपनिबन्धनिर्वेश इति चेन्न। तदविगानस्यात्राभावात्। पक्षतावच्छेदकसाध्यसामानाधिकरण्यग्रहस्यानुमानफलतया तस्य च पक्षतावच्छेदकाभिन्नहेतुसामानाधिकरण्यगर्भान्वयव्याप्तिग्राहकप्रमाणादेव सिद्धेः। अनुमानैवफल्यं हि तद्बीजम्। न चात्र तत्संभवति व्यतिरेकव्याप्तिग्रहे तत्सामानाधिकरण्यस्फुरणात्। साध्यसाधनविशेषकव्याप्तिग्रहेण च ससाध्यविशेषणकानुमितिप्रतिबन्धक ? इति नान्वयव्याप्तिग्रहेऽपि कोपि दोषः। पृथिवीपदप्रयोगविषयत्वं पृथिवीपदवाच्यत्वं वा न साध्यम्—पृथिवीत्वेऽपि तयोः सत्त्वात् तत्र च हेत्वभावेनासाधारण्यात्। पृथिवीत्वव्यवहारः पृथिवीत्वनिमित्तकः पृथिवीत्वान्वयव्यतिरेकानुविधायित्वात् यो यदन्वयव्यतिरेकानुविधायी स तन्निमित्तको यथा घटः कपालनिमित्तक इति तु नानुमानम् पक्षदृष्टान्तसाधारणसाध्यसाधनयोरभावात्। दृष्टान्ते कपालान्वयव्यतिरेकानुविधायित्वस्य साधनस्य घटनिमित्तकत्वस्य साध्यस्य सत्त्वात्। पक्षे पृथिवीत्वान्वयव्यतिरेकानुविधायित्वसाधनस्य पृथिवीत्वनिमित्तकत्वस्य साध्यस्य सत्त्वात् निवर्तितत्वात् ? यत्तु यत्तच्छब्दसाम्येनानुमानमिति। तन्न। शब्दसाम्येना-

नुमानाभावात् , अन्यथा वाग् वर्णिनी गोत्वाद्बहुलावदित्यपि स्यात् । महिषत्वं तत्त्वं वा न किञ्चिदेकमनुगतमस्ति येनार्थैक्यं स्यादिति संक्षेपः ॥

पूर्वोक्तांश्चतुर्दशगुणानाह रूपेति । रूपरसादिषु पृथिव्या गन्धएवासाधारणो न तु रूपादिरतिव्याप्तेः । न च गन्धवत्त्वे सति रूपवत्त्वेनेतरभेदसाधने रूपवत्त्वस्याप्यसाधारण्यमिति वाच्यम् । गन्धवत्त्वस्यैवेतरभेदसाधकत्वेन रूपवत्त्वस्य वैयर्थ्यात् । एवं च पृथिवीत्वस्य व्यञ्जकमपि गन्धवत्त्वमेव रूपादीनां रूपत्वादिना रूपेण जलादावतिप्रसक्तत्वेनाव्यञ्जकत्वात् ।

ननूत्सूत्रलिखनं भाष्यत्वव्याकोप इति सूत्राण्युद्धरन् तान् दर्शयति एते चेति । गुणानां विनिवेशो द्रव्येषु समवायः स प्रतिपाद्यत्वेनाधिक्रियतेऽस्मिन्निति गुणविनिवेशाधिकारो द्वितीयाध्यायस्तस्मिन् 'रूपरसगन्धस्पर्शवती पृथिवी'ति २ अ० २ आ० १ सूत्रेण रूपादयः पृथिव्यां बोधिता इत्यर्थः ।

चाक्षुषेति । 'संख्यापरिमाणपृथक्त्वसंयोगविभागाः परत्वापरत्वे कर्म च रूपिद्रव्यसमवायाच्चाक्षुषाणी'ति ४अ० १ आ० ११ सूत्रेण संख्यादयः सप्त पृथिव्यामुक्ता इत्यर्थः। नन्वनुपपन्नमेतत् पृथिव्यां संख्यादयः सन्तीत्यस्यात्राप्रतीतेः, संख्यादिप्रत्यक्षत्वे रूपिद्रव्यसमवायस्य प्रयोजकताया एव प्रतीतेः, तथा च यत्र रूपिद्रव्यसमवायस्तत्र तेषां प्रत्यक्षं भवति न तु सर्वत्र रूपिद्रव्येषु तत् समवायः सिद्ध्यत्युक्तवाक्यार्थात्तथाऽलाभादिति चेन्न । रूपिद्रव्यसमवेताः संख्यादयश्चाक्षुषा इत्यत्र बाधकं विना सकलरूपिद्रव्यसमवायसिद्धेः । सामान्यशब्दस्य संकोचके सत्येव विशेषनिष्ठत्वात् अत्र च तदभावात् । वस्तुतस्तु घटादिषु संख्यादयः प्रत्यक्षेणोपलभ्यन्ते, न च रूपिद्रव्यसमवायं विना ते तथा—कारणं विना कार्यानुत्पत्तेः । न च रूपिद्रव्यान्तरं तत्रास्ति तथाच घटादिरूपिद्रव्यसमवाय एव कारणत्वेन तत्र सिद्ध्यति । अप्रतीतरूपिद्रव्यान्तरकल्पनातो विना बाधकं घटादौ संख्यादिप्रतीतेर्भ्रमत्वकल्पनात्तस्याश्च कल्पनाया पापफलत्वात् । एष चार्थः किरणावलीतात्पर्यपर्यालोचनयापि केषांचित्सुलभः ॥

पतनेति । 'संयोगवेगप्रयत्नाभावे गुरुत्वात्पतनम्' इति ५ अ० १

आ०७ सूत्रे पतनकारणतया गुरुत्वमुक्तम्। तत्पार्थिव्यां प्रत्यक्षसिद्धमिति तत्कारणतया गुरुत्वसिद्धिरित्यर्थः।

अद्भिरिति। 'सर्पिर्जतुमधूच्छिष्टानां पार्थिवानामग्निसंयोगाद्द्रवत्वमद्भिः सामान्यम्' इति २ अ० २ आ० ६ सूत्रेण घृतादौ द्रवत्वङ्कृमुतिकेनैवोक्तमित्यर्थः।

उत्तरेति। 'नोदनाद्याभिघोः कर्म तत्कर्मकारिताच्च संस्कारादुत्तरं तथोत्तरमुत्तरं च' इति ५ अ० १ आ० १७ सूत्रेण उत्तरकर्मकारणतयोत्तरकर्मवत्यामिषुरूपायां पृथिव्यां संस्कार उक्त इत्यर्थः। एवं चान्यस्यामपि द्रष्टव्य इति भावः।

अत्र सूत्रकृता रूपरसगन्धस्पर्शानां प्रत्यक्षसिद्धत्वान्न प्रमाणान्तरमादर्शितम्। किञ्च रूपस्पर्शयोरभावे घटादिषु चाक्षुषत्वत्वाचत्वे न स्याताम् उद्भूतरूपवत एव द्रव्यस्य बहिरिन्द्रियजन्यप्रत्यक्षविषयत्वात् उद्भूतस्पर्शवत एव त्वाचत्वात्, अत एव विजातीयरूपवद्रव्येऽप्यवयविनि चित्ररूपस्वीकारः नीरूपत्वेऽप्रत्यक्षत्वप्रसङ्गात्। न च रूपवत्समवेतत्वमेव प्रत्यक्षत्वे प्रयोजकम्। विजातीयरूपवदवयवावयवकं तद्भावात् गौरवाच्च। न च गुणविरोधेन कथमारभ्यते, अन्यथानुपपत्तेस्तथा स्वीकारात्। ननु नीलादिरूपं प्रति अवयवगतसजातीयरूपत्वेन जनकता चित्ररूपं प्रति तु केन रूपेणेति चेन्न। अवयवगतचित्ररूपेतरसजातीयरूपेतररूपत्वेन जनकत्वात्। यत्र नीलपीतादि विजातीयं यत्र वा चित्रं रूपं तन्न विशिष्टमस्ति विजातीयरूपस्थले विशेष्याभावात् चित्ररूपस्थले विशेषणाभावात् चित्ररूपेतरद्यत्सजातीयं रूपं तादृतरत्वस्योभयत्र सत्त्वात्।

इदञ्चावधेयम्। यथा नीलपीताभ्यां चित्रमारभ्यते तथा नीलनीलतराभ्यामपि, यथा नीलपीतारभ्येऽवयविनि न नीलपीतरूपसमवायः—व्याप्त्या सर्वावच्छेदेन नीलपीतयोरनुपलंभात्। यद्यपि यज्जातीयं व्याप्यवृत्ति तज्जातीयं नाव्याप्यवृत्तीति न नियमो गुणजातीयस्य रूपस्य व्याप्यवृत्तित्वेऽपि, संयोगस्याव्याप्यवृत्तित्वात्, ज्ञानेच्छाप्रयत्नेष्वीश्वरे व्याप्यवृत्तिषु अस्मदादावव्याप्यवृत्तिषु व्यभिचाराच्च। वेगास्थितिस्थापकयोर्व्याप्यवृत्तित्वेन व्यभिचाराज्ज्ञानत्वादीनां च गुणत्वव्याप्यत्वात्। नाप्यात्मवृत्ति-

जात्या यज्जातीयं व्याप्यवृत्ति तज्जातीयं न व्याप्यवृत्तीति नियमः। नापि विजातीयरूपवदवयवारब्धेऽवयविन्यकमेव रूपं जायते तत्र नीलत्वादयो नानाजातीयाः सन्तीति वाच्यम्। तत्र जातीनां व्याप्यननुभवाद्व्याप्यवृत्तित्वस्य चाभावात्। नाप्यरूप एवावयवी तत्राप्रत्यक्षत्वप्रसंगादिति युक्त्या नीलपीतादिस्थले चित्रं रूपं समायाति तथा प्रकृतेऽप्यागामिष्यति शुक्लशुक्लतरयो रूपयोस्तज्जात्योर्वोत्कर्षापकर्षयोः समुच्चयस्य वक्तुमशक्यत्वात्, नीलरूपत्वस्य वा प्रत्यक्षत्वापादकत्वात्। एवं च शुक्लशुक्लतराभ्यां चित्रं रूपमारभ्यत इति प्राचीनाचार्यविचारितमपि चेतसि सचमत्कारमाधेयम्। न च तत्र शुक्लत्वस्यैव विद्यमानत्वान्न चित्रत्वमिति वाच्यम्। प्रसिद्धेऽपि रूपत्वस्य विद्यमानत्वादचित्रत्वापत्तेः। न च रूपत्वसत्त्वेऽपि नीलपीतादिवैजात्यम्। तथा प्रकृतेऽप्युत्कर्षापकर्षाभ्यां वैजात्यसंभवात्। अपरं चावधेयं स्पर्शोऽपि चित्रः। अन्यथा विजातीयस्पर्शवदवयवारब्धावयविनोऽस्पर्शवत्त्वापत्तेः। न च रूपे वैजात्यसत्त्वाद्भवतु चित्रारंभो न च पृथिव्यामनुष्णाशीतं विहाय स्पर्शान्तरमस्ति येन तथा स्यादिति वाच्यम्। मृदुकठिनयोर्विजातीययोः सत्त्वात्। न च मृदुत्वकठिनत्वेऽवयवसंयोगगत एव, चाक्षुषत्वापत्तेः। तस्मादस्ति चित्रः स्पर्शः। गन्धरसौ तु न चित्रौ तयोर्द्रव्यप्रत्यक्षत्वाप्रयोजकत्वेन गुणविरोधानुरोधपरिहारौपहारप्रापकत्वाभावात्। यत्र च हरीतक्यादौ नानारसप्रतीतिस्तत्रावयवेष्वेव तादृशरसवद्भक्षणगुणोऽपि वैद्यकोक्तावयवभक्षणादेव। तस्मान्न गन्धरसौ चित्रौ॥

अन्यच्चावधेयम्। पृथिवीपरमाणौ न चित्रं रूपं न वा चित्रः स्पर्शः। तथाहि—तत्र चित्ररूपादि स्वावयवप्रत्यक्षबलात्तदारब्धेऽवयविनि चित्ररूपादिदर्शनाद्वा पाकस्य कारणस्य विद्यमानत्वाद्वा? नाद्यः-परमाणुरूपादीनामप्रत्यक्षत्वात्। न द्वितीयः-परमाणौ विजातीयरूपवत्त्वेनैवावयविनि तदुपपत्तेः। भूयसीषु परम्परासु चित्ररूपाभावेऽप्यग्रे विजातीयरूपेण चित्ररूपदर्शनात। न च पाकप्रक्षेपात् प्रागचित्रे घटे तदुत्तरश्चित्ररूपोपलंभात्परमाणुषु चित्ररूपसिद्धिः, न हि तत्र पाकाद्व्यणुकादिषु चित्रं रूपं वैशेषिकैः पिठरपाकापठनात। न च द्व्यणुकादीनां विजातीयरूपवत्तयाऽग्रिमावयवनाश्रितता सजातीयरूपवत्परमाण्वाद्यारब्धद्व्यणुकादौ विजातीयरूपाभा-

वादिति वाच्यम्। आपाकपातितेषु परमाणुषु परस्परविरुद्धरूपवत्त्वेनैव द्व्यणुकादौ चित्ररूपोपपत्तेः, न ह्यापाकनिक्षिप्ताः सर्वे पच्यन्त इति नियमः, सजातीयरूपवत एव भवतीति भावः ?। नापि तृतीयः-पाकस्य चित्ररूपकारणत्वे प्रमाणाभावात्। लाघवेन चित्ररूपवत्त्वेनावयवगतचित्ररूपेतरसजातीयरूपेतररूपकारणत्वे प्रमाणाभावात्। कार्यकारणभावस्य स्वीकार्यत्वात्, अन्यथा परमाणुगतचित्ररूपेतरत्वस्य विशेषणस्य कार्यतावच्छेदक उपादाने गौरवापत्तेः। परमाणुगतचित्रचित्ररूपेतरत्वं न विशेषणं किन्तु परमाणुगतरूपेतरत्वस्य परमाणुगतेतरत्वमेवेति चेत्। तथापि ततो गौरवात्, अन्योन्याश्रयाच्च। तथाहि-परमाणुगतचित्ररूपसिद्धौ तद्भिन्नत्वघटितकार्यतावच्छेदकसिद्धिः तत्सिद्धौ च परमाणुगतचित्ररूपसिद्धिरिति। तस्मात्परमाणुषु न चित्ररूपस्पर्शावित्यस्मासु सास्वरसैरपि युक्तियोगेन स्वीकर्तव्यम्॥ ननु चित्रो घटः स्वरूपसजातीयरूपवत्परमाण्वारब्धो घट वाच्छुक्लघटवदिति चेन्न। विजातीयरूपवत्कपालारब्धे घटे व्यभिचारात्। अत एव चित्रघटारम्भकपरमाणुः स्वारब्धरूपसजातीयरूपवान् रूपवत्तपरमाणुत्वात् श्वेतघटारम्भकपरमाणुवादिति निरस्तम्। विजातीयरूपवत्कपालारब्धघटपरमाणौ व्यभिचारात्। ननु पृथिवीरूपस्य सर्वस्य पाकप्रयोज्यत्वानियमात् द्व्यणुकादिगतशुक्लादिरूपेषु पाकजपरमाणुगतशुक्लादिरूपप्रयोज्येषु तथा दर्शनात् चित्ररूपेपि तथा मन्तव्यम्। न च परमाणौ पाकजचित्ररूपाभावे तथोपपद्यत इति चेत्। अन्यथाऽप्युपपत्तेः। परमाणौ श्वेतादिरूपेणैव पाकजेन प्रयोजकेन क्वचिदवयवे विजातीयेनावयविनि विचित्ररूपोपपत्तेः। चित्रस्यापि पाकप्रयोज्यत्वात्। एवं च परमाणुगताभ्यामेव विजातीयाभ्यां पाकजाभ्यां द्व्यणुके चित्रं रूपमिति तत्र पाकप्रयोज्यत्वं स्फुटमेव। त्र्यणुकादौ तु द्व्यणुकादिगतचित्ररूपेण विजातीयरूपेण च पाकप्रयोज्येन चित्ररूपोत्पत्तिरिति सर्वस्यापि चित्ररूपोत्पत्तिरिति सर्वस्यापि चित्ररूपस्य पाकप्रयोज्यत्वमक्षतम्। ननु रूपस्याव्याप्यवृत्तित्वमेव कल्प्यतां 'धर्मिकल्पनातो धर्मकल्पना ज्याये'ति न्यायात् न तर्हि विजातीयरूपत्वेनैवारम्भकत्वादनेकत्वस्य गुरुत्वात्। न चैकस्यारम्भकत्वे जलपृथिवीपरमाणुभ्यामतिस्निग्धगन्धबदारम्भकत्वे जातिसांकर्यापत्तिः-विजातीयद्रव्यस्यानारम्भकत्वात्,

अन्यथा बहुभिर्जलैः पृथिवीभिश्च द्रव्यान्तरोत्पत्त्यापत्तेः, तस्मादव्याप्यवृत्तिभिरेव नीलपीतादिभिश्चित्रव्यवहारः । अत एव चित्रपटेऽस्मिन् भागे नीलं रूपमस्मिन् भागे पीतमिति व्यवहरन्ति व्यवहर्तारः । न च यज्जातीयं व्याप्यवृत्ति तज्जातीयं नाव्याप्यवृत्ति इति व्याप्तिर्बाधिका, अप्रयोजकत्वात् । ननु रूपवृत्तिरूपोत्पादे घटे रूपपरम्परोत्पादः स्यात् समवायिकारणासमवायिकारणादीनां सत्त्वाददृष्टविलम्बेन दृष्टसमवधाने विलम्बाभावात् । यच्चैकं रूपमेवापररूपोत्पादे प्रतिबन्धकम् एवं चैकरूपवति कथमपररूपोत्पाद इति चेत् । न युगपदनेकरूपोत्पादेनापररूपप्रतिबन्धकस्यैकरूपस्याभावात् । न चैको घट एकमेव रूपं जनयति । न च युगपदनेकरूपापत्तिरिति चेत् । न । एतेषां प्रत्येकमेव कार्यं जनयतीति नियमेन युगपदनेकसामग्रीभेदात् । न चैवं सुरभिसुरभिणाद्यसुरभिर्न जन्यते (?)नाप्युभाभ्यामेको विजातीय इति गुणविरोधाभावेनावयवगताभ्यां गन्धाभ्यामप्यवयविन्यव्याप्यवृत्तिगन्धद्वयजननमस्तु तथा रसेपि । न हि स्वस्वसमानजातीयरूपेण रूपस्य रसेन रसस्य गन्धेन गन्धस्य जननं सम्भवति गुणविरोधात् । नीलपीतावयवस्थले यदि नीलस्यैवावयविगतरूपं प्रति जनकता स्वीक्रियते तदा विनिगमनाविरहात् पीतस्य किमिति न भवतीति वक्तुं शक्यते । यदि चोभाभ्यां नीलरूपारंभ एवोच्यते तदा पीतरूपारंभः किमिति न भवतीति वक्तुं शक्यते । उच्यते तु नीलेन नीलारंभः पीतेन पीतारंभः । न च विजातीययोर्गुणयोः सहकारित्वमयुक्तमनुक्तेः, एवं हि रूपस्याव्याप्यवृत्तित्वं स्वीक्रियते एष न्यायो गन्धादावपि तुल्य इति । तत्राप्यव्याप्यवृत्तित्वं स्यादिति चेन्न । इष्टापत्तेः । ननु कारणयोः गुणयोर्विरोधो मास्तु विरुद्धयोः सहकारित्वानभ्युपगमात्, कार्ययोस्तु स्यात् नीलपीतयोर्भिन्नाश्रययोर्विरोधोपलंभेन । एकत्र समावेशानुपपत्तेः, अत एव चित्ररूपस्वीकार इति चेन्न । व्याप्यवृत्तित्ववादिना नीलपीतादेर्विरोधानङ्गीकारात् । तस्मान्न चित्रं रूपमिति चिन्तनीयमिति चेत् ।

अत्रोच्यते-अस्ति तावत्पृथिवीरूपजलतेजोरूपयोर्विरोधो जलतेजोरूपयोश्च घटपटरूपयोश्च, तत्र सति सम्भवेऽनुगतस्य त्यागायोगात् । परस्परात्यन्ताभावसमानाधिकरणरूपत्वं तदतिरिक्तभिन्नरू-

पत्वं वा तादृशाद्विदशायां व्यावर्त्याप्रसिद्ध्या विशेषणवैयर्थ्यात् । न च भिन्नाश्रयरूपत्वं तथा तदपेक्षया भिन्नरूपत्वस्य लघुत्वात्। अपि चैकस्य रूपस्य रूपारंभकत्वे समानजातीयरूपवदवयवेष्ववयविभिन्नरूपारंभः समानजातीयमव्याप्यवृत्ति नानारूपं स्यात् भेदाग्रहश्च परस्परात्यन्तमिलनात् भास्करकरनिकरेष्विव । तथाच परमाणुष्वेव व्याप्यवृत्ति रूपमन्यत्र सर्वत्राव्याप्यवृत्ति स्यात् परस्परसहकारितया तत्रैकमेव रूपम्, विजातीयस्थले तु गुणविरोधेन न परस्परसहकारितेति वाच्यम् । एकस्यापि समर्थत्वे परस्परसहकारित्वे मानाभावात् । न च प्रत्येकं समर्थयोर्द्वयोरिव मेलने सहकारित्वन्नानुपपन्नमिति वाच्यम् । दण्डयोर्हि सहकारित्वं नैकस्य भ्रमजनकत्वेऽपरस्य वोदासीनत्वम् उदासीनकारणत्वे प्रमाणाभावात् । एवं च क्रमिकचक्रसंयोगितया क्रमिकभ्रमिजनकतया वा परस्परं संयुज्य चक्रसंयोगितयैकभ्रमिजनकतया वा स्थलभेदेन युगपच्चक्रसंयोगितया भ्रमिजनकतया वा दण्डयोः परस्परसहकारित्वमायातु प्रत्यक्षप्रमाणसिद्धत्वात् । न च रूपयोः प्रत्येकं समर्थयोः परत्राव्याप्यवृत्तिरूपजनकयोः स्वावयवे सजातीयरूपस्थले व्याप्यवृत्तिरूपजनने परस्परसहकारित्वे प्रमाणमस्ति । न चैकं रूपमित्यनुभवान्नाव्याप्यवृत्ति नानारूपमनुभवानुभावस्य चित्ररूपेऽपि सत्त्वात्। किञ्चावयवगतरूपत्वेनावयविगतरूपत्वेन च जन्यजनकभावेऽवयविरूपेऽवयवरूपस्यानेकस्य परस्परसहकारित्वं सिध्यति विजातीयरूपवदवयवजन्ये रूपे द्वितीयरूपस्यापि स्वरूपयोग्यत्वात् । न चावयविरूपत्वस्य कार्यतावच्छेदकस्य सत्त्वात्तत्रावयवरूपत्वस्य कारणतावच्छेदकस्य सत्त्वादेवं च तदेव रूपं जननीयम् । यत्रोभयोः कारणत्वं तत्र न शुक्लेऽन्यावच्छेदेन विद्यमानस्य नीलरूपस्य कारणत्वं संभवति । नापि नीले शुक्लस्य तथा चोभयावच्छेदेन विद्यमानं चित्रमेव रूपं स्वीकर्तव्यम् । न चावयविगतसजातीयरूपत्वेन जन्यताऽवयविनि विजातीयरूपासिद्धिदशायां तद्वारकस्य सजातीयत्वविशेषणस्य वैयर्थ्यात् । न चैवम्-अवयविनो नीरूपत्वमेव, प्रागेव खण्डितत्वात् । गन्धरसौ तु चित्रौ नाङ्गीक्रियेते प्रयोजनाभावात् । एष च मार्गो निसर्गतो दुर्गम इति न पुरातनैरभ्यासित इत्यर्वाचीनैरपि सावधानैश्चेतःसंचार इहाचरणीय इति संक्षेपः ॥

संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वेषि प्रत्यक्षमेव प्रमाणम्-एको महान् घटः पटात् पृथक् पटेन संयुक्तः पटान्तरेण विभक्तोऽस्मात्परोऽस्मादपर इति प्रत्यक्षसत्त्वात्।

इदं चावधेयम्। संख्यापरिमाणपृथक्त्वानि सर्वत्र पृथिव्यामक्षणिकत्वात् द्वितीयक्षणे नाशाभावेन सामग्रीसत्त्वेन परिमाणैकत्वैकपृथक्त्वानामुत्पत्तेः। संयोगोपि तथा तृतीयक्षणे नष्टे कर्मजसंयोगो द्वित्वाद्यास्संख्या द्विपृथक्त्वानि विभागः परत्वापरत्वे च नोत्पद्येते न ह्येषां द्वितीयक्षणे उत्पत्तिः द्वितीयक्षणे द्वित्वादिकारणस्यैकत्वस्य द्विपृथक्त्वादिकारणस्यैकपृथक्त्वस्य विभागपरत्वापरत्वकारणस्य संयोगस्यैवोत्पत्तेः। कर्मजसंयोगकारणस्य कर्मण एवानुत्पद्यतः(?)। नापि तृतीयक्षणे तत्र समवायिकारणस्यैव नाशात्। विनश्यदवस्थस्यापि समवायिकारणत्वे कार्यस्य क्षणिकतापत्तेः कार्योत्पत्तिकाले समवायिकारणनाशरूपायाः कार्यनाशसामग्र्या सामग्र्यात्। एकत्वैकपृथक्त्वयोर्द्वित्वाद्विपृथक्त्वादावसमवायिकारणत्वात्। विभागस्य संयोगपूर्वकत्वात् हिमवद्विन्ध्ययोर्विभागाभावात् संयोगस्य विभागकारणत्वात्। परत्वापरत्वे प्रति दिक्कालपिण्डसंयोगोऽसमवायिकारणम्। एवं चैतानि कारणानि द्वितीयक्षणे जायन्ते तथाच कथं द्वित्वादीनां द्वितीयक्षण उत्पत्तिः। संयोगवद्विभागजो विभागो द्वितीयक्षणे किमिति नोत्पद्यते केनचिदवयवेनाकाशविभागस्य पूर्वं सत्त्वात् कारणाकरणविभागसत्त्वात् इति चेन्न। संयोगरूपपत्तिनिमित्तकारणाभावेनैव(?) विभागात् अङ्गुलीतरुविभागादिजन्ये हस्ततरुविभागे संयोगपूर्वकत्वादर्शनात्। कर्म तु द्वितीयक्षणे नोत्पद्यते नोदनाभिघातादीनां कर्मकारणानां प्रथमे क्षणेऽभावात्। वेगवत्कपालारब्धेऽपि घटे द्वितीये क्षणे वेग एव जायते न तु वेगजन्यं कर्म तस्य तदुत्तरकालीनत्वात्। नन्वन्यतरकर्मजन्मा संयोगो द्वितीये क्षणे घटादौ किमिति न भवति, वाय्वादीनामेवोत्तरदेशत्वासम्भवात् इति चेत्। स्वकर्मजन्मा संयोगो न भवतीत्यभिधानात्। चतुर्थक्षणनष्टे तु घटादौ किमुत्पद्यत इति चिन्त्यते। तत्र तृतीये क्षणे द्वित्वादिद्विपृथक्त्वाद्युत्पत्तिः सम्भवति एकत्वादेरसमवायिकारणस्य द्वितीये क्षणे जातत्वात्। ननु कथमपेक्षाबुद्धिनिरपेक्षा भवतु द्वित्वाद्युत्पत्तिर्न चास्मदादेः तत्र प्र-

त्यक्षं सम्भवति द्वितीयक्षणे कारणीभूतस्य रूपस्योत्पत्त्या तत्समये कार्यस्योत्पत्तुमनर्हत्वादिति चेन्न । अशेषविशेषविषयकशेमुषीशालिनो भगवतो भवनीपतेरेवानादेरपेक्षाबुद्धेस्तत्र कारणत्वात् । द्व्यणुकपरिमाणारम्भकपरमाणुद्वित्वानुरोधेन तत्कारणत्वस्यावारणीयत्वात् । ननु जगत्साक्षिणस्तस्यापेक्षाबुद्ध्या यदि द्वित्वं जायते तदाऽस्मदादिभिः कथं नाध्यक्षीक्रियते इति चेन्न । अस्मदपेक्षाबुद्ध्या जातं भवद्भिः कथं नाध्यक्षीक्रियते इति पर्यनुयोगसाम्यात् । यदपेक्षाबुद्ध्या यद्द्वित्वादिकमुत्पद्यते तत्तस्यैव प्रत्यक्षमित्यस्यापि साम्यात् । नाशस्तु तस्यादृष्टविशेषविशिष्टभगवदपेक्षाबुद्धेरत्यन्ताभावात् । स च विशेषणस्यादृष्टस्य नाशादित्येके । तत्र कारणनाशस्यैव नाशकत्वेन तदत्यन्ताभावस्य नाशकत्वेन क्वचिदप्यकल्पनात् । अदृष्टेशापेक्षाबुद्ध्योः स्वतन्त्रकारणत्वेन विशिष्टत्वेनाकारणत्वाच्च । तथाचादृष्टनाशादेव नाशः । न चापसिद्धान्तः, पितृचरणैरनेकधोपदिष्टत्वात् । अत एव तृतीयाध्यायतत्त्वबोधे वर्धमानोपाध्यायैश्चरमबुद्धिनाशकत्वमदृष्टनाशस्योक्तम् । न चापेक्षाबुद्धिनाशस्य नाशकत्वे द्वित्वोत्पत्तेः प्राक्कारणीभूता समूहालम्बनरूपोपेक्षाबुद्धिः । प्रत्येकविषयकबुद्धेः कारणत्वे द्वित्वोत्पत्तिसमये प्रथमबुद्धेर्नाशे द्वित्वस्य क्षणिकत्वापत्तिः सित्वास्थ (?) तृतीयादिबुध्युत्पत्तिदशायां प्रथमादिबुद्धिनाशे द्वित्वाद्यनुत्पत्त्यापातश्च । यदि द्वित्वोत्पत्त्यनन्तरं संस्कारेणापेक्षाबुद्धिनाशः तृतीयक्षणे तन्नाशेन द्वित्वनाशस्तदा बुद्धित्वस्य क्षणद्वयावस्थितत्वमायाति । अदृष्टनाशस्य तु नाशकत्वे कदाऽदृष्टनाशः कदा च द्वित्वनाश इति दुर्ज्ञेयमिति चेन्न । कार्येण द्वित्वेनादृष्टनाशे तेन द्वित्वनाशात् । ननु परिमाणस्थले द्व्यणुकपरिमाणानुरोधेन परमाणुद्वित्वस्यावश्यकत्वेन भवतु भागवती सा द्वित्वभाविका घटादौ किमर्थं तदपेक्षाबुध्या द्वित्वमिति चेन्न । प्रयोजनमनुसन्धाय सामग्र्या कार्या(न)जनात् । ननु भागवत्या द्वित्वत्रित्वाद्यारम्भकापेक्षाबुद्धेः सत्त्वाद्घटे परार्धपर्यन्तं सर्वाः संख्याः स्युरिति चेत् । इष्टापत्तेः । नन्वेवं द्वित्वत्रित्वादेर्युगपदुत्पादे कपिञ्जलाधिकरणविरोधः । तत्र हि बहुत्वेनैकद्वित्वयोरपहरितत्वे चरमबहुत्वस्य ग्रहणाशक्यतया व्युदस्तत्वे क्वचित्तस्य क्वचिदन्यस्य ग्रहणस्याननुगमापत्त्या निरस्तत्वे कस्मिंश्चिद्बहुत्वसंख्याया ग्राह्यत्वे प्राथमिकत्वेन त्रित्वमेव गृह्यत

इत्यापत्तिः तत्र त्रित्वादीनां युगपदुत्पादे युगपज्ज्ञाने च कथं तत् क्वाचित्कम् । तदादाय तदिति चेत्, क्वचिच्चतुष्ट्वादीनामपि पूर्वमुत्पादाज्ञानाच्च । न च सकलसंख्याव्याप्यत्वेन त्रित्वग्रहणमिति तदर्थो, व्याप्यस्य व्यापकं विहाय ग्रहणे प्रमाणाभावात् इति चेन्न । त्रित्वग्रहणकपिञ्जलत्वयालाघवेन त्रित्वग्रहणमित्यत्र कपिञ्जलाधिकरणत्रित्वादिकं युगपन्नोत्पद्यत इति तु नोपादेयम् । भिन्नयोरपेक्षाबुध्या युगपदुत्पादवदेकापेक्षाबुध्यापि तत्सम्भवात् । योगिनां केषांचिदावश्यकत्वात्तदपेक्षाबुद्धिरेव परमाण्वादिद्वित्वजनिका तथाच तन्नाशादेव नाशो नादृष्टनाशादित्येके । तन्न । सर्गादौ योगिनामभावे परमाणौ द्वित्वानापत्त्या द्व्यणुके परिमाणानापत्तेः । तत्रेश्वरापेक्षाबुद्धेरेव कारणत्वात् नाशकस्य चादृष्टनाशस्यैव वक्तव्यत्वात्, परमाणौ द्वित्वनाशो समवायिकारणनाशात् परमाणोर्नित्यत्वात् । नाप्यसमवायिकारणनाशात् तदेकत्वस्यापि नित्यत्वात् एकत्वनाशेन द्वित्वनाशस्य क्वचिदप्यलिखनात् । न चेश्वरापेक्षाबुद्धिनाशान्नाशः तस्या नित्यत्वात् तस्मादृष्टनाशादेव नाशो वक्तव्यः । एवं च सर्वत्र कारणतयाऽदृष्टस्यावश्यकत्वे तस्य च फलानवर्यतया तन्नाशस्यावश्यकत्वे सर्वत्रादृष्टनाशादेव द्वित्वादिनाश इति तु वयमावेदयामः ।

परत्वापरत्वे च चतुर्थक्षणे नष्ट उत्पद्येते-बहुतरतपनपरिस्पन्दान्तरितजन्मत्वादिज्ञानस्य भगवत एव भावात् । ननु क्षणपरिहृत एकेनापि तपनपरिस्पन्देनान्तरितत्वासम्भवात् परिस्पन्दस्य क्षणचतुष्टयावस्थायित्वात्कथं बहुतरतपनपरिस्पन्दान्तरितत्वम्, तदभावे च तद्बुध्यभावे कथं परत्वोत्पत्तिरिति चेन्न । अल्पक्षणान्तरितजन्मापेक्षया भूयःक्षणान्तरितजन्मनि परत्वोत्पत्तेरविरोधात् तपनपरिस्पन्दपदेन कालोपाधेरेव ग्रहणात् । एवञ्च द्वितीयक्षणकालपिण्डकालमण्डलसंयोगयोरसमवायिकारणनिमित्तकारणयोः सत्त्वे बुद्धेश्च भगवतः सत्त्वे चतुर्थक्षणनष्टे तृतीयक्षणे कथं न परत्वोत्पत्तिः । एवमपरत्वोत्पत्तिरप्यप्रत्यूहाऽनुसन्धेया । दैशिकतदुभयोत्पत्तिरपीत्थमेव । कारणाकारणसंयोगेन कार्याकार्यसंयोगोत्पत्त्या कञ्चिद्देशसंयोगमादाय संयुक्तसंयोगाल्पीयस्त्वादिसम्भवात् तद्देशस्याप्यकारणत्वादकार्यत्वाच्च कारणाकारणपदेन समवायिकारण-

तद्भिन्नयोर्ग्रहणात्, अन्यथा कालादिना जगत्कारणेन निष्क्रिय-विनष्टेन घटेन संयोगानुत्पत्त्या तस्याविभुत्वं स्यात् । एवं च यत्र देशे घटादि द्वितीयक्षणेऽस्ति तस्योत्पत्त्याऽऽधारतया निमित्त-कारणत्वेपि संयोगो न विरुध्यते । एवं च भगवत्प्रभृतेर्द्वितीयक्षणे संयुक्तसंयोगालपीयस्त्वादिज्ञानसम्भवेन तृतीयक्षणे देशिकतदुत्प-त्तिर्न विरुद्धा । स्वकर्मजन्यस्तु संयोगश्चतुर्थक्षणनष्टे न भवति तृती-यक्षणे द्वितीयक्षणोत्पन्नकारणवेगजन्यवेगेन कर्मसम्भवेपि कर्मोत्प-त्त्यवधिकचतुर्थक्षणे संयोगोत्पत्तिक्षणे समवायिकारणस्याभावात् । विभागस्तूत्पद्यते न वेति ? तत्र नोत्पद्यत एवेति श्रेयः-तृतीयक्षणे पूर्वसंयोगनाशकविभागोत्पादककर्मसम्भवेपि विभागानुत्पत्तेः । एवं च रूपादिष्वेकादशसु पृथिव्यां केचन सार्वत्रिकाः केचन न तथेति साधितम् ।

केचित्तु कार्योत्तरसत्त्वे समवायिकारणतया तृतीयक्षणे घटना-श एव न भवति तस्य रूपाद्युत्तरकालत्वादित्याहुः । तन्न । कार्यान्तरसत्त्वेन कारणत्वेन कारणत्व प्रमाणाभावात् समवा-यिकारणासमवायिकारणप्रतिबन्धकाभावानामविनश्यदवस्थत्वेन परं कारणत्वात् । गुरुत्वं तु पतनासमवायिकारणत्वेन सि-द्ध्येत्तत्तु सार्वत्रिकमेव । कारणगुरुत्वेन द्वितीयक्षणे कार्ये गुरुत्वो-त्पत्तेः । द्रवत्वस्य तु नैमित्तिकस्य क्वाचित्कत्वं व्यक्तमेव । न च तत्तै-ले जलीयमेव द्रवत्वम् तेजःसंयोगान्वयव्यतिरेकानुविधायित्वात् । संस्कारस्तु स्थितिस्थापकः सार्वत्रिक एव कारणीयेन कार्ये जनना-त् । वेगस्तु प्रत्यक्षसिद्धोपि कर्मणा प्रत्यक्षान्यथासिद्धिवारणाय कर्मणः कर्माजनकतयोत्तरकर्मकारणतया साधितः । तस्याप्यसार्वत्रि-कत्वमेव सर्वत्र कारणे वेगासंभवेन द्वितीयक्षणे सार्वत्रिककार्यवे-गाभावात् । भाष्यकृता स्थितिस्थापकः किमिति नोपात्त इति चेत् । न आर्याणां पर्यनुयोगस्यानुचितत्वात् । एष च गुणनिर्णयो गुण-किरणावल्यादावप्यसुलभ इतीहैवानुसन्धेय इति ॥

(व्यो०) पृथिव्यादीनां नवानां पुनः पञ्चनामित्यादिरूपेण साधर्म्यमभिधाय प्रत्येकं तेषा वैधर्म्यमाह इहेत्यादिना ।

क्षित्यादिमनःपर्यन्तेषु प्रकरणेषु इदानीं साम्प्रतमेकैकशो वैध-र्म्य मुच्यत इति । नन्वेककशौ इति वीप्सायां सप्रत्ययस्य विधाना-

ह्यर्थं वीप्साभिधानम्।

एकैकशो विनिघ्नन्ति विषया विषसन्निभाः।

इति व्यासप्रयोगाददोष इत्येके। प्रत्येकं क्षित्यादेर्वीप्सायां वैधर्म्यलाभे पुनर्वीप्साकरणमवान्तरभेदेन शरीरादीनां वैधर्म्यज्ञापनार्थमिति गुरवो वदन्ति। वैधर्म्यं तु-विशिष्ट इतरस्मात् व्यावृत्तो धर्मो यस्यासौ विधर्मा तस्य भावो वैधर्म्यमसाधारणस्तत्त्वव्यवस्थापको धर्मः केवलव्यतिरेक्यनुमानमिति यावत्।

तत्रादावुद्दिष्टत्वात्पृथिव्यास्तदुच्यते पृथिवीत्वाभिसम्बन्धादिति॥ पृथिवीति लक्ष्यनिर्देशः पृथिवीत्वाभिसम्बन्धादिति लक्षणमसाधारणो धर्मः। पृथिवीत्वेनाभिसम्बन्धः पृथिवीत्वेनोपलक्षितः समवाय इति। पृथिवी धर्मिणी इतरेभ्यो भिद्यत इति साध्यो धर्मः पृथिवीत्वाभिसम्बन्धात्। यस्त्वितरस्मान्न भिद्यते न चासौ पृथिवीत्वेन सम्बद्धो यथोदकादि। न च तथा पृथिवीत्वेन नाभिसम्बन्धः पृथिवी तस्मादितरेभ्यो भिद्यत इति। समवायो ह्यतिव्यापकत्वादलक्षणः स्यादिति पृथिवीत्वं विशेषणम्। नन्वेवं पृथिवीत्वमसाधारणत्वाद्व्यवच्छेदसमर्थमिति समर्थविशेषणता हेतोर्दोषः। न पक्षेऽसम्भवित्वाशङ्कापरिहारार्थत्वात्। तथाहि—पृथिवीत्वात् पृथिवीत्युक्ते पक्षेस्त नास्तीत्याशङ्का न निवर्तेता-तस्समर्थमभिसम्बन्धपदम्। ननु च भावप्रत्ययादेव सम्बन्धाधिगतेः षष्ठ्या वा पृथिव्या भावः पृथिवीत्वमिति स्वशब्देन तस्याभिधानं व्यर्थम्। तन्न। भावप्रत्ययो ऽभिशब्दवृत्त्या भावमाभिधत्ते नाभिसम्बन्धम्। न च गम्यां वृत्तिमाश्रित्य सम्बन्धपदस्य वैयर्थ्यम्। शास्त्रे तथाभावेऽतिप्रसङ्गात्। षष्ठी चानियतसम्बन्धा। षष्ठ्या वा पृथिव्या भावः पृथिवीत्वमिति। स्वशब्देन तस्याभिधानं व्यर्थम्। तन्न। अभिधायकेति विशिष्टसम्बन्धलाभायाभिसम्बन्धपदम्। ननु चैवमुपाधिभेदादवास्तवो भेदः स न वा यस्येत्यवारकं लक्षणं कथमितरेभ्यो भेदज्ञापकमिति स्यात्। न कल्पितभेदस्यापर्थक्रियाकरणात्। यथा श्रोत्रस्य। तथाहि-श्रोत्रं कर्णशष्कुल्याकाशसंयोगोपलक्षितो नभोदेशः; स चावास्तवभेदोपि शब्दोपलब्धिलक्षणामर्थक्रियां विदधाति। तद्वत्समवायेप्यदोषः। समवेतं वा पृथिवीत्वं लक्षणम्। पृथिवीत्वं च तदभिसम्बध्यत

इत्यभिसम्बन्धश्चेति कर्मधारयपरिग्रहात्। ननूभयपदव्यभिचारा-भावाद्विशेषणसमासः कथम्। तथाहि–सति सम्बध्यत इत्याभिसम्ब-न्धः समवेतं रूपादि दृष्टमित्यर्थवत् पृथिवीत्वम्। पृथिवीत्वं चेत्यु-क्ते नासमवेतं पृथिवीत्वं सम्भवतीति व्यभिचाराभावः। अथापृ-थिवीव्यावृत्तिरूपं पृथिवीत्वमसमवेतं तन्निरासायार्थवदभिसम्ब-न्धपदम्। न। तस्यासिद्धत्वात्। प्रमाणेन हि प्रसिद्धस्य विशेषणेन व्युदासो दृष्टः। यथा नीलेनानीलादेर्नवापोहः सिद्धो वृत्तिविकल्पा-नुपपत्तेः। बाधकस्याप्रमाणतया वास्तवसामान्यसद्भावादेकपदाव्य-भिचारेपि कर्मधारयसमासाभ्युपगमाददोष इति। केचित्। अभि-ग्रहणमभिसमन्तात्सम्बन्ध इति पक्षे व्याप्त्यर्थमाभिमुख्येन च सम्ब-न्ध इति केवलव्यतिरेकाव्यभिचारेण गमकत्वप्रदर्शनार्थम्।

ननु किमितरस्माद्व्यावृत्ता प्रमाणसिद्धा पृथिवी पक्षीक्रियते अथा-प्रसिद्धेति। यद्यप्रसिद्धा पक्षीकरणमयुक्तम्। अथ प्रमाणप्रसिद्धा व्यावृत्ततया तर्हि लक्षणवैयर्थ्यम्। अथाव्यावृत्ततयोपलब्धा तदसद् व्यावृत्तं हि पदार्थानां स्वरूपं तेन च वपुषा गृह्यमाणा धर्मिणो न रूपान्तरेणेति दृष्टम्। नैतदेवम्। लोकप्रसिद्धवशेन पृथिव्या पक्षीकरणात्। तथाहि—यत्र जनानां पृथिवीतिव्यवहारः सा पक्षीकृतेत्यबाधः। नन्वितरेतराश्रयत्वम्। पृथिवीतरेभ्यो भिद्यत इत्येतद्रूपेभ्यो भेदः साध्यस्तेषां तु पृथिवीतो भेदेन प्रतिपन्नानाम-वधिभावो घटत इत्येकाप्रतिपत्तौ इतराप्रतिपत्तेरुभयाभावप्रसङ्गः। तन्न। असाधारणधर्मोपलम्भसहकारिणेन्द्रियेण व्यावृत्तरूपतया नि-र्विकल्पकज्ञाने पृथिवी प्रतिभासते। तथाऽबादयोप्यसाधारणधर्मो-पलम्भाव्यावृत्त्या नः परस्परं चक्षुर्व्यापारादेव प्रथन्ते। स्वयं प्रति-पन्नेपि भेदे परप्रतिपादनायानुमानोपन्यासः। तथाहि–विप्रतिपद्यमा-नः परः परार्थानुमानेनैव प्रतिपाद्यत इति। अथेतरेभ्यो भेदे साध्ये-ऽबादयोपीतरेभ्यो भिद्यन्त इति विद्यमाने सपक्षे कथं केवलव्यतिरेका-व्यभिचारः। न। साध्यापरिज्ञानात्। तथाहि–पृथिवीतरेभ्यो भिद्यत इति पृथिवीतरेभ्यो निरवशेषेभ्यो भिद्यत इति साध्यार्थः। तथाच सपक्षाभावः न ह्युदकादयः स्वात्मभ्यो भेदिन इति। अथ पृथिवीत्वं यद्यसाधारणधर्माद्भिद्यते ततोप्यन्यस्माद्भिद्यत इत्यनवस्था। अभे-दे तु साध्यसाधनभावानुपपत्तिः। अतो स्वतो भिद्यते क्षितेरपि

तथाभावेन बाधात्। अथ पृथिवीत्वं पृथिव्याः विशेष्यते पृथिवी च पृथिवीत्वेनेति इतरेतराश्रयत्वम्। नैतदेवम्। पृथिव्यामनुवर्तमानवपुषो भेदान्तराद्व्यावृत्तस्येन्द्रियव्यापारानन्तरीयकविकल्पकज्ञाने प्रतिभासनात्। तथाहि-अनुगतस्वभावस्यापितरस्मात् व्यावृत्तं स्वरूपं सामान्यस्य। तच्च प्रत्यक्षेण स्वयं प्रतीतमपि परप्रतिपादनाय हेतुत्वेनाभिधीयत इत्यनवस्थाद्यभावः। न च सर्वथा विप्रतिपद्यमानः प्रतिपाद्यः स्यादिति धर्मिज्ञानं सामान्येन साधनज्ञानं चाभ्युपेयम्। केवलमितरेभ्यो भिन्ना पृथिवी न प्रतिपद्यत इति साधनोपन्यासः। तथैकं वाक्यमावर्त्यमानं भूयांसमर्थमाहेति शब्दार्थनिरूपणपरत्वेनाभिसम्बध्यते-पृथिवीत्वाभिसम्बन्धादिति वाक्यम्। तथाच सामान्यं शब्दार्थः। तस्यैकतया संकेतकारणादिति जैमिनीयाः। विशेषास्त्वनियतदिग्देशसम्बन्धितया न कार्त्स्न्येनोपलब्धभाजो भवन्तीति कथं संकेतविषयाः। अथ यावतामुपलम्भः तावत्स्वेव सङ्केतकरणाद् व्यवहारः। तर्हि विशेषान्तरे सङ्केतासम्भवाद्व्यवहारानुपपत्तिः। न चायोगिनः प्रत्येकमशेषविशेषोपलम्भः। न चानुपलब्धेष्विदमस्य वाच्यमिदमस्य वाचकमित्याभिधानाभिधेयनियमनियोगप्रतिपत्तिः। समयप्रतिपत्तिं च विना शब्दश्रवणादर्थप्रतिपत्त्यभावः। अथाभिन्ननिमित्तमुपादाय विशेषेषु सङ्केतस्तदप्यसत्। अभिन्ननिमित्तसद्भावेपि विशेषाणमानन्त्यं नातिवर्तत इति। सामान्ये सङ्केतात्सामान्यं शब्दार्थः। न च सामान्यवति सङ्केतोपलंभेन सामान्यमभिधायानन्तरं विशेषेषु वर्तिष्यत इति वाच्यम्। विरम्य व्यापाराभ्युपगमेन 'शब्दकर्मबुद्ध्यादीनां विरम्य व्यापारासम्भवादि'ति सूत्रविरोधात्। तथाच विशेषणप्रतिपत्तावेव क्षीणत्वात् विशेष्याप्रतिपादकं तदुक्तम्—

विशेष्यं नाभिधा गच्छेत् क्षीणशक्तिर्विशेषणे।

अथ सामान्यप्रतिपत्तेरपुरुषार्थत्वाद्विशेषार्थतया प्रतिपत्तुः प्रवृत्तिनिवृत्ती न स्यातामिति। तन्न। सामान्यप्रतिपत्त्यन्यथानुपपत्त्या विशेषावबोधे सति प्रवृत्तिनिवृत्त्योर्भावात्। तथाहि—निराधारं हि सामान्यं भवेच्छशविषाणवत्। इत्याधारप्रतिपत्तिरित्यलमतिकल्पितेन।

सर्वमेतदयुक्तम्। अभिन्ननिमित्तोपादाने सति सामान्यवति सङ्केतकारणात्। सामान्यवांश्छब्दार्थः। तद्यथानन्त्येनावस्थिता

विशेषा तथा ह्येकं तेष्वभिन्नं सामान्यमेकत्रोपलब्धम्। तदुपलंभाद-नुपलभ्यमानापि विशेषा सामान्यवदंत्याः । सङ्केतविषयाः श-ब्दाश्चानित्यत्वेपि विशिष्टानुपूर्वीसाचिवा इति । तथाहि—यत्र यत्रेदृशं सामान्यं पश्यसि तत्र तत्रायंशब्दः प्रयोक्तव्यः । इत्थम्भूताच्च शब्दादयमर्थः प्रतिपत्तव्य इति संकेतग्रहो विशेषाणामानन्त्येपि घटत इति । तथाच शब्दश्रवणात्-सामान्य वत्यर्थे प्रतिपत्तिर्दृष्टा । सा च सङ्केतप्रतिपत्तिमाक्षिपति । संकेत-श्चानेनैव प्रकारेण घटते नान्यथेति । अथ गोशब्दश्रवणाच्छाबले-यादिविशेषाप्रतिपत्तेर्न विशेषः शब्दार्थः । सत्यं किं तर्हि सामान्य-युक्तोऽर्थः प्रतीयते । न शाबलेयादिविशेषः । स च शाबलेयादि-शब्देभ्य एव प्रतीयत इति । न चैतावता सामान्यमेव शब्दार्थः प्रधानोपसर्जनभावेनोभयोः प्रतिभासनात् । तथा गामानयेत्यादि प्रयोगेषु सामान्यवतोऽर्थस्यानयनादिकृत्या सम्बन्धात् । अथ सा-मान्यमभिधाय कथं विशेषे वर्तते सूत्रविरोधात् । न सूत्रार्थापरि-ज्ञानात्। तथाच सूत्रस्यार्थः-शब्दो ह्येकदा विशेषणं प्रतिपाद्य पुनर्वि-शेषणं न प्रतिपादयतीति विरम्य व्यापारो निषिद्धः, न पुनर्विशेषणं प्रतिपाद्य विशेष्यं नाभिधत्त इति। तथा कर्म विभागं कृत्वोत्तर-संयोगं करोत्यकृतसंयोगस्य विनाशाभावात्। न च संयोगं कृत्वा संयोगं करोतीति विरम्य व्यापारप्रतिषेधः । तथा विशेषणबुद्धि-र्विशेष्यबुद्धिं कृत्वा न कार्यान्तरमारभत इति । एवं सुखादिष्वपि प्रतिषेधः। ननूक्तं क्षीणशक्तिर्विशेषणेति विशेष्यं नाभिदध्यात् इति। तावच्छक्तेः कार्यविषयत्वात्। कार्यं च विशेषणप्रतिपत्तिवद्विशेष्य-प्रतिपत्तिलक्षणमुपलभ्यमानं शक्तेर्व्यवस्थापकम्। अथ कार्यस्यैवा-भावं ब्रूयात्। स चैवं ब्रुवाणः स्वसंवेदनमपि बाधते। विशेष्य-प्रतिपत्तेः संवेदनात् । भिन्नज्ञानालम्बनयोश्च विशेषणविशेष्यभाव-पक्षे चोद्यं नैकज्ञानालम्बन इति । समानं चैतदुपलभ्यमानस्य शब्दस्यार्थप्रतिपादकत्वाभ्युपगमात्। स्वात्मप्रतिपत्तौ च क्षीणत्वा-त्सामान्यप्रतिपादकत्वं न स्यात् । अथ सामान्यप्रतिपत्तेर्दृष्टत्वान्न तत्र शब्दशक्तेः प्रक्षयः । अर्थप्रतिपादनार्थश्च शब्दप्रयोग इति। यच्चोक्तम्—शब्दसामान्यप्रतिपत्त्यन्यथानुपपत्त्या विशेषाध्यवसाये प्रवृत्तिनिवृत्ती स्याताम्इति । तत्र किं सामान्यमात्रप्रतिपत्त्यन्यथा-

नुपपत्त्या विशेषावबोधस्तद्विशेषप्रतिपत्त्यन्यथाऽनुपपत्त्या वा । यदि सामान्यमात्रप्रतिपत्त्यन्यथानुपपत्त्या तथासति सामान्यमात्रप्रतिपत्तौ विशेषमात्रप्रतिपत्तिरिति प्रवृत्त्यभावः । अथ विशिष्टसामान्यप्रतिपत्त्यन्यथानुपपत्त्या स तर्हि विशेषप्रतिपन्नो विशेषणमिति शब्दादेव प्रतीयते । अथ प्रमाणान्तरादिति । यदि शब्दात्कथं सामान्यमेव शब्दार्थः विशेषस्याप्यभिधायकत्वात् । अथ प्रमाणान्तरं न वा । प्रमाणान्तरव्यापाराननुभवात् । न च सामान्यं परपक्षे विशेषाद्भिन्नं सम्भवति इत्यभेदे सामान्यप्रतिपत्तिवत् विशेषप्रतिपत्तिप्रसङ्गः । अन्यथा ह्येतत्प्रतिपत्तावितराप्रतिपत्तेर्भेदः । अथेष्यत एव केनचिद्रूपेणाभिन्नं भिन्नञ्चेति । न । भेदाभेदयोर्विधिप्रतिषेधरूपत्वादभिन्ने धर्मिण्यसम्भवः । तथाहि–किं येन रूपेण भिन्नं तेनैव रूपेणाभिन्नमुत रूपान्तरेणेति वाच्यम् । यदि देशभेदाऽपेक्षया भिन्नं रूपभेदेन त्वभिन्नमित्यविप्रतिपत्तिः । परो विभिन्नदेशभेदापेक्षया भेदं प्रतिपद्यत इति । अथानुगतव्यावृत्तात्मतया प्रतिभासाद्वस्तुबोधात्मकत्वम् । तदसत् । अनुगतसामान्यसम्बन्धादनुगतं स्वरूपेण तु व्यावृत्तमितीष्यते एव द्विरूपता । न चैकत्वे तादात्म्ये सति द्विरूपतोपपद्यत इति समवायलक्षणः सम्बन्धोऽभ्युपगन्तव्यः । स्वरूपभेदेन तु भेदे समवायं विना नियतविशेषेण व्यपदेशानुपपत्तिः । पृथिव्याः पृथिवीत्वमित्यादिसम्बन्धं बिना यावत्पृथिव्या व्यपदिश्यते तदवस्थान्तरेण कस्मान्नेति नियमाभावः । यदि च पृथिवीशब्दः पृथिवीत्वमभिदध्यात् पृथिवीत्वशब्दस्यार्थो वक्तव्यः । न चाभेदे तद्धितसाफल्यं पश्याम इति सामान्यवानर्थः पृथिवीशब्दस्येति युक्तम् । अथैकत्र सङ्केतितः पृथिवीशब्दः कथमर्थान्तर प्रवर्तिष्यत इत्याह । पृथिवीत्वाभिसम्बन्धात् निमित्तात् पृथिवीशब्द एकत्र सङ्केतितः स चार्थान्तरेपि तद्वशात्प्रवर्तत इति सङ्केतानुपपत्तेर्विशेष एव शब्दार्थो न सम्भवतीति सांख्यशाक्तपक्षोपि निषिद्ध एव, तथा "शक्तयः सर्वभावानां कार्यार्थापत्तिगोचरा" इति तन्निरासः । यत्पृथिवीत्वाभिसम्बन्धात्पृथिवी कार्यं करोतीति पृथिवीत्वमेव निजा शक्तिरन्या तु चरमसहकारिरूपा तत्सद्भावे कार्यकरणात् तदभावे चाकरणादिति । तथाहि—विद्यमाना अपि तन्तवः कार्यं नारभन्त इत्यन्त्यतन्तुसंयोगं विनेति सैव शक्तिः । अथार्थान्तरम्

अर्थान्तरस्य कथं शक्तिरनर्थान्तरत्वेपि समानमेतत् । सैव तस्यैव शक्तिरिति । अथ यदि पूर्वेषां चरमसहकार्येव शक्तिस्तस्याप्यशक्तस्याकारणत्वात् । अन्यथा शक्तिर्वाच्येत्यनवस्था । नैतदेवम् । चरमस्य हि सहकारिणः पूर्वसहकारिण एव शक्तिरितरेतराभिसम्बन्धेन कार्यकारणात् । स एव च समग्राणां भावः सामग्रीति भावप्रत्ययेनोच्यते । तेन हि सत्तासमग्रव्यपदेशदर्शनात् । ननु यद्यतीन्द्रिया शक्तिर्नेष्यते मणिमन्त्रादिना तर्हि प्रतिबद्धोऽग्निर्न स्फोटादिकार्यमारभत इति कस्य प्रतिबन्धः । न चाग्नेः । न चाग्निसंयोगस्योपलभ्यमानत्वादिति शक्तेः प्रतिबन्धः । तदसत् । मणिमन्त्रादिप्रतिबन्धकाभावस्यापि कार्योत्पत्तौ सहकारित्वात् । तदभावे तु न कार्यस्योदय इति तद्विशिष्टसंयोगे एव शक्तिर्न पुनः शक्तेः प्रतिबन्धः नानुत्पत्तिर्विनाशो वा सम्भवतीति । चिरोत्पन्नत्वाद्विनिष्टायाश्च पुनरुत्पत्तिकारणाभावादनुत्पत्तिप्रसङ्गः । अशक्तस्य कार्यानुत्पादकत्वादित्यन्वयव्यतिरेकाभ्यां प्रतिबन्धकाभावविशिष्टाग्निसंयोगे एवाग्निशक्तिरिति ज्ञातम् । एवमत्रापि पृथिवीत्वनिजा शक्तिरपरा तु सहकारिभूतेति ।

पृथिव्यादीनां नवानां गुणवत्त्वं समवायिकारणत्वं क्षित्युदकात्मनां चतुर्दशगुणवत्त्वं चोक्तम् । तत्र कैर्गुणैर्गुणवती केषामुत्पत्तौ समवायिकारणत्वं के वा चतुर्दशगुणाः किञ्च गुणात्मकं लक्षणमित्याह रूपादिवाक्यम् । रूपादयः संस्कारपर्यन्तं विद्यन्ते यस्यास्सा रूपादिसंस्कारवती । किमेते स्वतन्त्रतया वृत्तिकृता प्रतिपाद्यन्ते उत सूत्रकारस्याप्यभिप्रेता इत्याशंक्याह एते च गुणाविनिवेशाधिकार इत्यादि । एते च सूत्रकारेणाभिहिताः । कस्मिन्नधिकारे ? गुणा विविधमनेकप्रकारेण विनिवेश्यन्ते यस्मिन्नधिकारे स तथोक्तो द्वितीयोऽध्यायः तत्र सूत्रकारेण प्रतिपादिताः । तथाच रूपरसगन्धस्पर्शवती पृथिवीत्यनेन विशेषगुणाश्चत्वारोऽभिहिताः । तथा चाक्षुषवचनादिति संख्याः परिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे कर्म च रूपिद्रव्यसमवायाच्चाक्षुषाणीति सूत्रं दर्शयति । सूत्रस्यार्थो रूपिद्रव्यमुपलब्धिलक्षणप्राप्तं महत्त्वाद्युपेतम् तत्र समवायात्संख्यादयश्च प्रत्यक्षग्राह्या इत्यन्यपरेणापि सूत्रेण रूपवति द्रव्यं संख्यादीनां सद्भावोऽभिहितः । अन्यथा ह्यविद्यमानत्वादेव तत्र तेषामुपल-

म्भो न स्यादिति । पदार्थश्च संख्या इति बहुवचनम् । संख्यात्वव्यतिरेकेणैकत्वाद्यपरसामान्यप्रदर्शनार्थम् परिमाणानीति । तथा परिमाणत्वापेक्षयाऽणुत्वाद्यपरसामान्यज्ञापनार्थम् पृथक्त्वमित्येकवचनं। पृथक्त्वसामान्यापेक्षयैकपृथक्त्वाद्यपरशून्यताप्रदर्शनार्थम्। संयोगविभागाविति द्विवचनेन संयोगत्वविभागत्वव्यतिरेकेणापरसामान्याभावेपि विभागस्य संयोगापेक्षिताज्ञापनार्थम् समासकरणम्। तथा परत्वापरत्वे इत्यपि द्विवचनम् परत्वापरत्वसामान्यापेक्षया अपरसामान्याभावेपि साहचर्यज्ञापनार्थं समासकरणमिति । तथा पतनोपदेशादिति गुरुत्वात्पतनमिति सूत्रं दर्शयति । यथा च पतने गुरुत्वं कारणम् तथा वक्ष्यामो गुरुत्वपरीक्षायाम् । अद्भिः सामान्यमिति वचनादिति सर्पिर्जतुमधूच्छिष्टानां पार्थिवानामग्निसंयोगाद्द्रवत्वमद्भिः सामान्यमिति सूत्रं दर्शयति । सर्पिरादीनामग्निसंयोगाद्द्रवत्वं सम्पद्यतेद्भिः तथा सामान्यं यथा भवतीति सूत्रार्थः। उत्तरकर्मवचनादिति नोदनाद्याभिषोः कर्म तत्कर्मकारिताश्च संस्कारात्तथोत्तरमुत्तरं चेति सूत्रं दर्शयति । इषोः शरस्याद्यं कर्म नोदनात् भवतीति कर्म च नोदनापक्षं संस्कारमारभते । कर्मकारिताच्च संस्कारात्तथोत्तरं चैकः संस्कारो नैकं कर्मारभते पतनं यावदिति । इषोः समवायिकारणस्यावगतायां सभविन्याभिषोः इति षष्ठ्यभिधानं तदवयवेष्वपि कर्मज्ञापनार्थम् । यदि वा षष्ट्यर्थस्य विद्यमानत्वात्तदभिधानेप्यदोषः ॥

(भा०) क्षितावेव गन्धः। रूपमनेकप्रकारकं शुक्लादि । रसः षड्विधो मधुरादिः । गन्धो द्विविधः सुरभिरसुरभिश्च । स्पर्शोऽस्या अनुष्णाशीतत्वे सति पाकजः । सा च द्विविधा नित्या चानित्या च । परमाणुलक्षणा नित्या । कार्यलक्षणा त्वनित्या । सा च स्थैर्याद्यवयवसन्निवेशविशिष्टाऽपरजातिबहुत्वोपेता शयनासनाद्यनेकोपकारकरी च । त्रिविधं चास्याः कार्यं शरीरेन्द्रियविषयसंज्ञकम् । तत्र शरीरं द्विविधं योनिजमयोनिजं च । तत्रायोनिजमनपेक्षशुक्रशोणितं

देवर्षीणां शरीरं धर्मविशेषसहितेभ्योऽणुभ्यो जायते। क्षुद्रजन्तूनां यातनाशरीराण्यधर्मविशेषसहितेभ्योऽणुभ्यो जायन्ते। शुक्रशोणितसन्निपातजं योनिजम्। तत्तु द्विविधं जरायुजमण्डजं च। मानुषपशुमृगाणां जरायुजम् पक्षिसरीसृपाणामण्डजम्। इन्द्रियं गन्धव्यञ्जकं सर्वप्राणिनां जलाद्यनभिभूतैः पार्थिवावयवैरारब्धं घ्राणम्। विषयस्तु द्व्यणुकादिप्रक्रमेणारब्धस्त्रिविधो मृत्पाषाणस्थावरलक्षणः। तत्र भूप्रदेशाः प्राकारेष्टकादयो मृद्विकाराः। पाषाणा उपलमणिवज्रादयः। स्थावराः वृक्षतृणौषधिगुल्मलतावतानवनस्पतय इति॥

(सू०) ननु सुगन्धि सलिलमित्याद्यनुभवाद्गन्धवत्त्वं जलादावप्यस्तीति न तस्य पृथिवीत्वभेदकत्वमत आह क्षितावेवेति। जलादेः कुसुमादिसम्पर्कादौपाधिकमेव गन्धवत्त्वं न तु स्वाभाविकमिति भावः।

रूपमात्रं जलादावतिप्रसक्तत्वान्न क्षितेर्भेदकमत आह रूपमिति। शुक्लाद्यनेकप्रकारं—शुक्लत्वाद्यवान्तरानेकजातिमद्रूपम्, क्षितावेवेत्यनुषज्यते, तथाच शुक्लपीतनीलरक्ताद्येकैकरूपवत्त्वं तादृशप्रत्येकरूपवद्वृत्तिद्रव्यत्वाव्यापकजातिमत्त्वं वा साधर्म्यमित्यर्थः। न च शुक्लरूपवत्त्वगर्भनिरुक्तेस्तोये तेजसि चातिव्याप्तिः, तत्र पाकजत्वेन शुक्लरूपस्य विशेषणीयत्वादिति भावः। रसवत्त्वमपि जले गतमत आह रस इति। मधुरादिरिति। मधुरतिक्ताम्लकटुकषायलवणभेदात् षड्विधो रसः क्षितावेव, तथाच मधुरादिप्रत्येकरसवत्त्वं तादृशप्रत्येकरसवद्वृत्तिद्रव्यत्वाव्यापकजातिमत्त्वं वा साधर्म्यम्। अत्रापि माधुर्यं पाकजं ग्राह्यम्,

अतो न जलेऽतिप्रसङ्गः। क्षारस्तु रसो लवणप्रभेद एवेति न षड्विधत्वव्याघातः। ननु सौरभासौरभरयोरपि गुणान्तरयोः पृथिव्यां सत्त्वाद्रूपादिचतुर्दशगुणमात्रोक्त्या न्यूनत्वमत आह गन्धो द्विविध इति। गन्ध एव द्विविध इत्यर्थः। असुरभिः सुरभ्यन्यगन्धस्तेन दुर्गन्धाभिन्नस्य चित्रगन्धस्य सत्त्वेपि न द्वैविध्यव्याघातः। ननु स्पर्शवत्त्वं जलादित्रिकेऽतिव्याप्तत्वान्न पृथिव्या भेदकमत आह स्पर्श इति। अस्याः—पृथिव्याः, स्पर्शोऽनुष्णाशीतत्वे सति पाकजः—पाकप्रयोज्यः, तथाच पाकप्रयोज्यानुष्णाशीतस्पर्शवत्त्वं साधर्म्यम्। तत्र वायोर्वारणाय प्रयोज्यान्तम्। घटादौ पाकजस्पर्शस्यासत्त्वेऽपि परम्परया तत्प्रयोज्यस्पर्शसत्त्वान्नाव्याप्तिः। स्वर्णादौ पाकप्रयोज्यद्रवत्वसत्त्वात्तद्वारणायानुष्णाशीतेति। अनुष्णाशीतत्वन्तु स्पर्शत्वावान्तरजातिभेदः। पृथिवीवातयोः स्पर्शवृत्तिरेवात्र घटक इति भावः। पाकप्रयोज्यस्पर्शवत्तामात्रं लक्षणम् अनुष्णाशीतत्वे सतीति तु शीतोष्णभिन्नस्यापि स्पर्शस्य सत्त्वसूचनार्थमिति त्वाचार्याः।

यद्यपि संख्यापरिमाणादीनां नवानामपि द्रव्यान्तरवृत्तित्वात् न केवलानां पृथिवीतरभेदकत्वम्, तथापि गन्धवत्त्वविशेषितस्यैव तेषां प्रत्येकस्य तथात्वसम्भवान्न तानि विवेचितानीति ध्येयम्। ननु पृथिवी न स्पर्शवती नित्यमावृत्तिजातिमत्त्वादात्मवदिति निःस्पर्शत्वसिद्धौ पाकजस्पर्शवत्त्वं कुतः साधर्म्यमत आह सा चेति। तथा चोक्तहेतोः स्वरूपासिद्धत्वान्न तेन निःस्पर्शत्वसिद्धिरिति भावः। तत्र-नित्यानित्ययोर्मध्ये। परमाणुलक्षणा—परमाणुस्वरूपा। न च तत्र मानाभावः, द्युटिः सावयवद्रव्यारब्धो चाक्षुषद्रव्यत्वात् घटवदित्यनुमानेन द्व्यणुकस्येव परमाणोरपि सिद्धेरित्याचार्याः।

उक्तहेतोरप्रयोजकत्वादन्यथा तत एव त्रुटेरवयवपरम्परायां अपि सिद्धिप्रसङ्गात् । त्रसरेणुर्नावयवजन्यः किन्तु निरव एव तत्रैव चात्यन्तापकृष्टमहत्त्वप्रयुक्तः परमाणुत्वव्यपदेश इति स्वतन्त्राः ।

कार्यलक्षणा त्विति । न च संस्थानविशेषविशिष्टैः परमाणुपुंजैरेव त्र्यणुकघटादिप्रतीत्युपपत्तौ कार्यद्रव्ये मानाभावः, परमाणूनां महत्त्वविरहेण संस्थानविशेषावच्छिन्नस्यापि तस्य प्रत्यक्षानुपपत्तेरिति भावः । महत्त्वं न परिमाणान्तरं किन्तु विलक्षणसंस्थानवत्त्वमेव, तदेव च प्रत्यक्षतायां प्रयोजकमतः प्रत्येकपरमाणोरप्रत्यक्षत्वेऽपि संस्थानप्रभेदावच्छिन्नस्य तस्य प्रत्यक्षत्वं नानुपपन्नमिति तु नव्यवौद्धाः । स्थैर्यादीति । स्थैर्यमनेकक्षणस्थायित्वम् । आदिना विष्टंभकत्वधारकत्वाकर्षकत्वाद्युपग्रहः । अवयवसन्निवेशः—संस्थानगतवैलक्षण्यम्, तैर्विशिष्टैरित्यर्थः । अपरेति । पृथिवीत्वावान्तरघटत्वपटत्वाद्यनेकजातिमतीत्यर्थः । यद्यपि घटत्वपटत्वादिसमुदायवत्त्वमप्रसिद्धम् घटत्वादिप्रत्येकजातिमत्त्वं पटादौ घटादौ पार्थिवद्व्यणुकादौ चाव्याप्तम्, तथापि कार्यत्वे सति घटत्वपटत्वादिप्रत्येकत्वानधिकरणद्रव्यत्वाव्यापकजातिमत्त्वे तात्पर्यम् । मूर्तत्वस्य जातित्वे तदन्या जातिर्निवेश्याऽतो न जलादिष्वतिप्रसङ्गः । शयनं—शय्या, आसनं—पीठम्, आदिना मठमण्डपादि तादृशानां वस्तुनामुपकाराणामिष्टहेतूनां कारिकेत्यर्थः । अस्याः—पृथिव्याः, कार्यं—कार्यद्रव्यम्, षष्ठ्यर्थः समवेतत्वम् नातो दारुप्रभृतीनां रूपादौ तज्जन्यवन्ह्यादौ वा प्रसङ्गः । शरीरेत्यादि । द्रव्यसमवाय्यवृत्तिचेष्टावद्वृत्तिजातिमत्त्वं शरीरत्वम् । तादृशी च जातिर्मनुष्यत्वगोत्वादिरूपा मृतदेहेऽप्यास्ति, वृक्षादीनान्तु चेष्टावत्त्वं नास्ति प्रमाणाभावात् प्रवृत्त्यादिलक्षणकारणबाधाच्च । भोगावच्छेदकवृत्तिद्रव्यसमवाय्य-

वृत्तिजातिमत्त्वरूपन्तु शरीरत्वं वृक्षादावतिप्रसक्तत्वान्न भाष्यकृतामभिमतम्, वृक्षादेर्विषयप्रभेदेन वक्ष्यमाणत्वात् । स्मृत्यजनकज्ञानजनकमनोवृत्तिसंयोगाश्रयत्वमिन्द्रियत्वम् । सुषुप्त्यनुरोधेन त्वङ्मनोयोगस्य ज्ञानसामान्यं प्रति हेतुत्वे स्मृत्यजनकत्वं विहायात्मावृत्तित्वं संयोगस्य विशेषणं वाच्यम् । व्यापारप्रत्यासत्त्या साक्षात्कारकारणत्वं वेन्द्रियत्वम् । शरीरेन्द्रियभिन्नकार्यद्रव्यत्वं विषयत्वम् । ननु शरीरं न पार्थिवमयोनिजत्वात् सूर्यादिदेहवत् इति शरीरावच्छेदेन पार्थिवत्वाभावसाधनाच्छरीरस्य पार्थिवत्वं बाधितमतस्तत्र भागासिद्धिरत आह शरीरं द्विविधमिति । योनिशब्दस्य कारणवाचित्वादयोनिजत्वं यदि कारणाजन्यत्वं तदोक्तहेतोः स्वरूपासिद्धिरेव स्यान्न तुभागासिद्धिरित्यन्यथा तन्निर्वक्ति तत्रायोनिजमिति । शुक्रशोणितसम्पर्कप्रभवत्वमेवायोनिजत्वम् । तच्च देवानामृषीणां च शरीरे स्वरूपासिद्धमिति भावः । यद्यपि देवा ऋषयश्च शरीराण्येव तथापि राहोः शिर इत्यत्रेव तादात्म्यम् । अवयवारभ्यत्वं वा षष्ठ्यर्थः । ननु शुक्रशोणितप्रभवस्य यदि तदितरकारणप्रभवत्वं स्यात् कारणसामान्याजन्यत्वमेव स्यादतः कारणान्तरं दर्शयति धर्मविशेषसहितेभ्य इति । तत्तद्देहावच्छेद्यभोगहेतुपुण्यसहकृतेभ्य इत्यर्थः । अणुभ्यः—पार्थिवपरमाणुभ्यः । प्रयोज्यत्वं पञ्चम्यर्थः । क्षुद्रजन्तूनां—दंशमशकादीनाम् । अत्रापि पूर्ववत्तादात्म्यादिकं षष्ठ्यर्थः । यातनाशरीराणीति । यातना—दुःखं तन्मात्रावच्छेदकीभूतशरीराणीत्यर्थः । शुक्रेति । शुक्रशोणितयोः सन्निपातो मिलनं तज्जनितं शरीरं योनिजमित्यर्थः । तच्च—तदपि । गर्भधारकं चर्मपुटकं जरायुस्ततो जातं जरायुजम् । मानुषेति । यद्यपि मृगा अपि पशव एव तथापि गोदृषन्यायाद्भेदेनोपन्यासः । पशुपदं ग्राम्यपशुपरम् मृ-

गपदमारण्यकपशुपरम् अतो भेद इति त्वाचार्याः । मृगाणामिति बहुवचनस्य गणसूचकत्वाद्राक्षसादीनामप्युपग्रहः । सरीसृपा-वक्षःसर्पणशालीः सर्पकीटसरटपत्नीमत्स्यप्रभृतयः । अत्र मानुषादिशरीरस्य गन्धवत्त्वेन पृथिवीत्वसिद्धौ तस्य पाञ्चभौतिकत्वप्रसिद्धिर्भूतपञ्चकजन्यत्वप्रयुक्तैव न तु तदुपादेयत्वप्रयुक्ता जातिसाङ्कर्यापत्तेः शीतस्पर्शादेरौपाधिकत्वेन तत्र जलत्वाद्यसाधकत्वाद्विजातीयानारम्भकत्वे पञ्चभिर्मिलित्वा द्रव्यारम्भस्यासम्भवाच्चेति ध्येयम् ।

पार्थिवमिन्द्रियमाह इन्द्रियमिति । सर्वप्राणिनां—सर्वजातीयप्राणिनाम् । जलाद्यनभिभूतैः पार्थिवावयवैरारब्धं—गन्धव्यञ्जकमिन्द्रियं, घ्राणं—घ्राणसंज्ञकमित्यन्वयः । प्रतिनियतजलाद्यभिभूतनासिकानां पुंसां गन्धग्राहकेन्द्रियसत्त्वे मानाभावमावेदयितुं जलाद्यनभिभूतैरित्युक्तम् । न च घ्राणस्य पार्थिवत्वे प्रमाणाभावः, गन्धः आश्रयद्रव्यसजातीयकरणकानुभवग्राह्यः प्रतिनियतेन्द्रियग्राह्यशब्दान्यगुणत्वाद्रूपस्वरूपवदित्यनुमानस्यैव प्रमाणत्वादिति भावः । अत्राकृष्टविशेषजनिता नासिकैवास्तु घ्राणपदस्यार्थस्तत्संनिकर्ष एव च ग्रन्थग्राहकोऽस्तु गन्धानुभवोऽतीन्द्रियकरणको जन्यसाक्षात्कारत्वाच्चाक्षुषवदित्यादेरप्रयोजकत्वादित्युत्तानाः ।

पार्थिवं विषयं निर्वक्ति विषयस्त्विति । द्व्यणुकादीति । द्व्यणुकत्रसरेण्वादिक्रमेणारब्धः पार्थिवावयवैरित्यनुषंजनीयम्, नातो जलादावतिप्रसङ्गः । पार्थिवावयवारभ्यत्वं तदीयरूपादावप्यतो द्रव्यत्वांशलाभाय द्व्यणुकादिक्रमेणेत्युक्तम् । द्व्यणुकादेर्लक्ष्यत्वलाभार्थं तदभिधानम् । यद्यपि चर्मास्थ्यादिभेदेन क्षीरघृतदध्यादिभेदेन पत्रपुष्पफलमूलादिभेन चानन्ता